
श्रीवेङ्कटाचार्यविरचिता

बाणासुरविजयचम्पूः



डॉ. कम्भम्पाटि साम्बशिवमूर्तिः

श्रीवेङ्कटाचार्यप्रणीता

बाणासुरविजयचम्पूः

श्रीवेङ्कटाचार्यविरचिता

बाणासुरविजयचम्पूः

सम्पादकः

डॉ. कम्भम्पाटि साम्बशिवमूर्त्तिः

विभागाध्यक्षः, सङ्कायाध्यक्षश्च (शिक्षा)

जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः

मदाऊ (ग्रा), भाकरोटा (पो), जयपुरम्

राजस्थानम् - ३०२०२६

प्रकाशकः

दीपशिखाप्रकाशनम्

कटेवा नगर - जयपुरम्

Publisher :

Shri Rajesh Gupta
Deepasikha Prakashanam
Katevanagar, Jaipur

Title :

बाणासुरविजयचम्पूः
Banasuravijayachampuh

By :

Dr. Kambhampati Samba Siva Murty
Head & Dean, Faculty of Education
JRRSanskrit University,
Jaipur

Edition: June - 2011

Copies: 500


Price : 180/-

Typeset by :

M.M. Computers,
927, Chouda Rastha
Jaipur - Rajasthan

Printed at :

Sun & Sun Press,
Adarshnagar,
Jaipur - Rajasthan



भजे नारायणं दासं साक्षाद्दैवस्वरूपिणम्।
रामानन्दस्य वेदान्तज्ञानिनं योगिनं सदा।।
यस्य दर्शनमात्रेण सत्यं भगवतो ध्रुवम्।
स्पष्टं सुरूपं तं वन्दे तारकं भवहारकम्।।

आचार्यः रामानुज देवनाथः
कुलपति
Prof. Ramanuja DEVANATHAN
Vice Chancellor

जगद्गुरुरामानन्दाचार्य-
राजस्थानसंस्कृतविश्वविद्यालयः
मदाऊ, भांकरोटा, जयपुरम् (राज.)-302026
JAGADGURU RAMANANDACHARYA RAJASTHAN SANSKRIT UNIVERSITY
Madau, Bhankrota, Jaipur (Raj.)-302026
Phone : 0141-5132001 (O)
0141-5132002 (R)
Website : jrrsanskrituniversity.ac.in

शुभं भूयाद्भूरि

अथ काव्यभेदे किमियं चम्पूरिति ? तल्लक्षणञ्च प्रसिद्धं श्रूयते – गद्यपद्यमयं काव्यं चम्पूरिति ।। गद्यपद्यमयी साङ्का सोच्छ्वासा चम्पूरिति हेमचन्द्रः । परमिदं लक्षणं सर्वदा निर्दुष्टं न दृश्यते । कथादिष्वपि लक्षणस्यास्यातिव्याप्तेः। ब्राह्मणग्रन्थादिष्वपि तथा दर्शनात् तत्रापि चम्पूत्त्वापत्तिः । अत एवास्मद् गुरुभिरुपदिष्टमध्यापनावसरे किञ्चिन्निर्दुष्टं लक्षणं, तद्यथा –

गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ।
सालङ्कृति प्रबन्धाढ्यं रसपूर्णमुदीर्यते ।। इति ।।

अत्र सालङ्कृति प्रबन्धाढ्यं रसपूर्णमिति दलत्रयनिवेशेन प्रागुक्तातिव्याप्तिर्वार्यते। सत्सु नाटकादिषु चम्पूरिति भेदस्यावश्यकता केति विचारे चम्पूप्रणेतार एव समादधति इत्थम् । तद्यथा विश्वगुणादर्शचम्पूकाव्ये –

पद्यं यद्यपि विद्यते बहुसतां हृद्यं विगद्यं न तत्,
गद्यं च प्रतिपद्यते न विजहत्पद्यं बुधास्वाद्यताम् ।
आदत्ते हि तयोः प्रयोग उभयोरामोदभूमोदयं
सङ्गः कस्य हि न स्वदेत मनसे माध्वीकमृद्वीकयोः ? ।। इति ।।

तथैव कुमारसम्भवचम्प्वां दृश्यतामयं श्लोकः –

पद्यं हृद्यमपीह गद्यरहितं धत्ते न हृद्यस्पदे
गद्यं पद्यविवर्जितं च भजते नास्वाद्यतां मानसे ।
साहित्यं हि तयोर्द्वयोरपि सुधामाध्वीकयोर्योगवत्
सन्तोषं हृदयाम्बुजे वितनुते साहित्यविद्याविदाम् ।। इति ।।

एताभ्यां श्लोकाभ्यां चम्पूकाव्यस्य वैशिष्ट्यं स्पष्टं प्रतीयेत ।

प्राय: चत्वारिंशदधिकद्विशतं चम्पूकाव्यानि व्यरचिषतेति विमर्शका: । तत्राधुनिकानि च बहूनि । तत्रान्यतमं **बाणासुरविजय**चम्पूकाव्यम् । अस्य प्रणेता महाकवि:। श्रीवेङ्कटाचार्य: वाधूलगोत्रोत्पन्न:। कवेरस्य वैदुष्यं – **"तमो द्रव्यं नैल्यादिति हि यद्यभाषिष्ट भगवान्", " ज्ञातज्ञेयविशेषवत्यपि भवत्यास्माकमेतत्पुन: "** इत्यादिषु श्लोकेषु स्पष्टं प्रकाशते। तदीयं वैदिकं ज्ञानम्, आलङ्कारिकं चातुर्यं, शब्दचित्रणसामर्थ्यञ्चानुभूयते पाठं पाठम् । एतादृशो ग्रन्थस्य प्रकाशनं सहृदयानां नूनमानन्दाय कल्पेत ।

तद्धि विचिन्त्यायं ग्रन्थोऽधीतालङ्कारशास्त्रेणाध्यापनपटिष्ठेन, ग्रन्थलेखने सिद्धहस्तेन, शिक्षाशास्त्रे कृतपरिश्रमेणार्जितयशसा, धीमता, श्रीमता **डॉ. क. साम्बशिवमूर्त्ति**वर्येण साधीयसा प्रकारेण सम्पाद्य उत्तमभूमिकया सार्धं प्राकाश्यन्नीयत इति महान् हर्षस्य विषय:। इत्थमेवोत्तरोत्तरं ग्रन्थप्रणयनकर्मण्यभिरतो भूयादिति अशेषविघ्नशमनमनीकेश्वरं प्रार्थयामह इति शम् ।

इत्थं

श्रीकर–मेष–शुक्ल–दशमी
पूर्वफल्गुणीयुतो गुरुवासर:, (12-5-11)

विदां वचनकर:

(रामानुजदेवनाथ:)

महामहोपाध्याय:
देवर्षि कलानाथशास्त्री,
पीठाध्यक्ष:, नित्यानन्दशास्त्र्याधुनिकसंस्कृतपीठस्य,
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालय:
प्रधानसम्पादक:, भारती संस्कृतमासपत्रिकाया:,
अध्यक्षचर:, राजस्थानसंस्कृत-अकादम्या:
निदेशकचरश्च, (संस्कृतशिक्षा-भाषाविभागयो:, राजस्थानसर्वकारयो:)

सी/ ८, पथ्वीराजमार्ग:,
सी. स्कीम-जयपुरम्,
राजस्थानम् ।

दूरभाष: - ०१४१- २३७६००८

पुरोवाक्

संस्कृतसाहित्ये सुमहती चम्पूकाव्यपरम्परा शताब्दीभ्य: सुप्रतिष्ठेति विदितमेव संस्कृतसाहित्येतिहासविदाम्।छन्दोबद्धानि पद्यानि रमणीयानि हृदयावर्जकानि च भवन्ति, छन्दोनिबद्धानां च काव्यानामनादि: काचन धारा भारते भ्राजत इत्यपि सुविदितम् । किं बहुना ? मानवपुस्तकेतिहासस्य सर्वादिमो ग्रन्थो यो हि विश्वजनीनमतेन मानवीयेतिहासे प्रथमं पुस्तकमित्यख्यायते यश्च ऋग्वेदसंहितानाम्नाऽस्माकं सुपरिचित:,स हि च्छन्दोबद्ध एव । इत्थं हि पद्यकाव्यानामनादि: सततं प्रचलन्ती च परम्परा भारतीयं साहित्यं प्रथयति विश्वे । एतया सहैव गद्यकाव्यानामपि सुदीर्घा, पुरातनी, सुमहती च परम्परा च जागर्त्ति संस्कृते । बाण-सुबन्धु-दण्डीत्यादीनां गद्यकाव्यानि सुप्रथितान्येव । "गद्यं कवीनां निकषं वदन्ती"त्याभाणकमपि सुविदितम् । इत्थं हि गद्ये पद्ये च द्वयोरपि माध्यमयो: प्रातिभं रचनाप्रकर्षं प्राकटयन् संस्कृतसाहित्यसर्जना अनादिकालात् । अत एव संस्कृते गद्यबद्धा रचनाऽपि काव्यपदेनैवाभिधीयते, गद्यकाव्यमिति। तदैवेदमपि तेषां बुद्धौ प्रास्फुरद् यद् यदि द्वयो: सङ्गमेन अर्थात् युगपद् गुम्फनेन किञ्चन काव्यवस्तु प्रणीयते, क: स्यात्तत्प्रभाव: ? नूनं हृदयावर्जिता स्यात्तादृश्यपि रचनेति तैरनुभूतम् । तदा हि सुलभा या लयबद्धता, नियतयतिकता, सहजसारणीयता चास्ति, गद्यसुलभश्च य: प्रवाह: प्रौढि: अर्थगौरवं चास्ति, सर्वेषां तेषां गुणानां युगपदेकत्र सङ्गम: सर्वथोत्कर्षकर: सिद्ध्येदेव ।

अत एव भारतीयसाहित्ये गद्य-पद्ययोर्द्वयोरपि समुचितसंमिश्रणेन सुमहत् काव्यसाहित्यं प्राणीयत, प्रमुखत: कथासाहित्यम् । तस्य नाम चम्पूकाव्यमिति प्रसिद्धम् ।

न केवलं संस्कृते एव तादृशी गद्यपद्यमिश्रा काव्यपरम्परा, अपि त्वन्यास्वपि भारतीयभाषासु, प्रमुखवस्तु दक्षिणभारतीयभाषासु विपुलं कथासाहित्यं गद्यपद्यमिश्रं प्राप्यते यस्याभिधानं **तुलाल** इत्यादिविभिन्नभाषापदैरुपन्यस्यते । दक्षिणभारते सेयं परम्परा सविशेषं लोकप्रियतामवापेति दृष्ट्वा बहूनामिदं मतं यत्तदिदं चम्पूरित्यभिधानमपि दक्षिणभारतीयभाषामूलकमेव स्यादिति। भवतु, किमपि रहस्यमस्य, किन्तु भारते सर्वेष्वप्यञ्चलेषु प्रमुखतो दशमशताब्दीमारभ्य विविधकविभिश्चम्पूसर्गबद्धप्रबन्धलक्षणानुरूपाणि, सुतरां लोकप्रियाण्यभूवन्। को न जानाति त्रिविक्रमभट्टीयं नलचम्पूकाव्यं,भोजराजीयं रामायणचम्पूकाव्यमनन्तभट्टप्रणीतं भारतचम्पूकाव्यं, वेङ्कटाध्वरिणो विश्वगुणादर्शचम्पूकाव्यं वा ?

एवंविधेष्वेव चम्पूकाव्येषु तिरुमलबुनकपट्टणश्रीनिवासाचार्यसुतेन कन्दालवंशीरत्नेन विविधशास्त्रपारङ्गमेन रामानुजसम्प्रदायानुयायिनो वेङ्कटाचार्येण प्राय: ऊनविंश्या: शताब्द्या: आरम्भे प्रणीतं प्रौढिप्रकर्ष-लालित्य-गाम्भीर्यादिगुणसमृद्धं चम्पूकाव्यं बाणासुरविजयाख्यं काव्यगुणोत्कर्षवहं समादरार्हं च विदुषामित्यस्माकं गौरवम् । अल्पज्ञातमेवाऽऽसीदिदं प्रौढं काव्यम् । सुमहत: प्रमोदस्यायं विषयो यदस्य काव्यस्य कतिपयासां पाण्डुलिपीनां (मातृकेति दक्षिणभारतेऽभिहितानां) सश्रममध्ययनं विधाय कवे:,काव्यस्य च साङ्गोपाङ्गं समीक्षणमनुष्ठाय जगद् गुरुरामान्दाचार्यसंस्कृतविश्वविद्यालयीयशिक्षासङ्कायं विभागाध्यक्ष-सङ्कायाध्यक्षपदमधिष्ठात्रा विद्वत्प्रवरेण **कम्भम्पाटि साम्बशिवमूर्त्ति**महोदयेन साधु सम्पादनमस्य कृतं, प्रकटीयते च तदिदं सभूमिकं सम्प्रति विदुषां प्रमोदस्येति ।

ससमीक्षणेऽस्मिन् ग्रन्थसम्पादनकार्ये विदुषा, सम्पादकेन, विभिन्नासु मातृकासूपलब्धमानानां पाठभेदानां सूचनाऽपि दत्ताऽस्ति, काव्ये प्रयुक्तानां छन्दसां सविवरण: परिचयोऽपि प्रदत्तोऽस्ति,भूमिकायाञ्च वेदकालादारभ्याऽद्यावधि चम्पूकाव्यस्येतिवृत्तं, कविवंशपरिचय: काव्यगता विशेषा:, कथानिबन्धने परिदृश्यमानं वैशिष्ट्यमित्यादि सर्वविधं परिचयात्मकं विषयवस्तु साध्वनुशील्य सारस्यान्ते पाठका वेङ्कटाचार्यस्य रचनाभङ्गिमानं, काव्यगतां प्रौढिञ्च । दाक्षिणात्यानां मध्यकालिकानां कवीनां वाग्विच्छित्ति: कथं समस्तप्रौढपदबहुला भवति स्मेति विदन्त्येव समीक्षणचणा: सुधिय:। बाणासुरविजयचम्पूप्रणेतु: कविवर्यस्य वेङ्कटाचार्यस्य शैलीं निभाल्य सहसैव स्मृतो मया लक्ष्मीसहस्र-विश्वगुणादर्शचम्पूप्रभृतीनां प्रौढकाव्यग्रन्थानां प्रणेता वेङ्कटाध्वरीयस्य शैली प्रसादगुणयुक्ता भूत्वाऽपि बहुत्र तमेव प्रौढिमानं स्पृशति यो दाक्षिणात्यानां विशेषतश्च रामानुजसम्प्रदायानुयायिनां

(सुदर्शनशतकप्रणेतृकूरनारायणसदृशानां) कृतिषु परिदृश्यते । स्वयं वेङ्कटाध्वरी स्ववाचो वैशद्यमित्थं वर्णयति -

सुचारु मधुमोचिकारसमुचो वचोदेवता-
कुचामृत-कचाकचि-प्रचुर-चातुरीमेदुराः ।
नराः ! सततमन्दिरा गुणकथासुधाधोरणी-
रूपाध्वमिह वेङ्कटाध्वरिकवेरुदारा गिरः ।।

तादृश्येव शैली परिदृश्येत पाठकैर्बाणासुरविजयचम्प्वाः पद्येषु, गद्येऽपि। अत्र हि श्रीमद्भागवतादिषु प्रसिद्धम् उषा-अनिरुद्धयोरनुरागस्य कथानकं, तयोर्मेलनस्य परिणतिः, बाणासुरस्य पूर्वमासीन्मेलने विप्रतिपत्तिः, पर्यन्ते च समर्पणम् इत्यादि कथं निबद्धमिति सम्पादकेन स्वविमर्शवत्यां भूमिकायां स्पष्टीकृतमेव । रामानुजमतान् वैष्णवभक्तिसिद्धान्तानपि कथानकफलके कथमन्तर्विन्यस्यति कविरित्यपि तेन विशदीकृतम्। सोऽयमेव च चम्पूकाव्यस्य विशेषः ।

चम्पूसाहित्याब्धौ रत्नसदृशा उल्लासपदेनाभिहितेषु षट्सु सर्गेषु निबद्धा सेयं बाणासुरविजयचम्पूर्निश्चप्रचमेवसुसम्पाद्येत्थं प्रकाशिता भृशं प्रसादयेत्सुधीवरान्, संस्कृतभारत्याः काव्यभाण्डागारे च नितान्तं बहुमूल्यमेकं रत्नं समावेश्य, तस्य पाठकेभ्यः सुषमतामापाद्य यत् प्रशस्यं कार्यमनुष्ठितं प्रो. **कम्भम्पाटि साम्बशिवमूर्त्तिना**, तत् खलु विदुषोऽस्य यशोऽपि समेधयेदिति दृढं विश्वसन् वर्धापयामि सम्पादकवर्यम् ।

देवर्षि कलानाथ शास्त्री

(देवर्षि कलानाथशास्त्री)

सुप्रस्ताव:

समस्तकाव्यप्रक्रियानामिव चम्पूकाव्यस्यापि बीजं वेदेष्वेव दृश्यते । ऋग्वेदीय-ऐतरेयब्राह्मणे हरिश्चन्द्रोपाख्यानं गद्यपद्यमिश्रसम्मिश्रितं भूत्वा चम्पूमाग्रे एव प्रचलति । कृष्णयजुर्वेदे तैत्तरीय-मैत्रायणी-कठसंहितासु गद्यपद्यमिश्रितरचना परिदृश्यते । अथर्ववेदेऽपि कुत्रचित् गद्यशैली प्रयुक्ता। आरण्यकग्रन्था: प्राय: गद्ये एव निबद्धा: । उपनिषदस्तु गद्यपद्योभयात्मका: त्रिप्रकारत्वेन विरचिता:। रामायणमहाभारतादिकाव्येषु, भागवतादि पुराणादिषु च तत्रतत्र गद्यस्य प्रयोग: सूक्ष्मरूपेण दृश्यते। पुराणेषु नैकविधेष्वाख्यानेषु गद्यं चूर्णिकाभेदेन प्रयुक्तं विद्यते । रूपकाणि तु गद्यपद्यात्मकतयैव रचितानि । अत्र संवादा: गद्ये, वर्णना: पद्ये च रचिता: । भासकालिदासादिकवय: रूपकेषु पद्यगद्ययो: सालङ्कारां, कलात्मकां समाञ्च शैलीं प्रायुङ्क्त। बौद्धकथासाहित्ये तु चम्पूशैली बहुधा प्रयुक्ता । पञ्चतन्त्रादिकथासाहित्येऽपि चम्पूशैली गद्येन सह पद्यमपि दृश्यते।

चम्पूशैल्या: कलात्मकपरिणतस्वरूपं, क्रीं श. ३०५ समयस्य, हरिसेनविरचितस्य समुद्रगुप्तस्य इलाहाबादशासने प्रथमतया प्रयुक्तमिति विमर्शकामामभिप्राय: । वैदिकसाहित्ये या सरला चम्पूशैली.विद्येते सा क्रीं. श. ४ शताब्दं यावत् विकासं प्राप्य काव्यस्वरूपमवाप। क्री. श. दशमशताब्दमारभ्य चम्पूकाव्यरचनोद्भव: समजनीति, तत्पूर्वं चम्पूकाव्यरचना जाता वा नेति वक्तुं प्रमाणा: न लभ्यन्ते । अस्याम् शताब्दौ कवय: स्वरचनासु नूतनत्वप्रदर्शनाय चम्पूशैलीं समाश्रयन्त । दक्षिणभारतदेशे आन्ध्र-तमिल-कन्नड-मलयालभाषासु साहित्यस्य आरम्भकालादेव चम्पूशैल्या: आदरो विद्यते । संस्कृतपुराणादीनां प्रवचनावसारे पौराणिक: मूलं संस्कृते पठित्वा देशभाषायां तदर्थं गद्यरूपेण वदन्त: आसन्। इयं कथाप्रवचनपद्धति:प्रजासु अधिकसमादरमवाप्नोत्। अत एव तत्र चम्पूकाव्यरचना भूरिशो जातेति **चम्पू काव्य का आलोचनात्मक एवं ऐतिहासिक अध्ययन** इति नामके ग्रन्थे **डॉ. छविनाथ त्रिपाठी** महोदय: न्यरूपयत् । अप्रकाशितचम्पूकाव्यग्रन्था: प्राय: २४५ संख्याका: सन्तीति स: गणयामास । तेष्वन्यतम: वेङ्कटाचार्यविरचिता बाणासुरविजयचम्पू:।

यदाहं तिरुपतिस्थ - केन्द्रीयसंस्कृतविद्यापीठे (अधुना राष्ट्रियसंस्कृतविद्यापीठम्) गुरुवर्याणां वेदवेदाङ्गपारङ्गतानां, नानाशास्त्रदक्षानां, नैकभाषाप्रवीणानाम् आचार्य-वेम्पटि कुटम्बशास्त्रिमहोदयानां मार्गदर्शने विद्यावारिधिं कुर्वन्नासम् तदानीं मम सतीर्थोऽऽसीत् श्री मुष्टि सत्यनारायण:, य: बाणासुरविजयचम्पूकाव्योपरि स्वकीय मातृकासंशोधनकार्यं कुर्वन् आसीत्। मम शोधकार्यं समाप्याहम् आन्ध्रप्रदेशसर्वकार्यस्य गुरुकुलविद्यालयेषु कार्यरत: ममोद्योगस्थानमगच्छम् । किन्तु श्री सत्यनारायणमोहदयस्य शोधकार्यं किमभवदिति कालमहिम्ना विस्मृत: । मध्ये सम्पर्कोऽपि नाभूत् ।

पुन: मम नियुक्ति: यदा राष्ट्रियसंस्कृतसंस्थाने जाता, तदा संस्थानेन प्राप्तोपाधीनां पाण्डुलिपिग्रन्थानां प्रकाशनमिति परियोजनाया: अन्तर्गतत्वेन सुलोचनामाधवमहाकाव्यम् इति शोधबन्धस्य संस्करणकार्यं मह्यमदात्। झटिति श्रीसत्यनारायण: मम मनसि आगत: । पुनश्च स: भीमवरमिति स्थाने भारतीयविद्याभवननामके विद्यालये शैक्षिकनिदेशक पदे कार्यरतोऽस्ति ज्ञात्वा अहं तत्रागच्छम् । तेन सह वार्त्तालापसन्दर्भे शोधकार्यं गुरुकृपया सर्वं समाप्तमिति, किन्तु न समर्पित: शोधप्रबन्ध: इति मामसूचयत् । अहं तं न्यवेदयम् यत् गुरुभि:, भवता च महता परिश्रमेण कार्यमिदं साधितम्, अतो हेतो: अस्य प्रकाशनमवश्यं स्यादिति, यदिष्यते तर्हि करवाणीत्यवदम्। सपदि एव सिद्धं सर्वं मह्यं महता स्नेहेन मह्यं प्रायच्छत् । तत: गुरोराज्ञया इदं सम्पादनकार्यं मया समापितम् । इदानीं प्रकाशनमप्येति ।

अस्मिन् सन्दर्भे जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य मान्यकुलपतय:, नानाशास्त्रधुरीणा:, शिक्षाशास्त्रमर्मज्ञा:, प्राचीनार्वाचीनप्रवचने कृतपरिश्रमा:, अनुष्ठानगरिष्ठा: , स्वनामधन्या: आचार्यपादा:, आचार्या: रामानुजदेवनाथमहोदया:, ये मां स्वाशीर्वचोभिरनुगृहीतवन्त: तेभ्य: सभक्तिकं प्रणतिततिं वितरामि ।

मम गुरुवर्येभ्य: राष्ट्रियसंस्कृतसंस्थानस्य, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरेभ्य: आचार्येभ्य: वेम्पटि कुटिम्बशास्त्रिमहोदयेभ्य: सश्रद्धं कृतज्ञताकुसुमाञ्जलिं विदधामि।

महामहोपाध्याया:, राष्ट्रपतिपुरस्कारपुरस्कृता: ऋषिप्रवरा: देवर्षिकलानाथशास्त्रिमहोदया: बहुकार्यव्यग्रा: सन्तोऽपि ये वचसा आशीर्वचांसि प्रदाय मां प्रैरयन्त, तेभ्य: गुरुवरेभ्य: धन्यवादपुरस्सरं नमस्सुमाञ्जलिं वितनोमि । जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिचरा: संस्कृतसङ्गणकव्याकरणन्यायशास्त्रादिषु निष्णातेभ्य:, प्रो. के. वी. रामकृष्णमाचार्युलुमहोदयेभ्य: अस्मै कार्याय मां प्रेरितवन्त: , तेभ्य: हार्दिकं धन्यवादं समर्पयामि।

मम साहित्यगुरवः राष्ट्रपतिपुरस्कारपुरस्कृताः आचार्याः कोम्पेल्ल रामसूर्यनारायण-महोदयाः, येषां शुभाशीर्वचनेन, सुनियोजितमार्गदर्शनेन जीवनोन्नतिमवाप, तेभ्यः गुरुवर्येभ्यः कार्त्तज्ञं विनिवेदयामि । आवश्यकीं सर्वां सामग्रीं प्रदाय सस्नेहं मां प्रेरितवन्तः सौजन्यमूर्त्तयः डॉ. मुष्टि सत्यनारायणमूर्त्तयः, येषामेव परिश्रमस्य फलमिदमस्ति, तेभ्यः भूयो भूयो धन्यवादान् प्रकटयामि।

सुन्दरः सुन्दरः साक्षात् इति वचसोऽनुसारं सुन्दरो मे प्रकाशकः श्री राजेश गुप्ता, दीपशिखाप्रकाशनद्वारा सुन्दरं ग्रन्थं, सुन्दररूपेण प्रकाश्य मह्यं प्रायच्छत् । तादृशमित्रवर्याय हार्दिकं धन्यवादं समर्पयामि ।

कार्यकरणसमये आवश्यकसहायं कृतवत्यै मम धर्मपत्न्यै श्रीमत्यै वल्लीमहालक्ष्म्यै कृतज्ञतां विनिवेदयामि। कुमारी सुषमायै, चिरम्जीविने तेजस्विने च शुभाशिषः । अन्ते जयपुरनाथं गोविन्दं प्रार्थये यत् सर्वाभ्यः प्रजाभ्यः शङ्करोत्विति ।

इत्थम्

गुरुजनवचनपालकः

के. साम्बशिवमूर्तिः

जयपुरम्

(डॉ. कम्भम्पाटि साम्बशिवमूर्त्तिः)

विषयानुक्रमः

❑❑❑

I. साहित्यपरिचयः

1. चम्पूसाहित्यमहत्त्वम्

गद्यावली पद्यपरम्परा च
प्रत्येकमावहति प्रमोदम्।
हर्षप्रकर्षं तनुते मिलित्वा
द्राक् बाल्यतारुण्यमतीव कन्या।[१]

गद्यं पद्यञ्च पृथक् पृथक्तया प्रमोदं जनयतः। परं गद्यपद्ययोः मिश्रणं तु बाल्यतारुण्यावस्थयोर्विद्यमाना कन्येव हर्षातिरेकं जनयति।

चम्पूशैल्यां काचन नवीनता वर्त्तते या गद्यपद्यकाव्ययोः समष्टिगतानन्दस्य युगपदनुभवप्राप्तिं कल्पते। एतादृशरचनायां गद्यस्य जटिलता, समासबहुलता, दुरूहता-इत्यादिभिर्लक्षणैः यदि कदाचित् नीरसता उत्पद्यते, तस्याः तिरोधानं पद्यस्य मधुरता, प्रसादता, सौष्ठवं, रसोत्कर्षता, सङ्गीतात्मकता च कुर्वन्ति। मिश्रितशैल्याः महत्त्वं शरभोजिमहाराजेन तथ्यात्मकतया प्रत्यपादि। यथा—

पद्यं हृद्यमपीह गद्यरहितं धत्ते न हृद्यास्पदं
गद्यं पद्यविवर्जितं च भजते नास्वाद्यतां मानसे।
साहित्यं हि तयोर्द्वयोरपि सुधामाध्वीकयोर्योगवत्
सन्तोषं हृदयाम्बुजे वितनुते साहित्यविद्याविदाम्॥[२]

यद्यपि पद्यं सुन्दरं, परन्तु गद्यं विना तत् हृदयास्पदं न भवितुमर्हति। एवमेव पद्यरहितं गद्यमपि हृदयेनास्वाद्यते। किन्तु पद्यगद्ययोः समन्वितं साहित्यं सुधामाध्वीकयोः मिश्रणवत् साहित्यविद्यावतां हृदयकमलानि विकाश्य, सन्तोषं विस्तारयति।

(2) चम्पूरामायणकर्त्ता भोजदेवः चम्पूशैल्याः विशेषतां सङ्केतयति। यथा—

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः
हृद्या हि वाद्यकलया कलितेव गीतिः।

---

१. जीवन्धरचम्पूः – I–9 २. कुमारसम्भवचम्पूः –I–6

तस्माद्दधातु कविमार्गजुषां सुखाय
चम्पूप्रबन्धरचनां रसना मदीया ॥[१]

गद्यस्य मध्ये रचिता पद्यसूक्तिः तथैव चित्ताकर्षिणी भवति यथा वाद्यैः कलितं गानम्। अत एव काव्यानुरागिणामानन्दाय चम्पूकाव्यरचना करणीया। तत्रैव मदीया रसना प्रवर्त्तते इति।

(3) वेङ्कटाध्वरिः विश्वगुणादर्शचम्पूग्रन्थे—

पद्यं यद्यपि विद्यते बहुसतां हृद्यं विगद्यं न तत्
गद्यं च प्रतिपद्यते न विजहत्पद्यं बुधास्वाद्यताम्।
आदत्ते हि तयोः प्रयोग उभयोरामोदभूमोदयं
सङ्गः, कस्य हि स्वदेत मनसे माध्वीकमृद्वीकयोः ॥[२] इति न्यरूपयत्।

अपि च—

(4) अप्पादीक्षितः—

गुणगणमणिमालालङ्कृतं गद्यपद्यैः ।
धरत हृदि बुधेन्द्राः साधु चम्पूप्रबन्धम् ॥[३]

(5) जीवराजः—

मदयति मनो मदीयं तनुजघनभारतीरसविलासः।
किमु सुतनु नीरविहारो नहि नहि चम्पूविहारोऽयम् ॥[४]

(6) श्री अण्णयार्यः—

लोके श्लोकाननेकान् विदधति कृतिनः श्रीकरास्तोकपाका-
नेके गद्यानि हृद्यान्यतिमधुरपदाऽस्वाद्यमानानि चान्ये।
पार्श्वाभिर्व्यक्तमुक्ताफलकलनकलत्पद्मरागोज्ज्वलो स्रग्-
बन्धच्छायानुबद्धं रचयति कविराडेष चम्पूप्रबन्धम् ॥[५]

---

१. I–3
२. I–4
३. गौरीमायूरमाहात्म्यचम्पूः
४. गोपालचम्पूः
५. तत्त्वगुणादर्शचम्पूः I–४

2. मिश्रकाव्यपरम्परा

(अ) वैदिककालिका मिश्रशैली

गद्यपद्यात्मिका मिश्रशैली वैदिककालादेव प्रारब्धा।

कृष्णयजुर्वेदस्य तैत्तरीय-मैत्रायणी-कठशाखानां संहितासु गद्यपद्य-मिश्रणमुपलभ्यते। अथर्ववेदस्य प्रायः षष्ठोंऽशस्तु गद्यमय एव। अतो ज्ञायते यद् गद्यं, पद्यं यावत् प्राचीनं तावदेव प्राचीनं मिश्रमिति।

(1) ऐतरेयब्राह्मणम्—

ब्राह्मणग्रन्थानामुपाख्यानेषु सम्मिलितशैली स्पष्टतया दृग्गोचरा भवति। विशिष्य ऐतरेयब्राह्मणे प्रयुक्तायाः मिश्रशैल्याः परमोत्कृष्टमुदाहरणं तत्रस्थं हरिश्चन्द्रोपाख्यानं वर्तते। उपाख्यानमिदं मुक्तकगद्यानां सङ्कलनं नास्ति। परन्तु तस्य प्रबन्धाश्रितरूपत्वं व्यञ्जयति। यथा—

"हरिश्चन्द्रो ह वैधस, ऐक्ष्वाको राजापुत्र आस। तस्य ह शतं जाया बभूवुः। तासु पुत्रं न लेभे। तस्य ह पर्वतनारदौ गृह ऊषतुः। स ह नारदं पप्रच्छ इति।"

यन्विमं पुत्रमिच्छन्ति ये विजानन्ति ये च न।
किंस्वित्पुत्रेण विन्दते तन्म आचक्ष्व नारद॥ इति॥
स एकया पृष्ठो दशभिः प्रत्युवाच, इति।
ऋणमस्मिन् संनयत्यमृतत्त्वं च गच्छति।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम्॥[१]

उपाख्यानस्य आरम्भे प्रधानपात्रस्य परिचयोऽभवत्। घटनाक्रमस्य विकासः ऋजुगत्या जातः। पद्यानां प्रयोगः प्रश्नोत्तररूपेऽपि आसीत्। वस्तुवर्णनेऽपि महत्त्वं वर्त्तते। भावपरिवर्त्तनेन सह नैकस्थलेषु छन्दसां परिवर्त्तनं च कृतम्।

अन्नं ह प्राणः शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः।
सखा ह जाया कृपणं ह दुहिता ज्योतिर्ह पुत्रः परमे व्योमन्॥[२]

'ज्योतिर्हपुत्रः' इत्यादिप्रयोगैः ज्ञायते यत् प्रस्तुतेन सह अप्रस्तुतानामंशानां च प्रयोगाय एकत्रैव योजना विहिता। कदाचित्सूक्तीनां चोपयोगः अकारि। अन्ते "इति" इति प्रयोगस्य परम्परा उपनिषत्सु, जातककथासु प्रयुक्तगाथास्वपि दृश्यते।

---

१. पृष्ठसंख्या-२

२. ऐतरेयब्राह्मणे-पृ. सं-८ श्लोकसं-६

यथा—

चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति ॥[१]

द्वयोः पात्रयोः कथोपकथनसम्बद्धवाक्येषु कदाचित्साक्षादेव, कदाचिद् वर्णने 'इति' शब्दस्य प्रयोगः विहितः। यथा—हरिश्चन्द्रवरुण कथोपकथने—

''अथैनमुवाच-वरुणं राजानमुपधाव पुत्रो मे जायतां तेन त्वा यजा इति।

तथेति।

स वरुणं राजानमुपससार।

पुत्रो मे जायतां तेन त्वा यजा इति।

तथेति।

तस्य पुत्रो जज्ञे रोहितो नाम''।[२]

हरिश्चन्द्रस्य मुख्यकथां विना सौर्यवासि-अजीर्गतस्य, शुनःशेपस्य, शुनः शेपेन विश्वामित्रस्य पुत्रपदप्राप्तिकथाः क्रमशः पताकाप्रकरीभ्यां समाना एव। घटनास्थले उपस्थितपात्राणां परिचयः गद्ये एव वर्त्तते। यथा—

''तस्य ह विश्वामित्रो होताऽऽसीज्जमदग्निरध्वर्युर्वशिष्ठो ब्रह्मा अयास्य उद्गाता''।[३]

एवं प्रकारेण उपाख्यानेऽस्मिन् सर्वाः विशेषताः प्रदर्शिताः, ताः सर्वा अपि चम्पूकाव्येषु उपलभ्यन्ते।

(आ) उपनिषत्सु मिश्रशैली

आरण्यकभागस्तु प्रायः गद्ये एवास्ति। किन्तु उपनिषत्सु काश्चन उपनिषदः गद्यात्मकाः, अन्याः पद्यात्मकाः, काश्चन गद्यपद्यमिश्रिताश्च विद्यन्ते। यथा—

केनोपनिषदि तृतीयचतुर्थखण्डौ यक्षोपाख्यानसम्बद्धौ स्तः।[४] एतौ द्वौ तु गद्ये एव भवतः। किन्तु प्रथमखण्डस्य गद्यात्मकः तृतीयो मन्त्रः कमपि विशेषमादधाति।

''न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो.....।''

पद्येषु अस्यैव विस्तारमकरोत्। यथा—

यद्वाचानभ्युदितं येन वागभ्युद्यते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥[५]

चम्पूकाव्येषु वर्णनस्य पुनरावृत्तिः एवं प्रकारेण मिलति।

---

१. ऐतरेयब्राह्मणे पृष्ठसंख्या-१३ २. तत्रैव पृ. सं.-७
३. ऐ. ब्रा. पृष्ठ संख्या-१३ ४. केनोपनिषत्-गीता प्रेस, गोरखपुर-पृ. सं-३६
५. तत्रैव I–४

प्रश्नमुण्डककठोपनिषत्सु मिश्रशैली मिलति। अत्र कठोपनिषत् वर्णनप्रधानोपनिषद्वर्त्तते। कदाचिद्वर्णने कथावस्तु अदृश्यं भवति। अस्या उपनिषद आरम्भे एव (यमनचिकेतयोः उपाख्यानम्) गद्येनैवाभवत्। यथा—

ओम्। उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ। तस्य ह नचिकेता नाम पुत्र आस। तं ह कुमारं सन्तं दक्षिणासु नीयमानासु श्रद्धाऽऽविवेश सोऽमन्यत।

पीतोदका जग्धतृणा दुग्धदेहा निरिन्द्रियाः

अनन्दा नाम ते लोकास्तान् स गच्छति ता ददत्॥[१]

फलनिर्देशोऽपि अधोनिर्दिष्टप्रकारेण विहितः।

नचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम्।

उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते॥[२]

गद्यभागेषु कलात्मकसौन्दर्यमानेतुं बहुधा प्रयासः कृतः। गद्यं तावन्मनोहरं नास्ति यावत्पद्ये भवति। यथा—

"यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्।[३]"

अपि च—

"स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामाख्ये समुद्र इत्येवं प्रोच्यते।[४]"

औषनिषदं गद्यं शैलीदृष्ट्या स्वच्छन्दं, स्वाभाविकञ्च वर्त्तते। अत्र प्रयुक्तं आख्यातात्मकं गद्यं सुन्दरं वर्त्तते। पदानां पुनरुक्तिः रुचिकरा भवति। प्रायः अत्रत्यगद्ये दीर्घदीर्घसमासाः न सन्ति।

(इ) वेदाङ्गेषु मिश्रशैली

वेदाङ्गसम्बद्धा नैके ग्रन्थाः सूत्रशैल्यां विरचिताः। तानि सूत्राणि गद्ये एव सन्ति। ज्ञानविज्ञानतथ्यानां, दार्शनिकसिद्धान्तानां स्मरणायैव सूत्रशैली आविष्कृता विद्यते। यतो हि—
स्वल्पाक्षरमसंदिग्धं सारवद्विश्वतो मुखम्। अस्तोभमनवद्यञ्च सूत्रं किल।

सूत्राणां संक्षिप्ततायाः कारणेन तेषु कवित्वस्य छायापि न दृश्यते। तथैव सूत्रकाले मूलग्रन्थानामुपरि लिखिता टिप्पण्यः, लिखितानि व्याख्यानान्यपि संक्षिप्तरूपेण आसन्। अतः गद्यस्य संक्षिप्तविशिष्ट-आकृतेः स्वीकरणहेतुना गद्यपद्यमिश्रशैल्यां कवित्वपूर्णरचना उपलब्धा नास्ति।

---

१. कठोपनिषद् १-१-१,२ २. तत्रैव १-१-३

३. तत्रैव १-३-१६ ४. मुण्डकोपनिषत्-मन्त्रः-५

(ई) जातककथासु मिश्रशैली

पालीजातककथासु मिश्रशैली अत्यन्तसुन्दररूपेण दृश्यते। ''सुत्तपिटक-खुद्दकनिकायस्य दशमग्रन्थे जातकगाथाः उपनिबद्धाः। सिंहल-वट्टगामणिराजस्य काले अट्ठकथासहितजातकगाथाः लिपिबद्धा बभूवुः।[१]

जातककथासु उपलभ्यमाना गद्यशैली मूलभूतां गाथां स्पष्टयति। अट्ठकथासहितं गाथारूपं, तत्कालीनमिश्रशैल्याः उदाहरणं प्रस्तौति। इमा जातककथाः 547 संख्याकाः सन्ति।

(उ) मिश्रशैल्याः चम्पूरूपम्

हरिषेणकृतायां समुद्रगुप्तप्रशस्तौ मिश्रशैल्याः रचनास्वरूपमुपलभ्यते। चतुर्थशताब्दिं यावत् संस्कृतगद्ये समासबद्धता, अलङ्कारप्रियता च प्रविष्टे। तथा च गद्यपद्ययोरेकत्र समावेशः इति लक्ष्यं सर्वेषां कवीनामभवत्।

ब्राह्मणग्रन्थानामुपाख्यानेषु, कासुचिदुपनिषत्सु मिश्रशैल्याः छाया दृग्गोचराऽभवत्। उपनिषत्कथाः प्रधानतया आध्यात्मिकाः, उपदेशनिष्ठा भवन्ति। अत्र पद्यबाहुल्यमपि वर्त्तते। उपनिषद्गद्ये प्रौढता-लालित्यादिगुणाः सन्ति। पद्ये उपमोत्प्रेक्षारूपकाद्यलङ्काराणां स्वाभाविकतया प्रयोगः उपलभ्यते।

पतञ्जलेः महाभाष्ये गद्यस्य विवेचनात्मकं रूपं लभ्यते। ततः मिश्रशैली जातककथासु दृश्यते। परमत्र गद्यं, प्रौढम्, आलङ्कारिकं वा नास्ति। यः पद्यभागोऽत्र विद्यते स तु नीतिप्रधानः, उपदेशात्मकश्च। द्वितीयशताब्दौ एव अलङ्कार-निष्ठत्वमधिकतया परिलक्षितम्।

मिश्रशैली दृश्यकाव्यानां च लक्षणं वर्त्तते। प्रायः शैलीयं प्रधानतया शिलालेखानां प्रशस्तिषु विकासमलभत। चम्पूकाव्यस्योत्कृष्टं प्रथममुदाहरणं तु हरिषेणस्य प्रयागप्रशस्तिरिति काव्यविदामभिप्रायः, यत्र गद्यभागः समासबाहुल्येन विराजते।

3. चम्पूशब्दव्युत्पत्तिः

'चपि' धातोः 'उ' प्रत्यये कृते चम्पू इति शब्दः निष्पद्यते। चम्पयति, चम्पति इति वा चम्पूः इति व्युत्पत्त्यर्थः कथयितुं शक्यते। 'चपि' धातोः गमन-ज्ञान-प्राप्ति-मोक्षात्मका अर्था विद्यन्ते। अतः चम्पूशब्दस्य 'मोक्षसहोदरस्य आनन्दस्य प्राप्तिकारिणी' इत्यर्थो भवितुमर्हति। परमेतादृशस्य आनन्दस्य प्राप्तिः न केवलं चम्पूकाव्यैः, अपि तु समस्तकाव्यप्रपञ्चेन भवति।

---

१. भरतसिंह पालिसाहित्य का इतिहास, पृ. सं-२८२

(क) हरिदासभट्टारकः चम्पूशब्दस्यार्थमित्थं प्रत्यपादयत् यत्—

"चमत्कृत्य पुनाति सहृदयान् विस्मितीकृत्य प्रसादयति" इति चम्पूः। अर्थात् चमत्कारप्रधाना सहृदयहृदयाह्लादकारिणी चम्पूरिति भावः।

(ख) अन्ये एवं मन्वते यत् 'चम्पू' शब्दः संस्कृतनिष्ठो नास्ति। परं पदमिदं द्राविडभवमिति। 'सम्पू' इति पदस्य कन्नडतुलुभाषयोः समागमः, मनोहरः इति द्वौ अर्थौ भवतः। 'सम्पू' इति शब्दस्य रूपान्तरं 'चम्बू' इति। तस्मात् 'चम्बू' पदात् "चम्पूः" इति पदं संस्कृतेऽभवदिति।

(ग) चम्पूकाव्यभेदः आदौ दाक्षिणात्येन दण्डिनैव प्रादर्शि। यथा—

मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः।
गद्यपद्यमयी काचिच्चम्पूरित्यपि विद्यते॥

गद्यपद्यमिश्रेण यः काव्यमार्गः द्राविडभाषासु सुप्रसिद्धः, विशेषप्रचारे च वर्त्तते, स एव प्रक्रियाविशेषः संस्कृते च प्राविशत्। 'चम्पू' इत्यभिधानमपि द्रविडपदात् 'सम्पू' इति शब्दभवमिति कथने औचित्यं प्रतिभाति।

न पद्यैरवद्यैरपि गद्यैर्ललितास्तुद्यैः कृतिभिरियं हृद्या।
तुलसीप्रवालविचकितकलिता मालेव भगवतः शौरेः॥[१]

4. चम्पूकाव्यपरिभाषा

चम्पूकाव्यस्य यावत्यः परिभाषाः सन्ति, ताः सर्वाः चम्पूकाव्यस्य बाह्यस्वरूपं निरूपयन्ति। अन्तः स्वरूपस्य विश्लेषणं प्रति न केनापि आचार्येण ध्यानमदायि। वस्तुतः काव्यरूपेण चम्पूकाव्यस्य परवर्तिनि मध्यकाले प्रतिष्ठा समागता। अत एवेदं विवेचनाय विषयत्वेन न गृहीतम्। आचार्याः, केवलमस्य उल्लेखं विधायोपेक्षामकुर्वन्। अग्निपुराणे ख्यातप्रकीर्णभेदेन सङ्केतं दत्वा चम्पूकाव्यस्योल्लेखं प्रादर्शयत्।

आचार्यदण्डिना श्रुतानां चम्पूकाव्यविशेषानामाधारेण चम्पूकाव्यस्य उल्लेखमकारि। यथा—

मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः।
गद्यपद्यमयी काचिच्चम्पूरित्यपि विद्यते॥[२]

---

१. बालभागवतम् २. काव्यादर्शः-१-३१

अत्र काचित्, विद्यते इति शब्दद्वयस्य प्रयोगेण आचार्यदण्डिना चम्पूरिति 'काचन विद्यते' इति सत्तामात्रं स्वीकृता। अनेनेदं स्पष्टं भवति यत् दण्डिनः समयं[१]यावत् चम्पूकाव्यं स्वीयास्तित्त्वं प्रापेति।

हेमचन्द्रवाग्भटौ चम्पूकाव्यविशेषतासु मिश्रशैल्याः अतिरिक्ततया साङ्कत्वं, सोच्छ्वासत्त्वं च योजयामासतुः। यथा—

गद्यपद्यमयी साङ्का सोच्छ्वासा चम्पूः[२] इति।

भोजेन चम्पूरामायणस्य रचना विहिता। तेन चम्पूकाव्ये वाद्यसङ्गीतसमन्वयः, माधुर्यगुणश्च समायोजितौ। एतादृशगद्यपद्याभ्यामुत्पाद्यस्य आनन्दस्यापि चर्चा भोजेन व्यधायि।

साहित्यदर्पणकारेण विश्वनाथेन—

''गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते। यथा-देशराजचरितम्'' इति निरूपयन् गद्यपयमयीं शैलीं चम्पूरिति प्रत्यपादि।

केनचिदज्ञातकविना चम्पूलक्षणं न्यरूपयत्—

गद्यपद्यमयी साङ्का सोच्छ्वासा कविगुम्फिता।
उक्तिप्रत्युक्तिविष्कम्भशून्या चम्पूरुदाहृता॥[३] इति।

चम्पूकाव्ये उक्तिप्रत्युक्तिविष्कम्भाः न भवन्ति इत्येतदपि एकं चम्पू- लक्षणमित्याशयः।

''सालङ्कृतं सबन्धं गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते।''[४] वर्णनविस्तारस्या-काङ्क्षाऽपि चम्पूकाव्यस्यान्यतमं लक्षणं भवति। डॉ. छविनाथत्रिपाठिना समग्रतयेदं लक्षणं प्रस्तुतम्।

गद्यपद्यमयं श्रव्यं सबन्धं बहुवर्णितम्।
सालङ्कृतं रसैः सिक्तं चम्पूकाव्यमुदाहृतम्॥[५]

उपर्युद्धृतपरिभाषाणामाधारेण चम्पूकाव्यस्य निम्ननिर्दिष्टलक्षणानि भवन्ति।

१. चम्पूकाव्यं गद्यपद्यमयं भवति।

२. अङ्कसहितं भवति।

३. उच्छ्वासादिभिर्विभक्तं भवति।

४. उक्तिप्रत्युक्तीः न भवतः।

---

१. ६००-८०० ई.

२. काव्या - ८-९

३. डॉ. सूर्यकान्त द्वारा सम्पादित नृसिंहचम्पू की भूमिका

४. चम्पूकाव्य का आलोचनात्मक एवं ऐतिहासिक अध्ययन पृ.सं.-40.

५. तत्रैव पृ. सं-41

५. विष्कम्भशून्यं भवति।

६. अलङ्कारैः अलङ्कृतं भवति।

७. रसभरितं भवति।

८. वर्णनविस्तृतं भवति।

5. चम्पूकाव्यविशेषताः

(अ) प्रबन्धात्मकता तथा वस्तुसन्निवेशः

आचार्यपरम्परा, चम्पूकाव्यं मिश्रशैल्यां लिखितं श्रव्यकाव्यस्य एकः प्रबन्धात्मको भेद इति मनुते। यतो हि प्रबन्धकाव्ये कथावस्तुनः सन्निवेशः अनिवार्यरूपेण अपेक्षितो भवति। कथावस्तुनः आधारेण चम्पूकाव्यं त्रिप्रकारकं भवति।

1. यस्मिन् काव्ये आदित अन्तं यावत् कथावस्तु अविच्छिन्नतया प्रचलति तत् प्रथमं प्रकारकं चम्पूकाव्यम्। यथा–नलचम्पूः, यशस्तिलकचम्पूः।
2. यस्मिन् काव्ये कथावस्तु भूमिकायाम्, उपसंहारे च प्रस्तूय, मध्ये दृश्यानां, स्थानानां वा विस्तृतं वर्णनमभवत् तद् द्वितीयप्रकारकं चम्पूकाव्यम्। यथा– विश्वगुणादर्शचम्पूः, केरलाभरणम्, यात्राप्रबन्धात्मकचम्पूः, मन्दारमरन्दचम्पूः।
3. यस्मिन् काव्ये कथावस्तु नाममात्रेणापि नास्ति, परं तत् काव्यं गद्यपद्यमिश्रशैल्यां लिखितं तत् तृतीयप्रकारकं चम्पूकाव्यं भवति। पुनः इदं प्रकारकं चम्पूकाव्यं द्विविधं वर्तते।

(क) वर्णनात्मकम्–सरस्वतीजलपातवर्णनम्।

(ख) विचारप्रधानात्मकम्–तत्त्वगुणादर्शचम्पूः, विद्वन्मोदतरङ्गिणी। प्रायः एतादृशानि चम्पूकाव्यानि षोडशशताब्दतः परं निर्मितानि सन्ति।

(आ) कथावस्तु

चम्पूकाव्यानां कथावस्तु एकघटनाश्रितं, बहुघटनासंयुतं वा भवति।

मुख्यप्रासङ्गिककथावस्तुनोः अतिरिक्ततया पुराणानां वस्तु अपि कतिपयचम्पूग्रन्थेषु अवान्तरकथारूपेण सन्निविष्टं वर्त्तते। चम्पूकाव्यानामिदमेव वैशिष्ट्यं भवति यत् कथावस्तुनः साक्षाद् विकासो भवति।

(इ) चम्पूकाव्यस्य स्वरूपम्

आकृतिदृष्ट्या चम्पूकाव्यं लघु–बृहदाकारकं चोपलभ्यते। नारायण–रविवर्मणोः चम्पूकाव्यानि एकपरिच्छेदात्मकाकृतिबद्धानि लघुकायात्मकानि सन्ति। आनन्दवृन्दावनचम्पूकाव्यम् अतिबृहदाकारकं वर्तते, यत्र 22 स्तबकनिबद्धं वर्त्तते। अस्मिन्

चम्पूकाव्ये विस्तृतया चम्पूकाव्यानां परिचयमदात्। एतादृशचम्पूकाव्यानि प्रायः 20 संख्याकानि लभ्यन्ते।

(ई) कथावस्तुचयनम्

कथावस्तुचयने चम्पूकाव्यकाराणां दृष्टिः अतिविशाला वर्त्तते। हिन्दू-जैनपुराणान्यतिरिच्य शैववैष्णवधार्मिकग्रन्थेभ्योऽपि एते कवयः प्रचुरतया घटनाः जगृः। तत्तत्कालीनेतिहासाद् भूगोलाच्च अधिकतया सहायतां स्वीचक्रुः। यत्र ऐतिहासिकराजानां वर्णनं पौराणिकपृष्ठभूमेः आधारेण प्रस्तुतं, तानि काव्यानि अधिकप्रसिद्धानि अभूवन्। स्थानीयदेवतानां, तासां महोत्सवानां तथा माहात्म्यवर्णनाय कविभिः स्वकपोलकल्पितकथावस्तूनिः सृष्टानि। यात्राप्रबन्धेषु कल्पितं भारतीयजनजीवनस्य कथावस्तु तादृशं मनोहरं, प्रभावोत्पादकं च वर्त्तते, यादृशमन्यत्र न लभ्यते।

पुराणेभ्यस्तु अत्यन्तलोकप्रियतया प्रचलिता कथा एव चम्पूकाव्यकृद्भिः आदृताः, आधृताश्च। प्रायः 34 चम्पूकाव्यानि परिणयकथासम्बद्धानि, यानि चम्पूकवीनां कथावस्तुचयनाभिरुचिं प्रत्यक्षीकुर्वन्ति, प्रमाणयन्ति च। धार्मिकदृष्टिकोणस्य प्राधान्येनैव चम्पूकाव्यानां कथावस्तुस्वीकरणं प्रभावितं सम्पन्नम्। तथा च धर्मगुरूणां, विविधसम्प्रदायप्रवर्त्तकाणामाचार्याणां चरितं चम्पूकाव्यकथावस्तु समभवत्। कतिपयाश्रयदातृणां जीवनवृत्तमपि कविभिः काव्यवस्तुत्वेन पर्यग्राहि।

महाचरित्रस्य अभावे हि कवयः स्वाश्रयदातृषु, कविकल्पनासु च निर्भरास्सञ्जाताः।

(उ) नायकः

चम्पूकाव्यनायकेषु देवताः, गन्धर्वाः, राजानः, ऋषयः, मुनयः, पण्डिताः, आचार्याः, श्रेष्ठिनः एवं समस्तवर्गानां जातीनां च पुरुषाः आसन्। केषुचिच्चम्पूकाव्येषु प्रतिनायका अपि सन्ति। कुत्रचिन्न सन्ति। यथा—

नायकः	काव्यम्
देवता	स्थानीयकाव्यानि
गन्धर्व :	विश्वगुणादर्शगङ्गाचम्पूकाव्ये
राजा	पौराणिक-ऐतिहासिकचम्पूकाव्यानि।
विद्वान्	नाथमुनिविजयचम्पूः
आचार्यः	आचार्यविजयचम्पूः
जागीदार	चन्द्रशेखरचम्पूः
जमीनदार	विक्रमसेनचम्पूः

श्रेष्ठः	चित्रचम्पूः, श्रीकृष्णचम्पूः
प्रतिनायकः	माधवचम्पूः
ऋषि-मुनिः	श्रीनिवासमुनियात्राविलासचम्पूः

नायकेषु देवतास्तु स्वपौराणिकमहत्त्वं तु स्थापयन्त्येव। अवशिष्टनायकेषु धीरोदात्तधीरप्रशान्तस्वरूपिणो नायका एव प्रचुरतया चित्रिता दृश्यन्ते। यतो हि सन्तचरित्रकथासम्बद्धकाव्यनायकास्तु धीरप्रशान्ता एव भवेयुः। कुत्रचित् धीरललितस्य गुणानां सन्निवेशः धीरोदात्तनायकेष्वेव चित्रिता दृश्यते।

नायकादिपात्रादतिरिच्य अन्यान्यपात्राण्यपि आदेवासुरेभ्यः सामान्यश्रेणीं यावत् समायोजितानि सन्ति। यथा – विरूपाक्षवसन्तोत्सवचम्पूकाव्ये पण्डा-पूजारी-लोभीब्राह्मणादीनां पात्राणां सन्निवेशः कृतो विद्यते। वैकुण्ठविजयचम्पूकाव्ये पशुपक्ष्यादीनां च पात्राणि संरचितानि सन्ति। अपूर्णे नलचम्पूकाव्ये 63 संख्याकानि पात्राणि उपलभ्यन्ते। तत्र 33 संख्याकानि पुरुषपात्राणि, 29 संख्याकानि स्त्रीपात्राणि, एकं किन्नरमिथुनपात्रं च संग्रथितानि वर्तन्ते। एतावत्सु पात्रेषु, तेषां चरित्रेषु च, तेषां पात्राणां विकासे ध्यानं दत्वा काव्यरचना कदाचित् महत् क्लेशदायकं कर्म भवति।

(ऊ) नायिका

राजकन्यायाः, भिल्लुकन्यां यावत् चम्पूकाव्येषु नायिकारूपेण निरूपिताः तत्तत्कविभिः। कानिचन चम्पूकाव्यानि नायिकाविहीनान्यपि निबद्धानि सन्ति। परिणयात्मककथासम्बद्धकाव्येषु तु नायिकायाः उपस्थितिः अनिवार्या एव भवति।

प्रायः चम्पूकाराणां दृष्टिः प्रधानतया नायिकानायकादीनां चरित्रग्रथने एव केन्द्रिता अस्ति। अवशिष्टपात्राणि तु केवलं साधनत्वेन सम्पन्नानि।[१]

कानिचिच्चम्पूकाव्यानि एकादधिकनायकपात्रोपेतानि सन्ति। यथा-चोलचम्पूः। एकस्यैव वंशस्य बहुव्यक्तीनां चरितं वर्णितं वर्त्तते। जैनाचार्यविजयचम्पूकाव्ये जैनसम्प्रदायिनां विविधाचार्याणां वर्णनं कृतमस्ति।

(ऋ) रसः

चम्पूकाव्येषु मुख्यो रसः श्रृङ्गारः। यतः परिणयात्मककथासम्बद्धकाव्यानां बाहुल्यात्। ततो वीररसः। अन्येषां रसानां च प्रयोगः यथास्थानं विहितो दृश्यते। रसवर्णनकुशलतासम्पादनाय अधिकांशैः कविभिः क्रमशः एकस्य रसस्य स्थाने बहूनां रसानां प्रयोगः अकारि।

---

१. चन्द्रशेखर पाण्डेय-संस्कृतसाहित्य की रूपरेखा पृ. सं. 401

प्रमुखसाहित्यविद्भिः प्रकाशितानि चम्पूकाव्यतत्वानि

संस्कृतसाहित्येतिहासकाराः चम्पूकाव्यानां कांश्चन विशेषताः सुष्ठु प्रत्यपादयन्। ता अत्र प्रस्तुतीक्रियन्ते।

(ॠ) गद्यपद्यमयी

गद्यपद्यमिश्रितं काव्यं चम्पूकाव्यमित्युच्यते।

"They use prose or verse indifferently for the same purpose."

The verses in these cases are either gnomic, or they serve to summarize the context of the story, as do the title verses of the Pancha Tantra, or occasionally they appear to lend greater effect to some point in the narrative as when a short speech is made in pointed form, or a specially important idea is thus underlined.

We have works written in the full kavya style in which the poet shows now his ability is prose and now in verses, without seeking to reserve verses for any special end.[१]

(ऌ) गद्यपद्ययोः प्रयोगमात्रा

चम्पूकाव्ये कियद् गद्यं, कियत्पद्यं भवेदित्यस्मिन् विषये निर्णयः नास्ति। भोलाशङ्करव्याासमहोदयः[२] अभिप्रैति यत् शनैः शनैः गद्यकाव्येषु पद्यानामन्तर्भवत्वमैधत। तत्पश्चात् चम्पूकाव्येषु पद्यभागस्य मात्रा गद्यभागादधिका समभवदिति।

(ॡ) पद्यप्रयोगस्योद्देश्यम्

(1) कथायाः संक्षिप्तीकरणाय, यस्य कस्यापि विशेषवर्ण्यांशाय, महत्त्वपूर्णभावप्रकटनाय, तद्भावविचाराय, अधिकप्रभावोत्पादकाय वा चम्पूकाव्येषु पद्यप्रयोगः भवति।

(2) अस्मिन् विषये S. N. दासगुप्ता महोदयः निरूपयति यत्—

"Who employ prose and verse indifferently." The verse is not always specially reserved as one would expect for an important idea, a poet description, an impressive speech, a pointed moral or a sentimental outburst, but we find that even for ordinary narrative and description, verse is as much pressed into serve as prose.

The subject is drawn from legendary sources, although in some later champus miscellaneous subjects find a place.

---

१. Barriedale keith. A. History of Sanskrit literature, 332.

२. संस्कृतकविदर्शन-पृ. सं.-516

The large number of champus that exist scarcely shows any special characteristic in matter and manner which is not already familiar to us from the regular metrical and prose kavyas.

The champus have niether the sinewy strength and efficiency of real prose, nor the weight and power of real poetry the form no doubt affords scope for versatility, but the champu written as a rule, has no orginal voice of his own.

(ए) वर्ण्यवस्तु

चम्पूकाव्यानां वर्ण्यवस्तुन: प्रधानस्रोत: पुराणानि अभवन्। तत: मिश्रितविषयेषु च काव्यानि विरचतानि। विषयेऽस्मिन् के चन्द्रशेखरन्[१] महोदय: प्रमाणयति यत्।

"It contains a free mingling of prose and verse is the course of a narration."

The puranas supplied them themes for champus.

भोलाशङ्करव्यासमहोदय:[२] स्पष्टयति यत्

''चम्पूकाव्यानां सम्बन्ध: शैल्या कियान् वर्त्तते, तावान् वस्तुना सह नास्ति'' इति।

(ऐ) रस:

चम्पूकाव्यानाम् अङ्गी रस: वीरशृङ्गारयोरन्यतर: भवेत्।

(ओ) कवीनामक्षमता

बाणादय: कवयो गद्यस्य यादृशीं शैलीं प्रास्तावयन् तत्परिवर्त्तिकवीनां तादृशी शैली दुस्साध्याऽऽसीत्। अत: गद्यस्य मध्ये पद्यान्यपि प्रावेश्य एकां नूतनां शैलीं समुपपादयन्। सा एव नूतना शैली चम्पूरिति।[३]

6. चम्पूकाव्यविभाग:

चम्पूकाव्यानि अल्पबृहत्कायानि सन्ति। नारायणविरचितं चम्पूकाव्यमल्प- कायत्वात् तदुच्छ्वासादिभि: न विभक्तम्। अन्यानि यानि बृहत्कायानि सन्ति तानि बहुभि: परिच्छेदै: विभक्तानि। चम्पूकाव्यकारै: एतेषां परिच्छेदानां विभाग: न केवलमुच्छ्वासै: अकारि, अपि तु स्वरुच्यनुसारं बहुप्रकारै: नामभि: विभाग: कृत:। यथा—

---

१. Sanskrit Literature, pp. 134. २. संस्कृतकविदर्शन पृ. सं. 516.

३. यथापूर्वम्–518

(अ) उच्छ्वासैर्विभक्तानि—

नल–पारिजातापहरण–नृसिंह–माधव–वीरभद्र–कुमारभार्गवीयशङ्करानन्द–अनिरुद्ध–गङ्गावतरणचम्पूप्रभृतीनि।

(आ) स्तबकैर्विभक्तानि—

भागवत–भारत–पुरुदेव–आचार्यविजय–आनन्दबृन्दावन–रामानुज–भागवत (चिदम्बरस्य)–नृसिंह–गोदापरिणय–धर्मविजय–दिव्यचापविजय–मारुतिविजय–आनन्दरङ्ग–श्रीनिवास–मानभूपालचरितचम्वादीनि।

(इ) आश्वासैर्विलसितानि—

यशस्तिलक–वसुचरित–यात्राप्रबन्ध–आनन्दकन्द–नीलकण्ठविजय–त्रिपुरविजय–द्रौपदीपरिणय–भोसलवंशावली–कृष्णविलास–शिवचरित्र–कुमारसम्भवचम्पूप्रभृतीनि।

(ई) उल्लासैरुल्लसितानि—

यतिराजविजय–काकुत्स्थविजय–नाथमुनिविजय–आनन्दकन्द–बाणासुरविजय–वीरभद्रविजय–दत्तात्रेय–मद्रकन्यापरिणय–शिवविलास–शङ्करचेतोविलास–चन्द्रशेखर–कुवलयाश्वविलास–कविमनोरञ्जकचम्पूप्रभृतीनि।

(उ) काण्डैर्खण्डितानि—

रामायण (भोजस्य)–वसन्तोत्सव (विरूपाक्ष)–युद्धकाण्डोत्तरकाण्डयो–राश्रितानि सर्वाणि रामायणसम्बद्धानि चम्पूकाव्यानि।

(ऊ) तरङ्गैरङ्कितानि—

विद्वन्मोदतरङ्गिणी–गौरीमायूरमाहात्म्य–मन्दारसौरभचम्पूकाव्यानि।

(ऋ) सर्गैः सर्जितानि—

भरतेश्वराभ्युदय–शालिवाहनकथा–बालभागवतकाव्यानि।

(ॠ) विलासैर्विलसितानि—

वरदाभ्युदय–रघुनाथविजयप्रभृतीनि चम्पूकाव्यानि।

(लृ) वर्ण्यविषयाधारेण विभक्तानि—

तत्त्वगुणादर्श–वैकुण्ठविजय–विश्वगुणादर्शादीनि चम्पूकाव्यानि।

(ॡ) लम्भकैर्विभक्तम्—

जीवन्धरचम्पूकाव्यम्।

(ए) कल्लोलैः कलितम्—

आचार्यदिग्विजयचम्पूकाव्यम्।

(ऐ) मनोरथैर्मण्डितम्—

भागीरथीचम्पूकाव्यम्।

(ओ) बिन्दुभिर्विरचितम्—

मन्दारमरन्दचम्पूकाव्यम्।

(औ) परिच्छेदैः प्रवर्त्तितम्—

रामचन्द्रचम्पूकाव्यम्।

(अं) परिच्छेदादिभिः न विभक्तानि—

नारायणेन विरचितानि चम्पूकाव्यानि, अन्यलघुचम्पूकाव्यानि च।

यद्यपि ''सोच्छ्वासा'' इति चम्पूकाव्यं उच्छ्वासैर्विभक्तं स्यादिति लक्षणं लक्षितं, तथापि स्वकाव्यपरिच्छेदानां नामकरणे चम्पूकाव्यकर्त्तारः स्वरुच्यनुसारं प्रवृत्त्य ''स्वतन्त्रः कविरिति'' वचनं प्रमाणीचक्रुः।

(अः) एवमेव—

रामायणसम्बद्धचम्पूकाव्यानि	–	36
महाभारतसम्बद्धचम्पूकाव्यानि	–	27
भागवतसम्बद्धचम्पूकाव्यानि	–	45
शिवपुराणसम्बद्धचम्पूकाव्यानि	–	18
विविधपुराणसम्बद्धचम्पूकाव्यानि	–	23
जैनपुराणसम्बद्धचम्पूकाव्यानि	–	6
ऐतिहासिक, सामान्यव्यक्तिसम्बद्धानि	–	48
यात्रासम्बद्धानि	–	13
स्थानीयदेवता तथा महोत्सवसम्बद्धानि	–	25
काल्पनिककथासम्बद्धानि चम्पूकाव्यानि	–	5

संस्कृतसाहित्ये प्रायः 245 संख्याकानि चम्पूकाव्यानि विरचितानि सन्ति। तत्र अधिकतया अर्थात् 175 संख्याकानि चम्पूकाव्यानि अप्रकाशितान्येव सन्ति।

II. कविपरिचयः

1. जन्मनिवासस्थानादयः

(अ) निवासस्थानम्-सुरपुरम्—

इदं पट्टणं रायचूरुमण्डले लिङ्गङ्गिसूगूरूमध्ये आसीत्। आदौ इदं मुख्यं पट्टणमप्यवर्त्तत। अधुना अस्य नाम 'लाकिनखेड' इत्यभवत्। कालान्तरे मैसूरुराज्ये अन्तर्गतमभवत्। अस्यैवापरं नाम 'गुरुगुण्ट' संस्थानमिति।

(आ) वाधूलवंशः—

अस्य वंशस्य मूलपुरुषः श्रीनिवासताताचार्यः। अस्य द्वौ पुत्रौ आस्ताम्। तौ अन्नय्यदीक्षितः, श्रीनिवासाचार्यश्च।

(A) अन्नय्यदीक्षितः—

अनेन ग्रन्थद्वयं व्यरचि। (1) गीतार्थसङ्ग्रहव्याख्या। (2) विरोधवरूथिनीप्रमाथिनी। अस्य प्रथमपुत्रः वेङ्कटाचार्यः। अयमुद्दण्डपण्डितः। श्लेषयमचक्रवर्ती च। अयं वेङ्कटाचार्यः अनेकान् पण्डितान् पीठाधिपतींश्च स्वकीयेन पाण्डित्यप्रकर्षेण विजित्य ''किरीटीत्युपाधिमलभत। अत एवास्य प्रसिद्धिः 'किरीटिवेङ्कटाचार्य' इत्यजायत। एषः 32 वर्षात्मके वयसि पञ्चत्वमगात्।

अनेन विरचिताः ग्रन्थाः—

1. अचलात्मजापरिणयः।
2. गदाधरीयखण्डनम्। (झंझामारुतम्)
3. दक्षावतारस्त्रोत्रम्
4. भावशतकम्
5. यतिराजदण्डकम्
6. रक्षिकमानसोल्लासभाणः
7. शुकाभिपतनम्

8. शृङ्गारतरङ्गिणी

9. शृङ्गारलहरी

10. हयग्रीवदण्डकम्।

(अ) किरीटिवेङ्कटाचार्यस्य भ्रातु:, अन्नय्यदीक्षितस्य द्वितीयपुत्रस्य अभिधानञ्च ''वेङ्काचार्य'' एव। अमुम् बुच्चिवेङ्कटाचार्य इति कथयन्ति। एष: चतु:शास्त्रपारीण:।

अनेन रचिता ग्रन्था:—

1. वेदान्तकारिकावलि:
2. अभिनवशृङ्गाररसमञ्जरी (भाण:)
3. कल्याणपुरन्दर:
4. शृङ्गारसर्वस्वम्

एष: गद्वालसंस्थानमलञ्चकार। पञ्चसप्ततिवर्षे वयसि पञ्चत्वङ्गत:।

(आ) अस्य पुत्र: तिरुमलबुक्कपट्टणश्रीनिवासाचार्य:। अस्य काल: 1862-1920 वर्त्तते। एष: मैसूरुमहाराजात् ''बालसरस्वतीत्युपाधिं समलभत। तत: नवद्वीपे स्थितान् अशेषान् पण्डितान् जित्वा ''तर्कतीर्थ'' इति प्रसिद्धिञ्चावाप। अयं मद्रास, कडप, बल्लारी, बनगानपल्ली इत्यादिषु स्थानेषु घण्टाशतकम् अकरोत्। तत्पश्चात् आत्मकूरु, अमरचिन्तसंस्थानयो: आस्थानपण्डितरूपेण अतिष्ठत्।

अस्य ग्रन्था:—

1. नञ्जराजचम्पू:
2. दुर्मदनिर्मथनम्
3. जाम्बवतीपरिणय:।
4. तत्त्वमार्त्ताण्डप्रभामण्डलम्
5. राजशेखरचरितम्
6. सुरपुरवेङ्कटगिरिचरितम्

(B) श्रीनिवासाचार्य:—

अयं श्रीनिवासताताचार्यस्य द्वितीय: पुत्र:। अन्नय्यदीक्षितस्य अनुजश्च। अनेन वेदवेदाङ्गेषु अपारपाण्डित्यमलाभि। 2400 श्लोकसंख्यात्मकस्य ''तत्त्वमार्ताण्ड'' इति ग्रन्थस्य रचयिता अयं संस्कृते बहून् ग्रन्थान् व्यलिखत्।

वंशावलिः

श्रीनिवासताताचार्यः

(a) अन्नय्यदीक्षितः

↓

(1) किरीटिवेङ्कटाचार्यः

↓

(2) बुच्चि वेङ्कटाचार्यः

↓

(3) तिरुमलबुक्कपट्टणश्रीनिवासाचार्यः

(b) श्रीनिवासाचार्यः

(इ) जनकः—

श्रीमत्कन्दालवंशाद्भुतकलशपयोराशिराकासुधांशुः
तर्कश्रुत्यन्तमीमांसकमततततधीः दृप्तदुर्वादिसिंहः।
एकैकौन्नत्यदीव्यत्तिरुमलतिलकाण्णार्यकारुण्यलब्ध-
श्रीभाष्यार्थः सुखं नः कलयतु जनकः श्रीनिवासार्यवर्यः॥[१]

वेङ्कटाचार्यस्य जनकः श्रीनिवासाचार्यः। सः कन्दालवंशांबुधिराका चन्द्रमाः। तर्के, मीमासायाम् अप्रतिहतबुद्धिः आसीत्। अपि च तिरुमलतिलकस्य अण्णय्यस्य कृपाविशेषेण प्राप्तश्रीभाष्यार्थः चाभवत्।

तथा च कन्दालान्वयकल्पद्रुमस्य कुसमश्रेणीभवत्कीर्तिः, स्वकाव्यामृत-धारया विद्वत्कर्णमधूलिकाद्भुतसुधश्चासीत्।[२]

(ई) गुरुपरम्परा—

कल्याणानि करोतु कोऽपि कुमतिव्रातान्धकारच्छटा
प्रत्यूषोदितवारिजप्रियसमप्रौढप्रभावाञ्चितः।
मादृग्भक्तचकोरमोदकलनाराकानिशानायको-
दञ्चच्छीतलचन्द्रिकासमकृपः श्री वेङ्कटेशो गुरुः॥
प्रपद्ये श्रीशेषाचलरमणघण्टावतरणं
प्रपन्नानां चिन्तामणिमतिदयालुं शमनिधिम्।
त्रयीचूडामार्गाम्बुजविभवमार्त्तण्डमनिशं
श्रितानां कल्पद्रुं कविकथककण्ठीरवगुरुम्॥[३]

---

१. बाणासुरविजये I – 11   २. तत्रैव I – 13.

३. तत्रैव I – 7, 8

(उ) भक्तिः—

जडमपि मां सज्जयते
पुरुषोत्तमपरमतत्त्वपरभक्तिः।
गिरिसारघनं स्थिरमपि
निभृतमयस्कान्तशक्तिरिव चलने॥[१]

मम पुरुषोत्तमस्योपरि परमतत्वभक्तिः परा या विद्यते सैव मन्दबुद्धिमपि मां काव्यरचनायज्ञे सज्जयते यथा अयस्कान्तशक्तिः स्थिरमपि गिरिं चालने समर्था भवेत्।

(ऊ) उपासना—

अत्युत्साहनटन्महानटजटाजूटाटवीसम्भ्रम-
द्गङ्गतुङ्गतरङ्गसङ्गरपटुप्रौढोक्तिकृद्वैभवा।
श्रीभर्त्तुः कुहनाहयस्य नितरां लोकत्रयोज्जीविनी
ह्येषा दोषविनाशिनी विजयतामास्माकजिह्वाञ्चले॥[२]
वाजिग्रीव! भवन्मुखाम्बुजगलल्लालासुधासेचनैः
वाणीं शोधय मामिकां नरपतिष्वङ्गेण भङ्गोचिताम्॥[३]
अपि च प्रत्येकमुल्लासस्य प्रारम्भे कविः हयग्रीवप्रार्थनामकरोत्।
यथा—

अमृतसदृशैर्वाजी वक्त्रे स देवशिखामणिः
नयनलसितैर्मेधां सिञ्चन्मदीयहृदम्बुजे।
सरसमृदुलां वाचं मोचारसायनसन्निभां
विशदयतु मे साक्षाल्लक्ष्यं प्रतिक्षणमीक्षणे॥[४]
हयवदनरदनकिरणैः
वदने मम सिञ्च नवसुधासारम्।
अखिलान्तरात्मभूत—
स्वाश्रितजनरक्षणदीक्ष! विभो!॥[५]

---

१. बा. वि. –I–15 २. तत्रैव I–2
३. तत्रैव I–16 ४. तत्रैव II–1
५. तत्रैव III–1

यत्केलीसदनायते श्रुतिवचश्चूडाद्वयीसन्ततिः
यद्भूमस्तुतिपद्यपाठककलामङ्गीकरोति स्मृतिः।
यत्कान्तिः सुरराजराजमुकुटादीनां शिरोभूषणं
तच्छ्रेयाद्धृदये हयाननपदाम्भोजं मदीये सदा॥[1]

विधत्तां मे प्रौढिं विशदविशदैर्वीक्षणलवैः
करैर्व्याख्यामुद्रां दधदखिलभद्रास्पदगतिः।
सुधांशोर्बिम्बेऽन्तः स्फटिकमणिसच्छायविलसत्—
प्रतीको लक्ष्मीवान् हयवदनरूपः स भगवान्॥[2]

चित्ताम्भोजे वसन् यः श्रितजनदुरितच्छेदबद्धादरस्सन्
व्याख्यामुद्रां विलासोल्लसितनिजकरव्यञ्जिताशेषगुप्तिः।
साक्षाद्द्रक्षासदृक्षोक्तिदविभवयुतः स्वाश्रितानां बुधानां
वक्त्रे वाजी स देवो वितरतु मम वाक्पूरकर्पूरलक्ष्मीम्॥[3]

उपरिनिर्दिष्टश्लोकानामाधारेण इदं वक्तुं शक्यते यत् कविरयं हयग्रीवोपासक इति, तस्यैव भगवतः अपारकृपाविशेषेणैव ग्रन्थरचनायां प्रवृत्तिरभूदिति॥

(ऋ) सम्प्रदायः—

कविः प्रथमोल्लासे रामानुजाचार्यं, तत्सम्प्रादयवैशिष्ट्यं च बहुधा प्रशशंस। यथा—

त्र्यय्यान्तार्णवमप्रमेयमनिशं सत्तर्कसङ्गाहित—
प्रौढाहीनगुणस्फुरन्मतिमहामन्थानसन्धानतः।
श्रीलाभाय विमथ्य तत्वसुधया रक्तान् बुधान् प्रीणयन्
नीयादक्षतशासनः क्षितितले रामानुजार्यो मुनिः॥[4]

अपि च कविरयं श्रीवैष्णवः इति, पञ्चरात्रसम्पदानुसारीति ज्ञायते। यथा—

''सान्तरालधवलोर्ध्वपुण्ड्रेण पाञ्चरात्रतन्त्रं व्याचिख्यासुरिव''।

अपि च—

''सन्ततानुवर्तितचरमश्लोकोऽपि तपस्विनामचरमश्लोकः''

---

१. बा. वि. IV–1 २. तत्रैव V–1
३. तत्रैव VI–1 ४. तत्रैव I–6

अत्र ''चरमश्लोक: भगवद्गीतायाम् सर्वधर्मान् परित्यज्य'' इति वैष्णवसम्प्रदायप्रसिद्धि:।

''अन्तर्यामितया पुरुषप्रवर्त्तनम्, अर्चारूपेण सकलदुरितहरणमाकलय्य पञ्चधावस्थितस्य श्वेतद्वीपवैकुण्ठादिवासरसिकस्य

पूर्णं दिव्यगुणैर्विहीनमखिलैर्हेयैस्समस्तात्मताम्
आपन्नं स्वशरीरभूतचिदचिद्वर्गं श्रिय: कामुकम्।''[1]

जीव-जगत्

चित्-अचित्

शरीरम्

(विष्णो:)

जीयाच्छेषधराधरेन्द्रमकुटीरत्नं श्रिय: कामुक:
जीयाद्भाष्यकृदुज्ज्वल: शुभगणे रामानुजस्संयमीट्।
जीयाद्वेदवतंसदेशिकगुरुस्सिद्धान्तचूडामणि:।
जीयादाहिमरश्मिताकरमिदं रामानुजीयं मतम्॥[2]

अनेन ज्ञायते यत् कवि: विशिष्टाद्वैतवेदान्तमतावलम्बी, रामानुजसम्प्रदायी इति।

(ॠ) रचनाशैली—

क्षोणीकर्णभवादिसत्कविपदाम्भोजे चरन्मानसा:
एकाक्षर्यतिचिन्तनश्रमपरान् गाम्भीर्यदूरस्थितान्
कृष्टद्वित्र (त्रि) पदान् मुधा कवयतो निर्गन्धिपुष्पायितान्
भञ्जं भञ्जमुदारकाव्यरचनाप्रौढौ प्रवर्त्तामहे॥[3]

वाल्मीक्यादिसत्कविचरणपङ्कजेषु चरद्हृद:, कुकविसमूहान्, गन्धरहितपुष्पाणीव अतिश्रमेण स्वकाव्यवाक्यानि प्रणेतृवत: भज्जन् स्वोदारप्रौढ काव्यरचनायां प्रवर्त्तामहे इति परोक्षतया कवि: स्वकाव्यरचनाशैलीं प्रकटयति।

अतो ज्ञायते यत् कवे: वेङ्कटाचार्यस्य काव्यरचना धाराप्रवाहवच्चलति। तथा शब्दार्थगाम्भीर्यसम्पन्ना च भवति। सुगन्धपुष्पवद्भवति। काव्यशैली अत्यन्तप्रौढा भवति।

(ॡ) रीति:—

न बन्धे पारुष्यं न च मधुरशब्दे कठिनता
समासा दीर्घापि त्रिवलिरुचिरस्निग्धमृदुला।

---

१. बा. वि. VI–17 २. तत्रैव VI – 45

३. तत्रैव I – 12

जगुर्वैदर्भीं यत्कनकरशनां केचन वयं

सकान्तिं गौडीयां मनसि नितरां निश्चिनुमहे ॥[१]

अत्र कवि: विदर्भराजपुत्रीं रुक्मिणीं वर्णयन् स्वरचनारीतिं प्रस्तौति। यथा—

केचन कवय: वैदर्भीरीतिमेव उत्तमा रीतिरिति मन्वते। वयं तु कान्तिगुण सहितां गोडीयामेव रीतिं मनसि नितरां स्वीकुर्म:। अत्र वैदर्भीशब्दस्य अर्थद्वयं विद्यते। विदर्भराजपुत्री इति एकोऽर्थ:। ''विदर्भादिषु दृष्टत्वात् तत्समाख्या''[२] वैदर्भी नाम रीति:। ''समग्रगुणा वैदर्भी'' समग्रैरोज: प्रसाद प्रमुखै: गुणैरुपेता वैदर्भी नाम रीति: इत्यन्योऽर्थ:।[३]

अस्पृष्टा दोषमात्राभि: समग्रगुणगुम्फिता।

विपञ्चीस्वरसौभाग्या वैदर्भीरीतिरिष्यते ॥[४]

गौडीया—

ओज: कान्तिमती गोडीया।[५]

ओज: कान्तिश्च विद्यते यस्यां सा ओज: कान्तिमती गौडीया नाम रीति:। माधुर्यसौकुमार्ययोरभावात् समासबहुला अत्युल्बणपदा च।

समस्तात्युद्भटपदामोज: कान्तिगुणान्विताम्।

गौडीयामिति गायन्ति रीतिं रीतिविचक्षणा:॥

ओज:—गाढबन्धत्वमोज:। बन्धस्य गाढत्वं यत् तदोज:।

कान्ति:—औज्ज्वल्यं कान्ति:।[६] बन्धस्य औज्ज्वल्यं नाम यदसौ कान्तिरिति।

(लृ) उद्धृता: ग्रन्था:—

भेदनिर्णयसार्थकीकृतटङ्कभेद्यता..............[७]

दीक्षितापहतकृतोद्योगाभिरिव मुखरुचै (च्यै) व विनापि चन्द्रालोकं कुवलयानन्दमादधानाभि:, अद्वैतसिद्धान्तसरणीभिरिव अधरमध्वहितसुधाभि: यतिपतिसिद्धान्तभङ्गीभिरिवाङ्गीकृतचन्द्रिकानिराकरणचटुलहसिताभि:, पूर्णप्रज्ञमतवैखरीभिरिव शेखरीकृताक्षोभ्यवचनदूरनिराकृतकामविद्यारण्य-कौतुकाभि:.........।[८]

---

१. बा. वि. I – 37

२. काव्यालङ्कारसूत्रवृत्तौ – II–10

३. तत्रैव – II –11

४. तत्रैव पृ. सं 18

५. तत्रैव—II-12

६. तत्रैव—III-1-5, 25

७. तत्रैव पृ. सं. 5

८. तत्रैव पृ. सं. 6

कविः द्वारकनगरस्य वर्णनावसारे तन्नगरस्थस्त्रीणां विविधविद्यावैशारद्यादि गुणान् अवर्णयत्। तदा कविः विविधकविविरचितानानेकग्रन्थान् विशिष्य द्वैताद्वैतविशिष्टाद्वैतसम्बद्धान् प्रास्तावयत्। यथा—

(अ) अप्पय्यदीक्षितः — चन्द्रलोकः, कुवलयानन्दः

(आ) मध्वाचार्यः — मध्वहितसुधा

— अद्वैतवेदान्तसरणिः, यतीन्द्रमतदीपिका, लघुचन्द्रिका

(इ) मध्वाचार्यः — पूर्णप्रज्ञः

शेखरम्

(ई) विद्यारण्यः

2. वैदुष्यप्रकर्षः

(अ) वेदविद्याविशारद्यम्

कविः वेङ्कटाचार्यः साङ्गोपाङ्गतया वेदाध्ययनमकरोत्। पुनश्च अष्टविकृतिषु उत्कृष्टपण्डितः। उपनिषद्ज्ञाने निष्णातः। यतो हि सन्दर्भानुसारं वेदमन्त्रान्, अष्टविकृतिपरामर्शं, वेदोपनिषत्प्रतिप्रादितविषयविमर्शं च विधाय स्वीयं वेदविद्यावैशारद्यं प्रकटयामास। यथा—

(1) ''वक्तुं यं मनसा विचेतुमपि वाऽशक्ताः स्फुरल्लोचनाः''।[१]

रुक्मिणी अमितभक्तसन्ततिसमुद्धारेण महोदारेण दारेण सालङ्कृता विराजते, तस्याः वैभवं वक्तुं, मनसि विचिन्तितुं वा शिव-भृगु-आदिशेषाः असमर्था अभूवन्निति कविः वर्णयन् ''यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह''[२] इति तैत्तरीयोपनिषद्वाक्यसारं मनसि भावयन्नेव उपर्युक्तभावगर्भितश्लोकं व्यरचयदिति अवगम्यते।

(2) तमो वेति श्रुत्या प्रकटनिजभावत्वमलका

त्मना वक्त्रस्येन्दो.......[३]

रुक्मिणीदेव्याः केशसौन्दर्यं वर्णयन् कविः, तस्याः केशानाम् अत्यन्तनैल्यत्वमाध्यमेन तमो वा इदमेकमास[४] इति श्रुतिवाक्येन प्रतिपादितं स्वीयास्तित्वं प्रकटयति'' इत्यवर्णयत्।

---

१. बा. वि. 1–26 २. 20–4–1

३. तत्रैव 1–39 ४. मैत्र्योपनिषत् 5–5

(3) सा हि श्रीरमृता सतां मनसि या पद्माक्षवक्ष:स्थले''[१]

पद्मभवप्रसू: पद्माक्षवक्ष:स्थले पद्मे लक्ष्मी: या वर्त्तते, सा त्रेतायुगे दशरथस्य स्नुषा, धरणिजा जानकी, सा एव पुन: द्वापरे वसुदेवपुत्रमहिला रुक्मिणी इति लक्ष्म्यवतारसन्दर्भं निगदन् ''सा हि श्रीरमृता सताम्। मा नो हिँसीज्जातवेदो गामश्वं पुरुषं जगदिति'' व्याचख्यन् स्वकीयं श्रुतिवाक्यसारमर्मज्ञत्वं कविराविश्चकार।

(4) ''पदक्रमलोकपूततया, जटानुबन्धदेदीप्यमानतया तथागतकथा-शतधारणजागरितो मूर्त्तिमान् वेद इव''[२]

(अष्टविकृतीनां-पद्क्रम, जटामालाशिखारेखादण्डध्वजरथघनादीनां विमर्शनं करोति।)

(5) 'पदे शीर्षे संख्यां दधदनलकल्पां दृशि तदा'[३]

विष्णो: विराट्स्वरूपं वर्णयन् कवि: ''सहस्रशीर्षा पुरुष:।
सहस्राक्ष: सहस्रपात्।[४] इति पुरुषसूक्तवाक्यार्थं स्पष्टयति।''

(6) ''वीर्यं विष्णोर्नुकमिति महाभारती सा पुराणी
यस्य प्राह क्षितितलरजस्तुल्यसंख्यानुबद्धम्।''[५]
''विष्णोर्नुकं वीर्याणि प्रवोचं य: पाथिवानिमिविममे रजाँसि''[६]

(7) ''योऽन्तस्सर्वचराचरो बहिरपि व्याप्य स्थित (:) कर्मणाम्''[७]
''अन्तर्बहिश्च तत्सर्वं व्याप्य नारायण: स्थित:।''[८]

(8) यज्ञो वै विष्णुरित्यादिभिरपि च तदेवाग्निरित्यागमाच्च''।[९]
यज्ञो वै विष्णुर्यज्ञमेवाकस्त्वन्नो विष्णो शर्म यच्छ सहन्त्य।[१०]
तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदुचन्द्रमा:।[११]

(9) ''सत्यं ज्ञानमनन्तमाद्यमखिलात्मानं खंवातानल-
क्षीरक्षोणिनिदानमुन्नतयतु: कोशान्तरावस्थितम्''[१२]
सत्यं ज्ञानमनन्तं ब्रह्म।[१३]

---

१. बा. वि. I–40
२. तत्रैव - पृ. सं. 25
३. तत्रैव VI–2
४. पुरुषसूक्ते 1, 2 वाक्यानि
५. बा. वि. VI–6
६. तै. सं. 1/2/13/9
७. बा. वि. VI–16
८. तै. उ. 4–11–25
९. बा. वि. VI–18
१०. तै. आ. 10–1–7
११. तै. उ. 4–2–7
१२. बा. वि. VI–19
१३. तै. उ. 2–1–1

पञ्चभूतानां अन्नमयादिचतुः कोशानां प्रस्तावोऽत्र दत्तः। आनन्दमयकोशस्य प्रस्तावः पृथक्तया दत्तः।

(10) ''तद्विष्णोः परमं पदं तव पदं तेऽमी वयं सूरयः।

पश्यामः सततम् ....[१]

''तद्विष्णोः परमं पदँ सदा पश्यन्ति सूरयः।

दिवीव चक्षुराततम्''। तद्विप्रासो विपन्यवो जागृहांसः समिन्धते विष्णोर्यत्परं पदम्।[२]

(आ) छन्दःशास्त्रप्रावीण्यम्

कविः सन्दर्भानुसारं, रसानुकूलञ्च विविधप्रकारकाणां छन्दसां प्रयोगे अतीव दक्षो भवति। यद्यपि शार्दूलविक्रीडिते यथेच्छं क्रीडितोऽयं कविः, तथापि न केवलं प्रसिद्धानां छन्दसां प्रयोगे किन्तु विरलछन्दसोऽपि स्वच्छन्दं प्रयुज्य छन्दःशास्त्राकारैः लक्षितानां लक्षणानां लक्ष्याणि प्रादर्शयत्।

छन्दसोऽनुसारं श्लोकसंख्या—

(अ) शार्दूलविक्रीडितम्—84

(आ) शिखरिणी—35

(इ) स्रग्धरा—25

(ई) मन्दाक्रान्ता—09

(उ) मालिनी—07

उपचित्र-नर्कुटक-मदलेखा-माणवक-रुक्मवती-कलिता-वैश्वदेवी-इत्यादिछन्दसां प्रयोगः पञ्चमोल्लासे कविः अकरोत्। यथा—

उपचित्रम्—

उपचित्रा नवमे परयुक्ते[३]।

द्विरदावलिमेघपरम्परां
समभिगम्य रराज मृथाङ्गणः।
सुकृपाणतटिल्लतिकायुतां
जलदकालसमानरुगुज्ज्वलः॥[४]

नर्कुटकम्—

हयदशभिर्नजौ भजजला गुरुर्नर्कुटकम्।[५]

---

१. बा. वि. VI–32
२. तै. उ.
३. वृ. र. II–36
४. बा. वि. V–41
५. वृ. र. III–98

यथा—

वदनसरोजहासमकरन्दझरीकलन-
प्रकटितरागहंसयुगसन्निभदीप्तियुतम्।
अपि च रराज चामरयुगं परितोऽभिपतत्-
सुरसरिदम्बुपूरकलितादि्भरिवैष हरिः॥[१]

ललिता—

धीरैरभाषि ललिता तभौ भरौ।[२]

उदा—

मलिनं चिकुरे मनोज्ञमक्ष्णोः
मधुरं वाचि महन्नितम्बदेशे।
मृदुलं पदयोर्महस्तदेतत्—
सततं नैव जगत्त्रये विभाति॥[३]

(इ) तर्कशास्त्रपाण्डित्यम्

तमो द्रव्यं नैल्यादिति हि यद्यभाषिष्ट भगवान्
तदेतत्सत्यं न स्फुरति नितरां जैमिनिमुनिः।
तमो वेति श्रुत्या प्रकटनिजभावत्वमलका-
त्मना वक्त्रस्येन्दोः प्रणयियदमुष्या विजयते॥[४]

कविः भगवत्याः रुक्मिण्याः केशसौन्दर्यं वर्णयन् प्रसिद्धं न्यायसिद्धान्तं समुदघोषयत्। यथा—

अन्नंभट्टः तर्कसंग्रहे द्रव्यविभजनावसरे ''तत्र द्रव्याणि। पृथिव्यप्तेजो-वाय्वाकाशकालदिगात्ममनांसि नवैव[५]'' इति प्रतिपादयन् द्रव्याणि नवैव' इति सिद्धान्तं न्यरूपयत्। तमेव सिद्धान्तमङ्गीकृतवता कविनाऽनेन तमसः दशम द्रव्यत्वेन प्रतिपादितवतः जैमिनिमहर्षेः वचनं स्पष्टतया तिरस्करोति। अपि च द्रव्याणि नवैवेति सिद्धान्तमङ्गीकरोति।

(ई) साहित्यशास्त्रपाण्डित्यम्

(1) काव्यनिर्माणशक्तिः—

न शक्तिर्नैपुण्यं न च सकललोकादिकलितं
न वा काव्यज्ञस्याद्भुतविततशिक्षागतिरपि॥[६]

---

१. बा. वि. V–17
२. वृ. र. III–59
३. बा. वि. III–8
४. तत्रैव–I–39.
५. तर्कसङ्ग्रहे–पृ. स. 4.
६. बा. वि. VI–43

अत्र कविः

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे॥

इति काव्यप्रकाशकारस्य मम्मटाचार्यस्य काव्यहेतुप्रतिपादनं समर्थयतीति ज्ञायते।

(2) सत्कविस्तुतिः कुकविनिन्दा—

कविः वेङ्कटाचार्यः स्वकाव्ये प्रथमोल्लासे सत्कविस्तुतिं, कुकविनिन्दां चाकरोत्। तस्मिन् सन्दर्भे वाल्मीक्यादीन् सत्कवीन् प्रास्तौत। तथैव कुकविनिन्दां प्राकटयत्। यथा— वाल्मीकिः

क्षोणीकर्णभवादिसत्कविपदाम्भोजे चरन्मानसाः
एकाक्षर्यतिचिन्तनश्रमपरान् गाम्भीर्यदूरस्थितीन्।
कृष्टद्वित्रिपदान् मुधा कवयतो निर्गन्धिपुष्पायितान्
भञ्जं भञ्जमुदारकाव्यरचनाप्रौढौ प्रवर्त्तामहे॥[१]

क्षोणीकर्णभवादिश्लोके क्षोणीकर्णः = वल्मीकः। तस्माद्भवः = वाल्मीकिः। आदिपदेन **व्यासभासकालिदासदयो** महाकवयः सङ्ग्रहीतव्याः। एते सर्वे सत्कवयः। कविनात्र **सत्कविप्रशंसा** विहिता। एवमेव एकाक्षर्यति......पुष्पायितान् इति कुकविनिन्दां व्यदधात्। **उदारकाव्यरचनाप्रौढौ** प्रवर्त्तामहे इति स्वकीयरचनासामर्थ्यञ्च प्राकाशयत्।

(3) रीतिः—

न बन्धे पारुष्यं न च मधुरशब्दे कठिनता
समासा दीर्घापि त्रिवलिरुचितस्निग्धमृदुता।
जगुर्वैदर्भीं यत्कनकरशनां केचन वयं
सकान्तिं गौडीयां मनसि नितरां निश्चिनुमहे॥[२]

"क्षणममलकाव्यकलाकलापपालापरसिकसह्रदयसवयोचननिचयपरिचयेन,......क्षणं रसालङ्कारध्वनिगुणदोषविवेचनचतुरमहाकाव्यपरिशीलनेन" (द्वितीयोल्लासः)

(उ) विशेषकवित्वपद्धतिः—

(अ) सहजतयाऽसम्बद्धाननेकान् भावान् एकस्मिन्नेव समासे निबन्धनेऽयं कविः **सिद्धहस्तः** इति प्रतीयते।

---

१. बा. वि. I–12 २. तत्रैव I–37

यथा—

'सहपर्वतपर्वतराजकुमारीरोषकषायितेक्षणप्रसरणकमप्यमानसुरतरङ्गिणीरभसस्रस्त-जटापटलभ्रश्यच्छर्वरीशकपित्थफलश्रमप्रसारितदीर्घशुण्डालसच्छुण्डालमण्डलीभीद्कारयोच्छि-द्यमानप्रतिभटहृदयसोदरतदीयकर्णस्वेददातिकारकपदातिसिंहनादद्विगुणितनिस्सा-रणरणितप्रतिष्ठापितशब्दब्रह्मविभुतामोमुदत्पतञ्चलिप्रकृतिकुण्डलिराजन्यसुखपारवश्यकलितसकल-

शिरश्चालनडोलायितेलासुमुत्क्षिप्तपयोनिधिपयःपूरनिमग्नचक्रवालशिखर-क्रीडत्किन्नरीस्वयं-ग्रहालिङ्गनसानन्दगन्धर्वयुवाभयदाननिपुणकलकलं..................''इति ।[१]

(आ) प्रसिद्धानां शब्दानां स्थाने पर्यायपदप्रयोगः कवेः वेङ्कटाचार्यस्य रचनारीतिरिति कविप्रयुक्तशब्दैः ज्ञायते। एतादृशशब्दप्रयोग एव कान्तिगुणसंयुत इति प्रसिद्धिः॥

यथा—

भूधरः	—	वसुधाधरः
भूमिः	—	इला
चक्रम्	—	रथचरणम्

---

१. बा. वि. V

III. काव्यपरिचयः

1. मातृकाविवरणम्

बाणासुरविजयचम्पूकाव्यस्य चतस्रः मातृकाः विद्यन्ते।

एका मातृका सर्वकारीयप्राच्यतालपत्रग्रन्थालयः (GOML), मद्रासमध्ये वर्तते। तस्याः विवरणमेवमस्ति।

(1) The New catalogus catalogorum, Valume-Thirteen-1991 PP. No. 254.

बाणासुरविजयचम्पूः—in 6 ullasas by venkatacharya, son of srinivasacharya of kandala family and disciple of varadacharya of Vadhulagotra.

MD–12319, MT 5660, Mysore pp. No. 266, (2 mss) Mysore, p. 254, sg – I – 43, Extr p. 77.

इयं मातृका ग्रन्थे ''म$_१$'' इति सङ्केताक्षरेण निर्दिष्टा वर्तते।

(2) मैसूरस्थ-प्राच्यतालपत्रग्रन्थालये तिस्रः मातृकाः सन्ति। तासां विवरणमेवं वर्त्तते।

Description catalogure of sanskrit manuscripts valume–VIII, university of Mysore–1982, PP. No. 266

(अ) अस्याः मातृकायाः क्रमसंख्या-27043. मातृकासंख्या P1865. ग्रन्थनाम-बाणासुरविजयः। रचयिता-वेङ्कटाचार्यः। मातृकेयं तालपत्रेषु वर्त्तते। तालपत्रसंख्या- 1-50, परिमाणः 46′×3.5′ एकस्मिन् पत्रे षट् पङ्क्तयः सन्ति। प्रत्येकं पङ्कतौ 70 संख्याकानि अक्षराणि सन्ति। मातृका सम्पूर्णतया वर्त्तते। परन्तु मातृकेयं कीटकदंष्टा, नष्टा च विद्यते। मातृकेयम् आन्ध्रलिप्यां वर्त्तते।

ग्रन्थे अस्याः मातृकायाः सङ्केताक्षरम् ''मै$_१$'' इति दत्तमस्ति।

(आ) अस्याः मातृकायाः क्रमसंख्या–E 27044. मातृका संख्या A–434, ग्रन्थस्य नाम-बाणासुरविजयः।

रचयिता-वेङ्कटाचार्यः। मातृकेयं कर्गजेषु (Paper) वर्त्तते। मातृकेयं कन्नडलिप्यां वर्त्तते। एकस्य पत्रस्य परिमाणः 20.6′×33′ आहत्य 110 संख्याकानि कर्गजानि सन्ति। एकैकस्मिन्

करगजे 22 संख्याकाः पङ्क्तयः, एकैकस्यां पङ्क्तौ 16 अक्षराणि सन्ति। मातृकेयं सम्पूर्णा वर्त्तते। इयं मातृका समीचीनतया वर्त्तते।

ग्रन्थे अस्याः मातृकायाः "मै२" इति सङ्केताक्षरं दत्तम्।

(इ) अस्याः मातृकायाः क्रमसंख्या 27045 मातृका संख्या A883, ग्रन्थनाम–बाणासुरविजयः, कविः–वेङ्कटाचार्यः। कर्गजेषु इयं मातृका देवनागरीलिप्यां वर्त्तते। मातृकायाः परिमाणः 21′ × 34′। एकस्मिन् पत्रे 21 संख्याकाः पङ्क्तयः, प्रत्येकं पङ्क्तौ 22 अक्षराणि च सन्ति। मातृकायां काव्यं सम्पूर्णमस्ति। मातृकायाः स्थितिः समीचीनाऽस्ति।

P. 254 433–बाणासुरविजयचम्पूः

Sl No. 27044. Beginning

श्रीलक्ष्मीकान्तनाभीकमलमधुझरालोलरोलम्बमाला–
झङ्कारस्सम्पदौघं दिशतु विधिचतुर्मुख्युदीर्ण सभानाम्।
तादाम्त्यं ख्यापयन् यः स्वरनिकरमयः पादपद्मानताना–
मिन्द्रेशानादिदेवप्रवरपरिषदां कामितार्थामरद्रुः।
कन्दालान्वयकल्पभूजकुसुमश्रेणीभवत्कीर्त्तिना
विद्वत्कर्णमधूलिकाद्भुतसुधाधारालसत्सूक्तिना।
श्रीवासार्यतनूभवेन विदुषा श्रीवेङ्कटाख्या युजा
कलृप्तो बाणजयाह्वयो विजयतामेषः प्रबन्धश्चिरम्॥


End.

हारीतान्वयशुक्तिमौक्तिकमणिः विद्यानिधिः सन्निधिः
वेदान्तार्यगुरुः सगर्वकथकेभाधीशकण्ठीरवः।
अस्मन्मानसपङ्कजातरसिकस्ताद्वावदूकाग्रणीः
अस्तोकाय शुभाय सूरिजनतामान्योऽण्णयार्यात्मजः॥

इति श्रीमद्वाधूलकुलकलशपाधोनिधिराकासुधाकरवेङ्कटाचार्येण कलिते बाणासुरविजयाह्वये चम्पूप्रबन्धे षष्ठोल्लासः॥

(अ) मूलमातृकानिर्णयः

सर्वासां चतसृणां मातृकाणां परिशीलनेन, प्राप्तपाठभेदानामाधारेण चेदं निश्चेतुं शक्यते यत् "मै१" मातृका मूलमातृकेति, तस्याः अन्यमातृकाः सम्भूता इति।



(आ) नामौचित्यम्

कविना स्वकाव्यस्य बाणासुरविजयः इति नामकरणमकारि। यद्यपि उषापरिणय-उषानिरुद्धपरिणयादिनामभिः चम्पूकाव्यानि मिलन्ति। कविरयमपि उषानिरुद्धयोः प्रणयादिविशेषान् अनेकान् व्यरचयत्। अतः उषानिरुद्धयोः नायिकानायकोर्नाम्ना स्वकाव्यस्य नामकरणं किमर्थं नाकरोदिति, बाणासुरविजयः इति नाम किमर्थमकरोदिति विषयः चिन्तनीयो वर्त्तते।

वस्तुतः कवेः लक्ष्यं-केवलं काव्यनिर्माणम् नेति प्रतिभाति। स्वकाव्यरचनामाध्यनेन रामानुजाचार्यस्य विशिष्टाद्वैमतस्य प्रचारः, हरिहरयोः मध्ये हरेः महत्त्वप्रकटनं, श्रीवैष्णवसम्प्रदायस्य गरिमायाः स्थापनम् इत्यादयो अंशाः लक्ष्यभूताः आसन्निति कविप्रणीतश्लोकैः, उपनिबद्धसन्दर्भैः, प्रयुक्तशब्दभावैः, प्रदर्शितोपनिषद्वाक्यप्रमाणैः चावगम्यते।

"बाणासुरविजयः" इति शीर्षकोऽयं तु कवेर्लक्ष्यं सम्पूर्णतया प्रतिफलति। फलति च। यतो हि बाणासुरस्य विजयः इति विग्रहवाक्ये क्रियमाणे सति बाणासुरः स्वपुत्रीमुषां परमात्मनः श्रीकृष्णस्य पौत्रायानिरुद्धाय प्रदाय विजयं प्राप।

द्वितीयतः बाणासुरः स्वस्मिन् स्थितात् शिववरप्रभावप्रभवात् अहङ्काराद् विजयं प्राप।

तृतीयतः बाणासुरः परमशिवभक्तः। तस्य विजयः कदाचित् शैवमतस्य एव विजयः, ततः स्वमतस्थापनमिति लक्ष्यसिद्धावपि विजयः इति सर्वं विचिन्त्यैव कविना स्वकाव्यस्य बाणासुरविजयः" इति यन्नाम दत्तं तदेव सर्वधा, सर्वथा औचित्यपूर्णमिति प्रतीयते।

(इ) कथावस्तु—

बाणासुरविजयचम्पूकाव्यस्य कथावस्तु श्रीमद्भागवतग्रन्थस्य दशमस्कन्धान्तर्गत-६१, ६२, ६३ अध्यायेभ्यः स्वीकृतम्।

राजोवाच— बाणस्य तनयामूषामुपयेमे यदूत्तमः।
तत्र युद्धमभूद्घोरं हरिशङ्करयोर्महत्॥
एतस्सर्वं महायोगिन्! समाख्यातुं त्वमर्हसि॥

(ई) **पात्राणां परिचयः—**

प्रद्युम्नः – रुक्मिणीश्रीकृष्णयोः पुत्रः।

अनिरुद्धः – रतेः प्रद्युम्नस्य पुत्रः।

उषा – बाणस्य पुत्री।

बाणः – बलेः ज्येष्ठपुत्रः।

कुम्भाण्डः – बाणस्य मन्त्री।

चित्ररेखा – कुम्भाण्डस्य पुत्री।

चित्ररेखा – उषायाः सखी।

कोटरा – बाणस्य माता।

श्रीकृष्णः, महेश्वरः, सात्यकिः, नारदः, पाराशरः।

चम्पूकाव्यमहत्त्वम्—

पद्यैः केवलतां गतैरलमलं गद्यैरपद्यैर्मनो
हृद्या सैव हि सूक्तिरेतदुभयारब्धा मया भाष्यते।
भूषावस्त्रगुणोज्ज्वलाऽपि ललना तारुण्यलावण्ययोः
योगादेव हि कामिनामतितरामानन्दकन्दायते ॥[१]

कविः चम्पूकाव्यस्य महत्त्वं प्रतिपादयन् "केवलतां गतैः पद्यैः, पद्यरहितैः गद्यैश्चालम्। अलम्। उभयविधसूक्तिरेव मनोहृद्या भवति। तस्मात्तामेवाहमारभम्। यथा अलङ्कारैः, पट्टवस्त्रैश्च प्रकाश्यमाना ललना तारुण्यलावण्ययोर्योगेनैव हि कामिनाम् अत्यन्तमानन्ददायिनी भवति।

2. कथासारः

प्रथमोल्लासः

श्रीलक्ष्मीकान्तनाभीकमलमधुझरी लोलरोलम्बमाला-
झङ्कारः सम्पदौघं दिशतु विधिचतुर्मुख्युदीर्णागमानाम्।
तादात्म्यं ख्यापयन् यः स्वरनिकरमयः पादपद्मानताना-
मिन्द्रेशानादिदेवप्रवरपरिषदां कामितार्थामरद्रुः॥

ततः कविः हयग्रीवस्य प्रार्थनां विधाय तस्यानुकम्पेन प्रौढोक्तिकृद्वैभवा स्वकीयजिह्वाञ्चले नितरां विजयतामिति प्रार्थयामास। अनन्तरं विष्णुं, मुकुन्दं, श्रीरङ्गक्षितिपतिं, रामानुजाचार्यं, गुरुं श्रीवेङ्कवेशं, प्रास्तौत। वरदाचार्यवर्यं, श्रीमत्कन्दालवंशाद्भुत-कलशपयोराशिराकासुधांशुं, जनकं श्रीनिवासायवर्यं च स्तुत्वा स्ववंशस्य परिचयमदात्।

---

१. बा. वि. I–17

स्वकाव्यरचनाशैलीं प्राकटयत्। ततः स्वकाव्यं 'बाणजयाह्वयः' चिरं विजयतामिति उदघोषयत्। पुनः हरिं संप्रार्थ्य, हे वाजिग्रीव! मामिकां वाणीं शोधय इति हयग्रीवं संप्रार्थयामास। ततः चम्पूलक्षणं ख्यापयन्—

पद्यैः केवलतां गतैरलमलं गद्यैरपद्यैर्मनो
हृद्या सैव हि सूक्तिरेतदुभयारब्धा मया भाष्यते।
भूषावस्त्रगुणोज्ज्वलापि ललना तारुण्यलावण्ययोः
योगादेव हि कामिनामतितरामानन्दकन्दायते॥ इति न्यरूपयत्॥

गद्यपद्योभया सूक्तिरेव हृद्येतिकृत्य अस्य ग्रन्थस्य आरम्भः कृतः इति न्यवेदयत्। ततः द्वारकानगरस्य, चन्द्रस्य च वर्णनमकरोत्। द्वारकाधीशं कंसादिहिंसाकलनप्रशंसां संसारशान्तेः विस्तारकं, पूतनामारणकारणास्यं, पूतनामानं, अनुगतागमान्तं कृष्णमनमत्। ततः अष्टाभिर्महिषीभिः इष्टकलने जुष्टं, कृपावीचिभिः, क्लिष्टानां नमतां च कष्टहरणे, पुष्टिप्रदाने च पटुं श्रीकृष्णमवर्णयत्। ततः सौन्दर्येऽनुपमां, सुधारसझरीपारम्परीसोदरीं रुक्मिणीं चावर्णयत्। यथा

सा हि श्रीरमृता सतां मनसि या पद्माक्षवक्षः स्थले
पद्मे पद्मभवप्रसूः श्रुतिशिरः सौधान्तरालेऽपि च।
याऽभूत् पङ्क्तिरथस्नुषा धरणिजा त्रेत्रागमे जानकी
विद्वांसो वसुदेवपुत्रमहिलां तां जानते द्वापरे॥

तथा अतिरमणीयश्रीरङ्गभूतया तनुलतया शृङ्गारिण्या त्रिभुवनमनोज्ञैः विलासैः उपगतः, अनेकाक्षोहिण्यधिपतिभिरासेव्यः सन् अब्जनयनः श्रीमत्सिंहासनमधिवसन् बभौ।

सरसवचनसीमां सत्यभामां भाषणैः, विहितविविधगाथां राधां वीक्षणैश्च, शौरिः तोषयामास।

एवं कतिपयेषु दिवसेषु नीतेषु सत्सु रुक्मिणी गर्भवती बभूव। तस्यामवस्थायां रुक्मिण्याः स्वरूपं कविना वर्णितम्।

अथ अखिलानुरागनिकेतनं, सर्वजगद्विमोहं, अखिलप्रतीकैः हरेः समानरूपम्, अदृष्टपूर्वातिशयमहामहः आविरासीत्। तस्मिन् समये द्वारकायां कल्पद्रुमसुमवृष्टिः पपात।

शिवनेत्राग्नौ, शलभतां गतस्य स्वसखिनः पुनर्जन्माऽभवत् इति महता संतोषेण नभस्वान् सर्वेषां वपुषि परागैः चन्दनरसं कलयन् नैजामोदं ववौ।

तस्य बालकस्य यथासमयं जातकर्मादिसंस्काराः शास्त्रोक्तरीत्या निर्वर्तिताः।

तदा शम्बराख्यो निशाचरः कश्चन, शिशुं समाधाय वारिपूरं वाराम्बुधौ प्रविश्य स्वगृहं ययौ। ततः तं महानसं फलाशनाय निनाय। तत्रत्या चेटी तं निजाङ्कं, नीत्वा मिषात्

कृतगोपनाऽभूत्। संवर्धितः स बालकः द्वारकां प्रापयत्। अदृष्टपूर्वमिवावलोकयन्तीं जननीं रुक्मिणीं पुनः पुनः प्रणामादिभिः आश्वस्तवान्। ततः नन्दकृपाणं व्रजसुन्दरीप्राणं प्राणंसीत्।

ततः कविः, स्ववंश-जन्म-जननी-जनक-गुरुपरम्परामवर्णयत्।

द्वितीयोल्लासः

अयमुल्लासः हयग्रीवप्रार्थनया समारब्धः। विनयवैभवेन विद्यैव महाराजभुजावलम्बन-वीरलक्ष्मीरिव तप्तकाञ्चनसङ्गमेन मणिरिव रत्या प्रद्युम्नः नानाविलासैः चिरकालं निनाय। तयोः शत्रुभयङ्करः, सद्गुणशोभितः, सुन्दरः शस्त्रास्त्रप्रयोक्ता, चतुरः पुत्रः आविरभूत्। स बाणेनापि अनिरुद्धः भविता इति ''अनिरुद्ध'' इति चक्रधारेण तस्य नामकरणमकारि। अयं राजा अनिरुद्धः सौन्दर्यपूर्णः स्वीयप्रतापजितशत्रुः कान्त्या सूर्यसमो विरराज।

अथ अनिरुद्धः किञ्चित्कालम् अस्त्रप्रयोगे, किञ्चित्कालं भव्यकलास्वादने, क्षणं विविधशास्त्रगोष्ठ्या, क्षणं संगीताभ्यासे, क्षणं नाट्याभ्यासे, विविधभाषाध्ययेन च शैशवं क्षणमिव अयापयत्। अयं यौवने प्रविश्यापि यौवन सहजां स्त्रैणाभिलाषां गुरुजनस्मरणेन दूरीकरोति स्म।

एकदा पराशरतपःफलरूपः, मूर्तिमान्, वेद इव प्रकाशमानः, तमो निराकरणाय कृतावतारेण सत्त्वगुणेनेव सान्तरालधवलोर्ध्वपुण्ड्रेण पाञ्चरात्रतन्त्रं व्याख्यातुमिच्छुक इव, कमलाक्षमालासितवक्षः स्थलः, तुलसीमणिमालिका-विशदवैराग्यः, सत्यवतीपुत्रः श्रीकृष्णं भगवन्तं नन्तुकामः किमपि रहस्यं वक्तुकामो द्वारकां प्राविशत्।

कञ्चक्यः कौतुकन आगत्य जयजयध्वानपूर्वकं महर्ष्यागमनं न्यवेदयन्। तदा श्रीकृष्णः सत्त्वरं सिंहासनात् उत्थाय वैराग्यशालां सज्जीकर्त्तुं परमभक्तं पवनव्याधिं नियुज्य सुरप्रमुखैः संसेव्यमानः, सात्यकिना निर्दिश्यमानमार्गः सन् च्छन्दोमयं ज्योतिरद्राक्षीत्।

मायामनुष्यः हरिः व्यासस्य पादौ शिरसा स्पृशन् तस्य गुणगणान् नुत्वा कुशलं पृष्ट्वा आगमनकारणमपृच्छत्। वैराग्यशालायां तं रत्नसिंहासने उपवेशयाञ्चकार। तदा व्यासः श्रीकृष्णस्य महिमां तस्य मत्स्यकूर्मवराह नृसिंहवामनपरशुरामश्रीरामावतारान् स्तुत्वा ''एवं त्वया दुष्टजननिर्मूलनं कृतमप्यधुना बाणनामकः राक्षसः पशुपतिवरात् अवध्यत्वं प्राप्य सहस्रभुजैः शोभितः, मदोन्मत्तः वशीकृतत्रिलोकं विजयते। तादृशात् राक्षसात् च्युतवैभवान् सुरान् त्वन्महिमया रक्षय'' इति व्यासः अप्रार्थयत्।

तदा श्रीकृष्णः ''मम माया बाणसुतामिषया उषाभिधानेन प्रादुर्भूता। सा यौवने तस्य दर्पनाशं करिष्यति'' इत्यवोचत्। तदा व्यासः माधववचनैः बाणं तृणसमं मत्वा हरिंगुणान् स्तुवन् निजाश्रामं जगाम।

तृतीयोल्लासः

उल्लासोऽयं भगवतो हयग्रीवस्य प्रार्थनया समारब्धोऽभवत्। अनन्तरं सकलर्त्तुशिखामणिं दिशान्तविश्रान्तरतिकान्तकीर्तिकान्ताकुन्तलान्तानतितान्तलतान्तायमानोदन्तदुरन्तवैभव-नितान्तकान्तं वसन्तम् अवर्णयत्।

तदनु शोणितुरे अतिबलो शतं पुत्रान् अलभत, बलिः। तस्य बलेः ज्येष्ठः पुत्रः, बाणः राक्षसकुलाधिपतिः, पुरारातेः अपारकरुणया प्राप्तमहिमा, सहस्रभुजैर्विलसितः प्राकाशयत्। बाणस्य लावण्यपुञ्जा, विशालनेत्रा सर्वासां स्त्रीणामलङ्कारशीला, एणाङ्कोदारवक्त्रा, मधुरवाक्, रतीशस्य सुखावगतिसाधन भूता उषाभिधाना कन्याऽभूत्।

कदाचित् सा परिहसनशीलोक्तिभिः सखीभिः सानन्दं मल्लीविरचित-शय्यामुपगताऽभूत्। तदा स्वप्ने भावि स्वरमणमुपादातुमिव निद्रामवाप।

स्वप्ने सा चिरत्नरत्नभूषणं, नूत्नवीर्यभीषणं, शुचिस्मितमुखं, लावण्यरत्नाकरं पुरुषम् अद्राक्षीत्।

तदा सा मौनमुपेत्य आनन्दबाष्पविसरेण अर्घ्यपाद्ये परिकल्प्य, अधरामृतेनाचमनं वितत्य, अनङ्गोज्जृम्भितसपुलकस्वेदझरेण स्तनकनककलशेन शुद्धामृताभिषेकम् आकलय्य, पर्यङ्कालङ्कारासनं प्रापय्य स्ववीक्षणैरेव अभ्यर्च्य प्रणयसारकालागरुधूमायमानैर्धूपयित्वा अपरिमिताम्बुधिमग्नेव तस्थौ।

तावत्स्वप्ने एव क्षणं विरामं प्राप्य अनुरागविह्वला सञ्जाता। ततः सा अनङ्गदष्टा भूत्वा मन्मथविकारचेष्टामाजगाम।

ततः तस्याः सख्यः मन्मथभुजङ्गदष्टां तामभिज्ञाय मल्लीसमाजैः तल्पमकल्पयन्। किं कर्त्तव्यतामूढतां च संप्राप्य स्तब्धदेहाः बभूवुः।

तत्रान्तरे कुम्भाण्डपुत्री चित्ररेखा कौतुक्यादागत्य स्मरशौर्यतप्ताम् अतिदीनचित्तां गम्भीरवचसा'' बाले! मौनेनालम्। गिरीशोऽपि अतनुशरहतः अभूत्। हे मुग्धे! तव मोहक्लुप्तावस्थां वचनैः विशदय''। सुदति! तव हृदयरक्तः त्रिलोके यत्र कुत्रापि भवेन्नाम तमधुना त्वदक्षिसात् करवाणि। उषे! अशेषपरिजनविशषे अनभिरुचिः किमर्थम् ? इति आललाप।

तदा बाणसुता उपात्तप्रज्ञा दीर्घं निःस्वस्य ''अलभ्यलाभमनोरथाऽहम्। विषयेऽस्मिन् मे वचोविस्तरवैभवः वृथा भवेत्। मया स्वप्ने सुन्दरेन्दुवदन; साक्षाद्रतीशाकृतिः, स्पष्टमनोज्ञभूषणगणः, विशालेक्षणः, स्त्रीणां मन्मथमन्मथः कश्चन युवा अदर्शि। प्राप्तमन्मथविकारा, दुःस्सहवेदनाऽहं केनाप्युपायेन त्वयैव रक्ष्या। तत्समागमं सम्पादयितुं च त्वमेवार्लमिति चित्ररेखायै विज्ञापयामास।

तदा स्वयोगविभवेन सा कलाभिज्ञप्रथमगणनीयवैभवा सद्य एव सुर-असुर-गन्धर्व-किन्नर-वासुकि-पृथिवीपालशिरोमणीन्, भगवन्तं वासुदेवं, तत्तनूजान्, साम्बप्रद्युम्नप्रमुखान्, चित्रे विलिख्य दर्शनामास। अपि च स्वकरकौशलं प्रकाशयितुमिव प्रद्युम्नतनूभवम् अनिरुद्धाभिधानमधिकदर्शनीयञ्चालीलिखत्।

तदा उषा तद्युवानं दृष्ट्वा मूर्च्छावस्थां प्राप। पुनः कथमपि लब्धसंज्ञा भूत्वा ''रक्षरक्षेति चित्ररेखायाः शरणमुपगता। तदभ्यन्तरे सकलकलासान्द्रः पूर्णचन्द्रः प्रादुरभूत्। ततः क्रमेण मुक्ताराजिरिव नभसि तारावलिरप्युल्ललास।

चित्ररेखा तु उषा प्राणरक्षणकृतसङ्कल्पा मनसि श्रीपतिं श्रीहरिं नत्वा तदैव द्वारकां गन्तुमियेष। मार्गे सा नानामृगैराकुलं विन्ध्यारण्यं प्राप्य, ततः द्वारकाञ्चागमत्। तावता चन्द्रः सान्द्रकिरणो भूत्वा व्योम्नाम्बुधौ अब्जवत् मध्यमवाप। ततः कन्दर्पसुतमनिरुद्धं करे गृहीत्वा स्वपुरं जगाम।

चतुर्थोल्लासः

अयमुल्लासः भगवतः हयग्रीवस्य प्रार्थनया आरब्धः। शोणितपुरे बाणसुता उषा, तपसा लभ्यः पञ्चबाणसुतः रत्नमये सौधे विविधव्यापारमाबिभ्रतुः। तदा चित्ररेखा अनिरुद्धाय उषामनोरथं प्राकाशयत्। ''विभो! चिरात्त्वयि मनोवृत्ती: साक्षाद्रतिसमानरूपाम् उषां पाणौ कलयतु। सर्वदा पुररक्षणमग्नः त्वमत्रैव चिरं वस'' इत्युक्त्वा सा चित्ररेखा निजसदनं जगाम।

ततः अद्भुतप्रायैः वयोरूपावन्ध्यतोपदेशदेशिकैः पार्वणचन्द्रकृष्णपक्षप्रथमादि-दिनन्निशाभिः एकरसस्य विक्रीतलोकत्रयकौतुकाभिः श्रुङ्गारचेष्टाभिः कतिपयान् वासरान् तौ उषानिरुद्धौ यापयामासतुः।

एवंस्थिते द्वारपालाः, उषायाः केनापि पुंसा योगमभूदिति ज्ञाताः। तद्विषयं महाराजाय बाणाय ज्ञापयितुं शङ्कनीयप्राणाः अभूवन्। ततः यथाकथञ्चित् लब्धधैर्याः बाणाय उषानिरुद्धयोः परस्परानुरागविषयिणीं वार्त्तां न्यवेदयन्। द्वारपालकानां विज्ञापनानुसारेण कश्चन अनिरुद्धनामानः भवनं प्रविशदिति कुटिलभ्रूवल्लिकासूचितब्रह्माण्डप्रलयः भुजकण्डूतिपरीहत-सकलमहीपालकोटकोटिः चक्षुषा रोषपयोधिपूरमभितः देशं किरन् सभामध्यतः तीव्रं निरगात्।

उषासदनं प्रविश्य तदङ्कोदयगिरिमारूढम् अनिरुद्धमद्राक्षीत्। दृष्ट्वा स रात्रिंचराधीशः सहस्रैः बाहुभिः योद्धुं सन्नद्धः। तयोर्मध्ये भयानकः सङ्ग्रामः समजायत। तस्मिन् बलितनयः अनिरुद्धं महाबलाशनास्त्रेण बद्ध्वा आसादयामास कारागारम्।

उषा तु शीर्णहृदया विरहमनुभवति। तदा चित्ररेखा साममृततुल्यैः सान्त्वनवचनैः संभावयामास। तदनन्तरं वर्षर्त्तुः वर्णितः। तदा देवमुनिः कलहभोजनः स्वयोगमहिमा-सात्कृतचतुर्दशभुवनभवनच्छन्दसञ्चरणः नारदः शारदनीरद इवान्तरिक्षदेशं द्वारकामाससाद।

यदूनां पतिः श्रीकृष्णः नारदं दृष्ट्वा रत्नसिंहासनादवरुह्य तस्मै भगवते नारदाय विविधोपचाराणि वितत्य, अभिवादनेन पादौ च संभाव्य कुशलप्रश्नान् पृष्ट्वा आगमनकारणमपि अपृच्छत्। पृष्टो नारदः ज्ञातमनिरुद्धवृत्तान्तं श्रीकृष्णम् उक्त्वा अपकृतसज्जनश्रमं बदरिकाश्रमं ययौ।

पञ्चमोल्लासः

परमपुरुषसिद्धान्तनिर्धारणध्वजाविव स्थितौ द्वौ वैतालिकौ बाणासुरराजधानीम् आसाद्य स्वोत्तरीयं ग्रन्थीकृत्य ''कावेतौ कुत आयातौ'' इति पृच्छते बाणाय ''वयं पुनः सकलचराचरशेखरस्य, परमपुरुषस्य, यादवभूपस्य दासानुदासौ तवाप्यपनयकालः समजनीति ज्ञापयितुमागतौ'' इत्युदीर्य पत्रिकार्थं विशदयाञ्चक्रतुः। विदितवासुदेवविषयकसङ्ग्रामः स बलिसूनुः कैलासवासिने शिवाय तपः कृत्वा तमप्रार्थयत् ''हे कैलासवास! श्रीप्रतिभञ्जनं कलयतः मम साहाय्यहेतुः भवानेव'' इति। तच्छ्रुत्वा सर्वज्ञशाली ईश्वरः ''अहं कैलासवासी क्व ? स च भगवान् यादवाधीश क्व ? एतन्न संगच्छति। त्वं दिव्यवैकुण्ठदेशं गत्वा तमेव शरणं यातु। तस्य विष्णोः प्रतापं त्वं न जानासि। यदि भवतः अपजयो भवति तर्हि ममाप्यपकीर्तिः भवेत्। अतः उषामनिरुद्धाय प्रदाय सुखं वस'' इति प्रत्यवदत्।

तदा ''ब्रह्माण्डमप्यन्यथायितुं दक्षे भवन्मूर्त्तौ मयि, कुतो नन्दनन्दनविजयावकाशः ? इत्यनुभाष्य, स्वपरिवारं नासीरम् अवतर'' इति शिवं व्यजिज्ञपत्।

तदानीं भवानीपतिः प्रमथगणैः सह, गणेशेन च, षण्मुखेन सह युद्धतलमध्यगच्छत्। विष्णुरपि सात्यकिना सह, यादवसैनिकैः सह, बलरामेन, साकं शोणितपुरं जगाम।

शोणितपुरी वासुदेवस्य सैन्येन दिग्विषयणी बभूव। बाणभटैरपि यमस्य नगरी इव दृष्टा। शिवसेनया सह विष्णुसेना युद्धमकरोत्। तस्मिन् युद्धे शिवसेना मूर्च्छिता जाता।

अनन्तरं वासुदेववामदेवयोर्मध्ये युद्धः समभवत्। शिवेन पाशुपतं प्रयुक्तम्। तदा कृष्णः तैजं जृम्भणास्त्रं शारङ्गधनुषः विमोचयामास। तदा पाशुपतास्त्रं जीर्णं जातम्। शिवोऽपि जृम्भणास्त्रेणाहतः भूमौ सम्प्रणिपत्य सिक्ताङ्गो भूत्वा मूर्च्छामवाप।

तदभ्यन्तरे सात्यकिना सह युद्धं समाचरन् बलिकुमारः बाणोऽपि पराजयं लेभे।

एवं स्थिते कोठरा नाम जरठा बाणजननी समरभूमिं समागता। कृष्णः तां दृष्ट्वा युद्धात् पराङ् मुखोऽभूत्। बाणासुरोऽपि जङ्घायां जवमादिशन् अतिभयोद्वेगं स्वगेहान्तरं प्राप।

षष्ठोल्लासः

उल्लासोऽयं हयग्रीवप्रार्थनया आरब्धः। ज्वरः शैवः मुरारातेः सेनां कलयितुं यम इव स्वतेजोभरैः पयोराशीन् कलयतः नानातोमरयष्टियुक्तः हरेः समीपं प्राप। तदा वागेशदिषु विवशतां प्राप्तेषु सत्सु तत्र रणे विष्णोः किमपि ज्योतिः जज्ञे।

अथ सुरगिरिसमौन्नत्यभाजोः तयोः मध्ये वाचामगोचरः सङ्ग्रामः जातः। तस्मिन् रणे शैवाः विवशात्माः भूत्वा कृपासिन्धोः पादाम्बुजविनताः भूत्वा ''हे यादवान्वयराकासुधाकर! यशोदापूर्वपुण्यौघपङ्केरुहदिवाकर! भक्तरक्षाकर! राजवशंशिरोमणे! इति प्रार्थयामासुः। तदा शिवोऽपि विष्णुपराक्रमाद्भीतः सन् विष्णुं ''हे शरणागतरक्षक! एनं बलितनयं बाणासुरं जहिहि। अयं मम भक्तः। अतः रक्षणीय एवेति प्रार्थयामास।

तदा कृष्णोऽपि हे पशूनां पते! त्वया यद्भाषितं तत्सत्यमेव। प्रह्लादस्यान्वये यो जनः प्राभवत् सः मे भक्तो भवति। मम भक्तः अवध्य एव। किन्तु बाणस्य दर्पहरणार्थमेव मयैवं कृतम् इत्युक्त्वा बाणमुद्दिश्य'' हे भक्त! त्वं गत्वा निरतिशयसौन्दर्यमदनं मम पौत्रमनिरुद्धनामानं तस्य दयितामुषां चात्र प्रापयतु इत्यकथयत्।

तदानीं बाणः अनिरुद्धं कारागारान् निगलबन्धनात् मोचयित्वा आत्मजामुषाञ्च संप्राप्य एकं रत्नमयरथं दिव्यवस्त्रजातं वितत्य, तौ उभौ तस्मिन् रथे अधिरोप्य भगवतो वासुदेवस्य सन्निधिमयासीत्।

कृष्णोऽपि तयोः आशर्वादं दत्वा जयजयनादयुक्तया यादवीयसेनया अनुगतः सन् द्वारकां प्रययौ।

अस्य उल्लासस्यान्ते कविः स्वपरिचयं, काव्यपरिचयं, स्वकाव्यरक्षण विषयकं विद्वज्जननिवेदनञ्चाकरोत् इति शम्॥

(अ) विशेषशब्दप्रयोगः

कविःकाव्ये यथासन्दर्भम् विशेषशब्दानां प्रयोगम् अकरोत्। स्थालीपुलाकन्यायेन केचन विशेषशब्दाः अत्र निर्दिश्यन्ते।

1. गोभिः — इन्द्रियैः
2. आपे — प्राप्तम्
3. अमरद्रुः — कल्पवृक्षः
4. जातकर्म — जातेष्टिः
5. इला — भूमिः

6. पवनव्याधिः	—	उद्धवः
7. अन्तरीपः	—	द्वीपः
8. सवनम्	—	यज्ञः
9. लपनः	—	मुखम्
10. दशलपनः	—	रावणः
11. कलशः	—	नदी
12. पुरुहूतसुतः	—	वाली
13. तरणिसुतः	—	सुग्रीवः
14. नाराचः	—	बाणः
15. धरणीसुरः	—	ब्राह्मणः
16. चुल्लभिषजम्	—	श्येनः
17. कलहोदरम्भरिः	—	नारदः
18. कलशः	—	पर्वतः
19. परिस्वेदः	—	परितः स्वेदः
20. एणाङ्कोदारवक्त्री	—	स्त्री
21. चन्द्रमुखी	—	स्त्री
22. पयोजाते	—	पद्मे
23. डिम्भराः	—	भ्रमराः
24. वलग्नम्	—	मध्यम्
25. हृदयम्	—	देहरम्
26. बलः	—	इन्द्रः
27. अग्निभूः	—	कुमारस्वामी
28. सरस्वत्	—	ध्वनिः
29. कण्ठीरवः	—	सिंहः
30. दिक्	—	हरितः
31. तम्बेरः	—	गजः
32. मण्डलाग्रम्	—	खड्गम्

33. व्यामिश्र:	—	सङ्गम:
34. कृपीटयोनि:	—	अग्नि:
35. वरूथिनी	—	सेना
36. वेतण्ड:	—	गज:
37. वसुधाधरेम्भ:	—	भूधरेभ्य:
38. सुधाशनगण:	—	देवगण:
39. स्वकं	—	मन:

(आ) शब्दचित्रम्—

अत्यादरवत्या स तु रत्या शुभगत्या
प्रत्याहितदीप्त्या सुरसत्येव सुदत्या।
भोगैरविभागैरनुरागैर्जुष्ट:
परिदृष्ट: परिपुष्टोऽन्वजनिष्ट ॥[१]

कवि: रतिप्रद्युम्नयो: नानाविलासवैखरीभि: विरहकालयापनं वर्णयन् मुक्तपदविन्यासाख्यां शब्दप्रयोगरीतिं प्रादर्शयत्। यथा—

"अलङ्कारवता स्वतारल्यभाजा, भा-जाल-भास्वता, स्वतातसमशुभवता, भवता पद्मरिमहिमवता, हिमवता समधैर्यसञ्चितसुखभुजा, भुजानुगतप्रतापश्रीमता, मतार्थवशंवदबलवता, लवतास्पदीकृतविभववारिजातेन, वारिजातकरेण कलयता चापं, चापन्नविपन्नपन्नगाशनेन तेन रति:........."[२]

कवि: वेङ्कटाचार्य: नूतनमार्गेणैकं श्लोकं व्यरचयत् यस्मिन् श्लोके पादचतुष्टयादिवर्णानां पठने अनिरुद्ध इति प्रतीयते। अक्षराणां प्रयोगोऽयं कवेरस्य वर्णप्रयोगचमत्कृतिमाविष्करोति। यथा—

अनर्घ्यसौन्दर्यघनप्रतीको
निजप्रतापौष्ण्यनिराकृतद्विट्।
रुचा स भास्वानिव चारुसंवि-
द्धरा सुरद्रुर्विवराज राजा ॥[३]

---

१. बा. वि. II–2 २. तत्रैव पृ. सं. 23

३. तत्रैव II–6

(इ) भावचित्रम्

कविरयं न केवलं सुन्दरशब्दपदप्रयोगे दक्षः, अपि तु विविधभावचित्रयुतानां, नर्मगर्भविचाराणां च प्रकटने सिद्धहस्तः इति तन्निबद्धश्लोक-गद्यांशानां परिशीलनेन प्रतीयते। यथा—

(1) क्षीणश्चन्द्रः पशुपतिरहो यत्र नूनं विषादी
जातिद्वेषः कुसुमसमये पादपाग्रे वियोगः।
दुर्वंशानां गिरिषु नितरां सम्भवो नैव यस्या-
माशासङ्गे यशसि न जनेष्वेवमुज्जृम्भते स्म॥

अत्र कविः क्षीणःविषादीत्यादिशब्दानां प्रयोगेण तत्तद्व्यक्तिषु विद्यमानानां धर्माणां च प्रतीतिं विदधाति।

क्षीणः = क्षीणत्वरूपो गुणः। धर्मवाचकः। अर्थात् क्षीणत्वगुणविशिष्टः चन्द्रः इत्यर्थः।
विषादी = विषादित्वरूपो गुणः। धर्मवाचकः। अर्थात् विषादित्वगुणविशिष्टः शिवः इत्यर्थः।
वियोगः = वीनां योगः। वीनां = पक्षिणां, योगः = सम्बन्धः।

(2) किं भूयः कथनेन तादृशमहोदारेण वाराशिजा
दारेणामितभक्तसन्ततिसमुद्धारेण सालङ्कृता।
वक्तुं य मनसा विचेतुमपि वाऽशक्ताः स्फुरल्लोचनाः
फाले पादतले श्रुतौ श्रुतिशिरः प्रत्यग्रचूडामणिः॥

कविना योगिन्याः महत्त्ववर्णने सर्वे असमर्था अभूवन्निति कथनाय येषां शब्दानां प्रयोगः अकारि, तेन शब्दप्रयोगेण कवेः भावचित्रनैपुण्यं स्पष्टतया सहृदयहृदयान् स्पृशति। सन्दर्भेऽस्मिन् कविः "यतो वाचो निवर्त्तन्ते। अप्राप्य मनसा सह" इति तैतरीयश्रुतेः भावं समुल्लिख्य भावसैन्दर्यं द्विगुणीचकार।

अपि च स्पुरल्लोचना अपि अशक्ता अभुवन्। के ते स्फुरल्लोचना इति वर्णयन्—

(अ) फाले स्फुरल्लोचनः — शिवः।
(आ) पादतले स्फुरल्लोचनः — गौतमः, भृगुः।
(इ) श्रुतौ स्फुरल्लोचनः — आदिशेषः। (सर्पत्वात्)

(3) चित्रं नैतदुपेत्य कृष्णमनिशं दीप्तप्रभावोऽर्जुनः
कृष्णां रक्ततमां करोति न गुणं स्वीयं जहातीति यत्।
भूयः कृष्णयशः सुधानुकलिता कर्पूरधूलीरुचं
धत्ते चित्रमिदं निशा हिमकरे रागं च तत्याज यत्॥

रात्रिः चन्द्रे अनुरक्ता भवति। यदा श्रीकृष्णस्य यशः चन्द्रमसोऽपि धवलं जातं तदा रात्रिः चन्द्रे रागं = अनुरागं तत्याजेति भावः।

(ई) वर्णनाचातुर्यम्—

"लोकोत्तरवस्तुवर्णनानिपुणः कविः" इति वाक्यं प्रमाणयन् अयं कविः अभूतवस्तुनां, अद्भुतसौन्दर्यसन्दर्भानां वर्णने स्वाप्रतिहतगतिं प्रदर्शयति। विशिष्य तत्तत्सन्दर्भानुरूपशब्दप्रयोगे, अपूर्वभावप्रकटने चायमतीव निष्णातः। सूर्यास्तमयचन्द्रोदयवर्णनमेकत्रैव एकदैव कुर्वताऽनेन कविना प्रयुक्तशब्दराशिः, अर्थप्रकर्षः वर्णनाचातुर्यं च नितरां सहृदयहृदयानां हृत्सु हर्षं, प्रकर्षेण जनयिष्यन्तीत्यत्र नास्ति संशयलेशः। स्थालीपुलाकन्यायेनात्र उदाहरणं दीयते।

नीलोत्तुङ्गसुदीर्घबाहुयुगलीदत्तावकोशौ शिरः
कोटीरान्तरितस्थितां कलयतो यस्याब्जचक्रेश्वरौ।
एकान्तास्तमयोदयोन्मुखनिशानाथाम्बुजातेशयोः
शोभां पश्चिमपूर्ववार्थिगतयोः स्वर्णाद्रिमालम्बतोः॥

(उ) लोकोक्तयः—

1. गिरिसारघनं स्थिरमपि निभृतमयस्कान्तशक्तिरिव चलने सज्जयते। (I–15)
2. वसन्ते वृष्टिश्चेत् फलति यदि मुक्तामणिगणः। (I–38)
3. यद्यभ्राम्बुजलाभदीक्षिततपाः जायेत वन्ध्यासुतः। (II–24)
4. कुटिलजनता प्रायः कालानुचिन्तनतत्परा। (II–8)
5. नो चेत्सर्वेऽपि सर्वं स्वहृदयविषयं स्वानुरूपं भजेरन्। (II–20)
6. मदोन्मत्तः केनाप्यपरिहृतभाग्यो विजयते। (II–28)
7. दृढे ध्वान्ते लोकं कबलयति खद्योतततयो
   यतेरन् किं काष्ठानिचयविशदीकारविभवे। (III–25)
8. विषैर्मिश्रं शाल्यौदनमिव दुरापं खलु नृपाम्। (IV–5)
9. जामातुर्दशमग्रहत्वमुचितीकुर्वन् जयानासुरम्। (IV–27)
10. पथिकमनोविदारणकृते क्रकचावलिरिव। (IV–34)

11. मार्त्तण्डस्य तमोनिरोधहरणे दत्ताहरः केवलं

खद्योतो निजपुच्छदीप्तिमधिकां कुर्वन् सदृक्षो हि नः। (IV–42)

12. अन्यूनापरिमेयवारिकलितेऽप्यब्धौ जडो वारिदः।

किं नो वर्षति तद्गृहीतमुदकम्............। (IV–43)

13. पीयूषे कटुता कदापि जनिता चित्रं न तत्केवलं

क्ष्वेलो यन्मधुरः करोति सुमनोहर्षं तदेवोन्नतम्। (IV–44)

14. माधुर्यामृतसारपूरितमहापुण्ड्रेक्षुदण्डे यथा

पुष्पं सर्वरसापहारि विमलस्थूलाढ्यमुक्ताफले। (V–3)

15. सिक्ताङ्गः कुलिशाहतो गिरिरिव प्रज्ञां न लेभे तदा। (V–9)

16. सन्देहेन समं विषद्रुनिचयं तत्क्षणः कुठारो यथा। (V–58)

(ऊ) भगवतः अवतारवर्णनम्—

कविः द्वितीयोल्लासे भगवतः परब्रह्मणः महत्त्वं ख्यापयन् परब्रह्मणा शिष्टजनसंरक्षणाय, दुष्टजनशिक्षणाय च स्वीकृतानामवताराणां वर्णनमकरोत्। तत्र मत्स्य–कूर्म–वराह–नृंसिह–वामन–परशुराम–रामावतारानवर्णयत्।

यथा—

मत्स्यः—

सनातनझषात्मना सकलवेदहर्त्रा त्वया
हतः खलु स सोमकाभिधनिशाचरो वारिधौ।
तदादि वसुधासुधाशनगणस्य जीवातवे
श्रुतिः प्रभवति प्रभो! मुरहराम्बुजातेक्षण!॥[१]

कूर्मः—

देवान् जीवयितुं निशाचरगणान् हन्तुं पयोधेर्यशो
दातुं सज्जनरञ्जनं कलयितुं कौर्मं शरीरं वहन्।
इन्द्रं सार्थकनामधेयमतनोदन्तावलेन्द्रादिभिः
स्वामिन्नाश्रितरक्षणक्षमदयाधौरेय! पद्मेक्षण!॥[२]

---

१. बा. वि. II – 19 २. तत्रैव II – 20

वराहः—

लक्ष्मीसन्ततसङ्गतिप्रविलसत्क्रोडाय सर्वोन्नत-
क्रीडाय क्षपितारयेऽस्तु कुहनाक्रोडाय ते मङ्गलम्।
दंष्ट्रादीप्रवसुन्धराय सकलक्षेमावलम्बायते
तादृक्पालितसिन्धुराय जगदाधारास्फुरद्भक्तये ॥[१]

नृसिंहः—

स्तम्भाद्योऽवततार निष्ठुरनखज्वालाकरालाकृतिः
वक्षः संक्षपयन् हिरण्यकशिपोर्जिष्णुं परं प्रीणयन्।
लोकावग्रहभञ्जनञ्च कलयन् शिष्टाद्यसंस्थापनं
प्रह्लादं च नयन्त्स एव कुहनापञ्चाननात्मा भवान् ॥[२]

वामनः—

यत्पादाम्बुझरी मृडस्य मकुटे मन्दारमालायिता
लोकानद्य पुनाति पापकलुषान्मुक्तिं प्रयच्छत्यपि।
तस्याहं कुहनावटोर्बलिशिरः कोटीरचूडामणी—
भूतात्माङ्घ्रिनखद्युतो(ते) स्तव पदद्वन्दं सदा भावये ॥[३]

परशुरामः—

यद्दोः स्तम्भविजृम्भमाणपरशुस्वर्भानुरप्युन्नतं
दृप्यन्मानसराजमण्डलमलं क्रूरः क्षणादग्रसत्।
भूयोदिग्वनितापयोधरतटीकह्लारमालोपम-
स्फायद्दिव्यपराक्रमः स च भवेत्तेजोविशेषो न किम् ? ॥[४]

(ऋ) रसपोषणम्—

कविः वेङ्कटाचार्यः सन्दर्भानुसारं रसपोषणे समर्थ इति प्रतीयते। चम्पूकाव्ये प्रधानरसं शृङ्गारश्सं पोषयन्नेव, अन्येषां वीरादिरसानां च पोषणं सम्यक्तया चकार।

1. शृङ्गारः—

स्तनौ तुङ्गौ नाभीगहनगहनश्रीर्मुखविधुः
गभीरस्तन्व्यङ्ग्या विपुलविपले लोचनपुटे।

---

१. बा. वि. II–23　　२. तत्रैव II–24

३. तत्रैव II – 21　　४. तत्रैव II–22

नितम्बश्चेद्द्रुद्रस्तदपि च वलग्नेन किमु वा
तपस्तप्तं क्षीणं गुरुतरभराक्रान्तमपि च ॥[१]

अपि च—

सङ्कोचं गमिता तनुः करयुगी वक्षोजयुग्मे तथा
नीवीबन्धनगोपने प्रियदृशोर्भूयः पिधानेऽपि च।
शान्ता नैजदृशोस्तथा श्रवणयोर्मध्येऽभजत्सङ्गमं
तत्कालोचितचाटुचेष्टितपरे कान्ते सुखं चुम्बति ॥[२]

2. करुणः—

सुतनुरतनुमोदाद्वीक्ष्य कान्तं युवानं
स्मरशरविहितेव प्राप मूर्च्छामवस्थाम्।
कथमपि पुनरेषा लब्धसंज्ञा सखी तां
शरणमुपगताऽभूद्रक्ष रक्षेति साध्वी ॥[३]

3. रौद्रः—

(1) श्रुत्वा रोषपयोधिपूरमभितो देशं किंरश्चश्रुषा
रक्ताम्भोरुहसन्निभेन निरगात्तीव्रं सभामध्यतः।[४]

(2) अम्बुधिरिव तरङ्गमालिकाभिः, फणीन्द्र इव फणासहस्रैः बाहापालिकाभिः उल्लसितः प्रकाशयितुमिवाश्रितकुटिलभावया भ्रूलतया भीत सकलपरिचारिकजनः, निष्ठुरविन्यासत्वङ्गधरणीभारभुग्न..........[५]

4. वीरः—

बाणानिरुद्धयोः मुष्टियुद्धवर्णनावसरे—

(1) दृष्ट्वा तं तनयाङ्कक्लृप्तशयनं रोषात्स रात्रिंचरा
धीरा पञ्चशतेन मुष्टिभिरलं संक्षोभयामास तम्।
सोऽप्युत्थाय रुषैकयैवं (व) भुजया तादृग्बलोपेतया

(2) केशाकेशि मृथे तयोर्बलवतो बाणानिरुद्धाभिधा-
भाजोर्विस्मयपूरमग्नविबुधाधीशो (शे) प्रवृत्ते सति ॥[६]

एवं—नीलाम्बरपीताम्बरयोः युद्धवर्णनेऽपि कविना वीररसस्य वर्णनमकारि।[७]

---

१. बा. वि-III–15
२. तत्रैव IV–12
३. तत्रैव III–33
४. तत्रैव-पृ. सं. 44
५. तत्रैव-पृ. सं. 62
६. तत्रैव-IV–27, 28
७. तत्रैव V–58, 59

5. भयानकः—

कुम्भाण्डः कूपकर्णौ विपुलरथगतौ तावुभौ सीरपाणेः
नासीरे शस्त्रपातैर्विदलितवपुषौ शेषरक्ताक्षिकोणौ।
सैन्यं सम्प्राप्तदैन्यं सपदि कलयतो दिव्यशस्त्रास्त्रविद्या-
वैशद्याद्रक्तनद्याकलनकृतभयात्तत्र धानुष्कवत्या॥[१]

6. बीभत्सः—

वायव्यं पार्वतेनानिलमयमखिलं वारुणेनासुरं तत्।
माहेन्द्रेणान्धकारं दिनकरशरतस्साधु चिच्छेद छन्वी।
कालिन्दी भेदनोऽसौ तदनु मुसलयतस्तत्तुरङ्गाश्च सूतौ।
सैन्यं चाक्षोहिणीतस्समधिकमतनोन्याममात्रावशेषम्॥
कुम्भाण्डे लूनकाण्डे निशितशरगणैः कूपकर्णौ विकीर्णे
बाणे भ्रश्यत्कृपाणे स्तुतिरवदृषितश्रीकुमारे कुमारे।
सैन्ये सम्प्राप्तदैन्ये मुरपुरहरयोर्द्वन्द्वयुद्धेऽनुनद्धे
जिष्णोरक्ष्णां सहस्रं सफलमिति सुरैस्संस्मृताऽभूत्प्रशंसा॥[२]

7. अद्भुतः—

(अ) (1) "साऽपि स्वयोगविभवसाक्षात्कृतचतुर्दशभुवनाकारं, कलाभिज्ञप्रथम-गणनीयवैभवा सद्य एव अपरिमितसौन्दर्यसिन्धून् सुरासुरबन्धून्.............चित्रे विलिख्य दर्शयामास"।[३]

(2) योगं कञ्चिदुपेत्य हृत्सरसिजे नत्वा हरिं श्रीपतिं
लब्ध्वा तत्कृपया बलं प्रतिभटप्रागल्भ्यदर्पायहम्।
सेयं गन्तुमियेष बाणतनयाप्राणप्रतिष्ठाकृते
कुम्भाण्डस्य कुमारिका सकुतुकाटोपा तदा द्वारकाम्॥

(3) आश्रित्य सा नूनमसह्यवेषम्
उषामनस्तोषकृते जगाम।[४]"

(4) विद्यावशात्सा क्षणमात्रमेव
सौधेषु कन्दर्पसुतं विचिन्त्य।

---

१. बा. वि. - V-44
२. तत्रैव-V-45, 46
३. तत्रैव - पृ. सं-49, 50
४. तत्रैव - पृ. सं.-51

मल्लीमिलन्मञ्चनिषण्णमेनं
करे गृहीत्वा स्वपुरं जगाम ॥

(आ) जज्ञे ज्योतिः किमपि विपुलं तत्र नारायणीयं
लिप्यामात्राज्ज्वलभवदृशास्तत्र विष्णोर्भविष्णोः ॥[१]

8. शान्तः—

किमागमनकारणं शमदमाभिरामाकृते
तपोधनकृपावनोज्ज्वलसुपावनोक्ते सदा।
किरीटतटकोरकीकृतभवदृशाज्ञे मयि
प्रकाशय वचः सुधाविलसितैः प्रसादोन्नतिम् ॥[२]

अपि च श्रीकृष्णस्य सम्मुखे व्यासस्य समानगमनं वर्णयन् कविः शान्तरसपोषणमकरोत्।

(ऋ) अलङ्कारविचारः—

शब्दालङ्काराणां प्रयोगे कवेरप्रतिहतगतिः सम्पूर्णकाव्ये प्रतीयते।

यथा—

(1) छेकानुप्रासः—

स्वरव्यञ्जनसंदोहव्यूहाः संदोहदोहदाः।
गौर्जगज्जाग्रदुत्सेकाच्छेकानुप्रासभासुरा ॥[३]

निटालदृग्जटाघटोत्कटालयोद्भटापगा-
स्फुटाङ्घ्रिक्लृप्तकालियस्फटाच्छटानुरक्तिनः।
निरीतिरीति यो धरां चरीकरोति सत्कृपा
झरीधुरीणमानसो वरीवरीति सज्जनान् ॥[४]

अत्र टकारस्य, 'री' इति अक्षरस्य च वारं वारमावृत्तेः छेकानुप्रासः।

(2) लाटानुप्रासः—

लाटानुप्रासभूभिन्नाभिप्राया पुनरुक्तता।
यत्र स्यान्न पुनः शत्रोः गर्जितं तर्जितं जितम् ॥[५]

---

१. बा.वि.-VI-4
२. तत्रैव-II-14
३. चन्द्रालाके-V मयूखे-श्लो.सं-2
४. बा. वि.-I-29
५. चन्द्रालोके-V- मयूखे श्लो. सं-४

रसवचन**सीमां** भाषणैः सत्यभामाम्
विहितविविध**गाथां** वीक्षणैश्चापि **राधाम्**।
अशिथिलमपरि**रम्भै**र्भोगिनैश्चापि **जृम्भन्**
मदनकदनगुम्भैस्तोषयामास शौरिः॥[१]

(3) स्फुटानुप्रासः—

श्लोकस्यार्थे तदर्थे वा
वर्णावृत्तिर्यदि ध्रुवा।
तदा मता मतिमतां
स्फुटानुप्रासता सताम्॥[२]
यः पूतनामारणकारणास्यः
यः पूतनामानुगतागमान्तः॥[३]

(4) वृत्त्यनुप्रासः—

आवृत्तवर्णसम्पूर्णं वृत्त्यनुप्रासवद्वचः।
अमन्दानन्दसंदोहस्वच्छन्दस्यन्दमन्दिरम्॥[४]

यथा—

अत्यादरवत्या स तु रत्या शुभगत्या
प्रत्याहितदीस्त्या सुरसत्येव सुदत्या।
भोगैरावभागैरनुरागैर्जुष्टः
परिदृष्टः परिपुष्टोऽन्वजनिष्टः (ष्ट)॥[५]

अपि च—

चक्रे चक्रधरोऽव्यवक्रमहिमोदग्रप्रतापक्रमः
नाम प्रेमरसं प्रकामसुमनस्तोमानुमत्युन्मुखम्
सारासारविचारधीरचतुराचारप्रचारः स्थिरः॥[६]

(5) अर्थानुप्रासः—

उपमेयोपमानादावर्थानुप्रास इष्यते।
चन्दनं खलु गोविन्दचरणद्वन्द्ववन्दनम्॥[७]

---

१. बा. वि-1-43
२. चन्द्रालोके-V-मयूखे श्लो. 5
३. बा. वि-I-30.
४. चन्द्रालोके-V-3
५. बा. वि-II-2
६. तत्रैव-II-5
७. चन्द्रालोके-V-6

यथा—

विचित्रमणिभूषणैः हृदयपोषणैर्भाषणैः
समस्तरमणीमनः कृतगवेषणैरीक्षणैः।
पुरःकमलकाननं विकचमल्लिकासन्ततिं
किरन्निव मनोहरन्निव चसर्प वामभ्रुवाम्॥[१]

(6) अर्थान्तरन्यासालङ्कारः—

उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः।[२]

यथा—

किं ब्रूमः सकलार्थतत्त्वकुशलज्ञानाय सर्वात्मने
किञ्चिज्ज्ञा वयमीश्वरेण किमु वा कार्यं त्वया यत्नतः।
मार्त्तण्डस्य तमोनिरोधहरणे दत्तादरः केवलं
खद्योतो निजपुच्छदीप्तमधिकां कुर्वन् सदृक्षो हि नः॥[३]

(7) लोकोक्त्यलङ्कारः—

लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते।
सहस्व कतिचिन्मासान् मीलयित्वा विलोचने॥[४]

यथा—

जङ्घायां जवमादिशन्नतिभयोद्योगं स्वगेहान्तरं
दीनः प्राप समस्तसैन्यविकलस्तादृङ् महावीर्यवान्॥[५]
अत्र ''जङ्घायां जवमादिशन्'' इति लोकवादानुकृतिः।

(8) श्रुत्यलङ्कारः[५]—

पदे शीर्ष संख्यां दधदनलकल्पां दृशि तदा
मुरारातेस्सेनामवि कलनयन् योजनशतं
प्रमाणास्यः......................[६]

अस्य श्रुतिप्रसिद्धं सहस्रसंख्याकशीर्ष-नयन-पदवर्णनेन नारायणस्य विराट्स्वरूपं वर्णितम्। अतः श्रुतिप्रतिपादितवस्तुवर्णनयाऽत्र श्रुत्यलङ्कारः।

---

१. बा. वि.-III-21
२. कुवलयानन्दे-90 पृ. सं.-174
३. बा. वि. IV-42
४. तत्रैव V-62
५. कुवलादनन्दे-अ. सं-113
६. बा. वि. VI-2

(ॡ) प्रकृतिवर्णनम्—

(1) चन्द्रोदयवर्णनम्—

"तावत्कुमुदिनीभुजङ्गः प्राचीहर्म्यगवाक्ष इव, रात्रिकृष्णकरकलितनवनीतगोलक इव..............सञ्जीवनमिव तिग्मकिरणतप्तभुवनस्य, आम्रेडितमिव मदनपराक्रमस्य, सकलकलासान्द्रः, पूर्णचन्द्रः प्रादुरभूत्"।[१]

(2) सूर्यास्तमयवर्णनम्—

"तावत् पद्मिनीवल्लभेऽ(भो)पि पश्चिमाचलशिखरसमुदित्वर-सरसीकृतस्थितिपद्मिनीमुखकमल..............स्वतनुरक्षणाय शरणं मन्वानो सुयोधन इवापरवारिनिधौ मज्जति"।[२]

(3) वसन्तर्त्तुवर्णनम्—

"अथ कदाचन सकलर्त्तुशिखामणिः प्रतिदिनोच्चतरगुलुच्छस्वच्छतया विपुलविपुलचकोरविलासतया......................................दिशान्तविश्रान्तरवि-कान्तकीर्त्तिकान्तकुन्तलान्तानतितान्तलतान्तायमानोदन्तदुरन्तवैभवनितान्तकान्तो वसन्तः प्रादुरासीत्"।[३]

(४) सूर्यास्तमय-चन्द्रोदयवर्णनम्—

नीलोत्तुङ्गसुदीर्घबाहुयुगलीदत्तावकोशौ शिरः
कोटीरान्तरितस्थिती कलयतो यस्याब्जचक्रेश्वरौ।
एकान्तास्तमयोदयोन्मुखनिशानाधा (थ) म्बुजातेशयोः
शोभां पश्चिमपूर्ववार्थिगतयोः स्वर्णाद्रिमालम्बतोः॥[४]

एवमेव कविः द्वारकानगर-राज-ऋषि-रात्रिवर्णनम् अकरोत्।

❑❑❑

---

१. बा. वि. पृ. सं-४०
२. तत्रैव-बा. वि. पृ. सं-३६
३. तत्रैव-पृ. सं-३९
४. तत्रैव-I-३२

श्रीरस्तु श्रीहयग्रीवाय नमः

बाणासुरविजयचम्पूः

प्रथमोल्लासः

श्रीलक्ष्मीकान्तनाभीकमलमधुझरीलोलरोलम्बमाला-
झङ्कारः सम्पदौघं दिशतु विधिचतुर्मुख्युदीर्णागमानाम्।
तादात्म्यं ख्यापयन् यस्स्वरनिकरमयः पादपद्मानताना-
मिन्द्रेशानादिदेवप्रवरपरिषदां कामितार्थामरद्रुः ॥ १ ॥

अत्युत्साहनटन् महानटजटाजूटाटवीसम्भ्रमद्-
गङ्गातुङ्गतरङ्गसङ्गरपटुप्रौढोक्तिकृद्वैभवा।
श्रीभर्त्तुः कुहनाहयस्य नितरां लोक[1]त्रयोज्जीविनी
ह्येषा दोष[2] विनाशिनी विजयतामास्माकजिह्वाञ्चले ॥ २ ॥

कृतनतमहाभूम्ने[3] सीम्ने प्रगल्भगुणश्रियं
मणिमयमहा[4] धाम्ने नाम्नेप्सितार्थसुरद्रुणा (णे)।
ततबुधजनस्थेम्ने नाम्नेऽद्य शेषधराधर-
क्षितिपसदुरो धाम्ने धाम्ने नमः [5]करवावहै ॥ ३ ॥

वरनीलपद्मरागच्छरितं मकराङ्कशङ्खसमनिनदम्।
कच्छपसमपदनूपुर[6] मीडीय मुकुन्दकुन्दरदनायाः ॥ ४ ॥

---

१. म१ ०त्रयोजीवनी०
२. मै३म१ ०विनाशनी०
३. मै३ग्रन्थपातः (भूम्ने......प्रगल्भ)
४. मै३ ०दाम्ने मीप्यिता०
५. म१ ०करवारुहै०
६. मै३ ०मीय्या ०मै२ ०मतीय्य ०म१ मीडिय्य०।

पदत्राणं त्राणं दिशतु मम रङ्गक्षितिपतेः
यदिन्द्रेशानाम्भोजनिजनिशिरस्त्राणति सदा।
कलौ लोकान् त्रातुं शठरिपुमिषाद्यत्समुदभूत्
यतो वेदः स्वार्थं[१] दिशतु सकलेभ्योऽपि भुवने ॥ ५ ॥

[२]त्रय्यन्तार्णवमप्रमेय[३] मनिशं सत्तर्कसङ्गाहित-
प्रौढाहीनगुणस्फुरन्मतिमहामन्थानसन्धानतः।
श्रीलाभाय विमथ्य तत्त्वसुधया रक्तान् बुधान् प्रीणयन्
नीयादक्षतशासनः क्षितितले रामानुजार्यो मुनिः ॥ ६ ॥

कल्याणानि करोतु कोऽपि कुमतिव्रातान्धकारच्छटा-
प्रत्यूषोदितवारिजप्रियसमप्रौढप्रभा[४] वाञ्छितः।
मादृग्भक्तचकोरमोदकलनाराकानिशानायको-
दञ्चच्छीतलचन्द्रिकासमकृपः श्रीवेङ्कटेशो गुरुः ॥ ७ ॥

प्रपद्ये श्रीशेषाचलरमणघण्टा[५] वतरणं
प्रपन्नानां चिन्ता[६] मणिमतिदयालुं शमनिधिम्।
त्रयीचूडामार्गाम्बुजविभवमार्तण्डमनिशं
[७]श्रितानां कल्पद्रुं कविकथककण्ठीरवगुरुम् ॥ ८ ॥

वाधूलवंशविधुराधूतकाममतिसाधूपकारचतुरः
स्वादूक्तिगन्धततिकाधूपिताश[८] इह पादू(दो) पसेवकनृणाम्।
बन्धूपमः सुगुणसिन्धून्नतः कलशसिन्धूर्मितुल्यसुयशाः
वाचां ददातु मम मोचारसं स वरदाचार्यदेशिकमणिः ॥ ९ ॥

---

१. म१ मै१ मै३ ०दिशति०
२. म१ ०तोय्यान्त०
३. म१ ०विभवं०
४. मै२ ०प्रभवां र्चितः०
५. मै२ ०वतरणां०
६. म१ ०मणिमत०
७. म१ मै३ ०श्रीताना०
८. मै३ ०यिह०

तर्काकूपारशब्दाम्बुधिनिगमवचस्तन्त्रपारङ्गतानां
[1]जिष्णुर्विष्णोः परत्वप्रकटितजनितास्तोककीर्तिप्रचारः।
दृप्यद्दुर्वादिदन्तावलकरटसृणीभूतकीर्तिर्विरक्तेः
आवासो भावुकं नः कलयतु वरदाचार्यवर्योऽतिवेलम्॥ १०॥

श्रीमत्कन्दालवंशाद्भुतकलशपयोराशिराकासुधांशुः
तर्कश्रुत्यन्तमीमांसकमतततधीः दृप्तदुर्वादिसिंहः।
एकैकोन्नत्यदीव्यत्तिरुमलतिलकाण्णार्यकारुण्यलब्ध-
श्रीभाष्यार्थः सुखं नः कलयतु जनकः श्रीनिवासार्यवर्यः॥ ११।

क्षोणीकर्णभवादिसत्कविपदाम्भोजे चरन्मानसाः
एकाक्षर्यतिचिन्तनश्रमपरान् गाम्भीर्यदूरस्थितीन्।
[2]कृष्टद्वित्रपदान् मुधा कवयतो निर्गन्धपुष्पायितान्
भञ्जं भञ्जमुदारकाव्यरचनाप्रौढौ प्रवर्त्तामहे॥ १२॥

कन्दालान्वयकल्पभूजकुसुमश्रेणीभवत्कीर्तिना
विद्वत्कर्णमधूलिकाद्भुतसुधाधारालसत्सूक्तिना।
श्रीनिवासार्य (श्रीवासार्य)तनूभवेन विदुषा श्रीवेङ्कटाख्या युजा
क्लृप्तो बाणजया[3] ह्वयो विजयतामेषः प्रबन्धश्चिरम्॥ १३॥

सकलजगदेकमूर्त्तौ कल्याणगुणौघदुग्धवाराशौ।
सङ्गतिहृदयो विद्वान् [4]दूरे नितरां परस्वभावोक्तेः॥ १४॥

[5]गिरिसारघनं स्थिरमपि निभृतमयस्कान्तशक्तिरिव चलने।
जडमपि मां सज्जयते [6]पुरुषोत्तमपरमतत्त्वपरभक्तिः॥ १५॥

---

१. म१ ०जिण्जुर्जिण्णोः
२. म१ ०कृष्णाद्वित्रि०
३. मै१ मै२ ०ह्वय०
४. मै१ मै२ मै३ ०दूरो०
५. मै१ अस्यां मातृकायां पूर्वोत्तरार्धौ व्यत्ययेन लिखितौ।
६. मै१ मै२ मै३ ०पुरुषोम०

ईशानां परमेश्वरं श्रुतिगिरां नेतारमाचार्यम-
प्याद्यं सर्वमखेशितारमधुना तुष्टूषुरासं हरिम्।
वाजिग्रीव! [१]भवन्मुखाम्बुजगलल्लालासुधा[२] सेचनैः
वाणीं शोधय मामिकां नरपरिष्वङ्गेण भङ्गोचिताम्॥ १६॥

पद्यैः केवलतां गतैरलमलं गद्यैरपद्यैर्मनो
हृद्या सैव हि सूक्तिरेतदुभयारब्धा मया भाष्यते।
भूषावस्त्रगुणोज्ज्वलापि ललना तारुण्यलावण्ययोः
योगादेव हि कामिनामतितरामानन्दकन्दायते॥ १७॥

अस्ति खलु समस्तभुवनभवनोदरसोदरदामोदरलुलोकिषासमुपगत [३]सहस्राक्षसनन्दनवैजयन्तहर्म्यससेनसेनाधिप[४] गजहय[५] कल्पकसन्तानचन्दन प्रमुखतरुलसितनन्दनमुखनिखिलपरिकरपरिकर्मितसभाभ्रमदाः, अदभ्रशुभ्रसभ्रमण-विभ्रमसलिलाकूपारदर्पणप्रतिफलितनिज[६] सर्वबिम्बतया, भोगवत्य[७] बलीकरणस्व-पूर्वजनिविभवदिदृक्षाजलनिधिजलवर्त्मकृत[८] यात्र बलानुजबलवियोगासहिष्णुताकृतानुगमनेव, अज्ञेयशिखरपरिष्वङ्गतुङ्गरचित कनकहरिमणिगोपुरसहस्रसमुल्लसिततया, पयोनिधि[९] पयोमग्नसपक्षबान्धवकुशलप्रश्नो[१०] पगत[११] सुरालयशिवालय[१२] नीलगिरिमुखधराधरसमुदयेव, पुण्यरागमणिनिकुरम्बप्रभापटलपीताम्बरतया, आप्राकारभित्तिसुदर्शनकरसरसिजतया, निज[१३]पदान्तसमुत्पत[१४] त्सिन्धुतया [१५]आमध्यविलसद्वनमालतया, सन्ततगदायुततया, बलिपूजितपदाङ्कतया, त्रिलोकसमाक्रमणपटुपदातिरञ्जिततया, पद्मासनाध (थ) राजिततया, श्रीवत्सलानुषक्ततया, मुक्तानु[१६] गम्यमानशृङ्गतया, अमृततान्तरितस्वरूपतया, अचलानुबद्ध[१७]

---

१. मै१ मै२ मै३ ०भावान्मुखा० सेयनैः०
२. मै१ मै२ मै३ ०सेयनैः०
३. मै१ मै२ मै३ ०सहस्रा०
४. मै२ ०सेनाधिपसगज०, म१ ०स्वगज०
५. मै१ मै२ मै३ ० कल्पकासान्तान०
६. मै३ ०सर्वस्व०
७. मै१ मै२ मै३ ०बलीयकरण०
८. मै३, म१ ०यात्रबलबलानुज०
९. मै१ मै२ मै३ ०निधिमयोमग्न०
१०. मै१ मै२ मै३ ०पतत०
११. म१ ०सुरालशिवालय०
१२. म१ ०नीलमुखधरा०
१३. मै३ म१ ०पदाङ्क०
१४. मै१ मै२ मै३ ०सिन्धुतया०
१५. म१ ०अमध्य०
१६. मै२ ०गम्मानं०
१७. मै२ म१ ०सन्ध०

सन्धितया, अतिवत्सलरामाङ्घ्रिसेवनोचिततया, आनक[१] दुन्दुभिमुखोल्लसित-मङ्गलशब्दतया, देवकी[२]रमणीड्यतया च अविरतमणिप्रभाभि[३] रालोभनीयसूर्यचन्द्रमस्तया च, स्वकमनकमलाकमनचरणनलिनपरिचर्यासमधिगतश्रीमद्रामानुजसैद्धान्तिक परमसाम्यातिशायिविभवेव, अनवरतदानवार्युत्सङ्गदीपितया, सर्वतः [४]सिन्धुजात [५]अभिख्याततया, सुधांशुसोदरयशोरञ्जिततया, [६]प्रयोजनयनानर्घ्यवक्षोदर्शनक्षममणितया च, कलशपारावार[७]समुदितचरिष्णुमाणिक्य[८] रामणीयकं विडम्बयन्ती, नानाभेदभिदुर-मणिप्रभाचित्र [९]वर्णितनवमणिनिकुरुम्बतया, भेदनिर्णयसार्थकीकृतटङ्कभेद्यता, [१०]तृणाग्राहितविषहरतापशुसमृद्धतादुःस्वप्नदूरत्वादिलोकप्रवादा, [११]सार्वकालीनापरिच्छन्नप्रभा-मण्डलविशदीकृतदिशान्तरालतया, दिवारात्रिविवेचनायोग्यतया [१२]स्वनिवासिनो जनान् निशाशब्दस्य हरिद्रायामेव शक्तिं[१३] ग्राहयन्ती प्रतिवातायनान्तरनिजसुन्दरी[१४] वदनकुमुदिनी-कम्ररुचिमेलनद्रवदब्जकान्तोपलसन्ततप्रवहदुदकझरी[१५] शोषणासमर्थतया भगवते निवेदयितुं बहिरुद्गतबडबानलज्वालापटलशङ्कामङ्कुरयता स्वमणितेजोज्ज्वलद्दिनमणि[१६] मणिनीलरुचि-धोरणीसमुदयेन सम्भिन्नकनकसालमण्डली, वसुदेवकुमाराशेषजगज्जयसमुपगतजल-धिकान्तासप्रवालकङ्कणवीचीकरकलितपृथुलकनककुम्भविजृम्भमाणाम्बरचुम्बिनीराजतेव[१७] समुल्लसिता, सिताब्जमालिकानुकारिस्वीयरमणीकटाक्षपारम्परीप्रतिकलमिलदलिकुल-शङ्काकरस्ववेणीरुचिशकलजम्बूफलबुभुक्षापतच्छुकनिकरविलाससमग्रप्रवाल-घटित[१८]मरकतहारकान्तिखण्ड[१९]जिघांसोत्पतद्बिडालनयनभ्रमकारि[२०]वैदूर्यकाञ्चीकलक-लश्रवण[२१]सजातीयशङ्काव[२२] तीर्णराजहंसीभ्रमद्दुकूलरुचिबिसदलपारणावतीर्णहंस-निनादानुकारिहंसकरवानमञ्जुलाभिः, दीक्षितापहसनकृतोद्योगाभिरिव, [२३]मुखरुर्चे (च्ये)व, विनापि चन्द्रालोकं कुवलयानन्द[२४]मादधानाभिः, अद्वैतसिद्धान्त[२५]सरणिभिरिव, अधरमध्वहित-सुधाभिः [२६]यतिपतिसिद्धान्तभङ्गीभिरिव अङ्गीकृतचन्द्रिकानिराकरणचटुलहसिताभिः,

---

१. मै२ ०दुन्दुभी०
२. मै२ मै३ ०रमणी(णे) ड्य०, म१० रमणीद्य ०
३. म१ ०आलोचनिय्य०
४. मै१ मै२ मै३ ०सिन्धू०
५. मै१ मै३ ०अभिख्यातया०
६. म१ ०जनानर्घ्य०
७. म१ ०समुदित० इति नास्ति।
८. म१ ०रामणिय्यकं०
९. म१ ०वर्णि कृत०
१०. मै१ मै२ मै३ ०ग्राहित०
११. म१ ०सार्वकालिका०
१२. मै१ मै२ मै३ ०स्ववासितो०
१३. मै१ मै२ मै३ ०ग्राह्यन्ती०
१४. म१ ०मुख०
१५. म१ ०शोषणी०
१६. मै१ मै२ मै३ ०दिनमणिनील०
१७. म१ ०समुल्लसिताब्ज०
१८. मै१ मै२ म१ ०सरकतकान्ति०
१९. मै१ मै२ म१ ०जिघांसु०
२०. म१ ०वैद्रूर्य०
२१. मै२ ०सजातीय्य०
२२. मै२ ०तीर्ण्ण०
२३. म१ ०मुखरुच्यैव०
२४.मै२ ०मादेधान०, मै१ मै३ ०माधधान०
२५. मै२ ०सरणीभिः०, म१ ०सरणभिः०
२६. मै१ मै२ मै३ ०यतिप्रति०

पूर्ण[1] प्रज्ञमतवैखरीभिरिव शेखरी[2] कृताक्षोभ्यवचनदूरनिराकृतकामविद्यारण्यकौतुकाभि:, कालिन्दीकूललक्ष्मीभिरिव रुचिरतमालकाननाभि:, अब्जद्वयं वदननयनेन, कुम्भद्वयं वक्षोजयुगलेन, अचलातिशयं नितम्बस्तनेन, पल्लव[3] प्रसारं [4]पादापाङ्गाभ्याम्, [5]रम्भाचाकचक्य-[6]मूरुसौन्दर्याभ्यां [7]अप्य(प्स)रोवैभवं रोमलताभूनिवासाभ्यां, विजित्य जयशासनाक्षरविन्यासं मकरिकामिषेण कपोलफलके कुचदुर्गनितम्बदेशे च लेखयन्तीभि:, तटिल्लताभिरिव, (वा) निश्चलाभि: तारावलीभिरिव निजसम्पल्लक्ष्म्या: तप्तकाञ्चनवल्लीभिरिव, सशृङ्गार[8]चेष्टिताभि:, शारदाभिरिव सकलविद्याविशारदाभि:, वेलावनलीलाकृतकोलाहल-जालाद्भुत[9]हेलात्मिकसालाकृतिशालाधरखेलाजितबालातपमालाकृतमालास्य-तमालायितलसदमरतरुवर दरदलितकुसुमसुमनोहरमधुझरीपरीरम्भनरी[10] नृत्य[11] द्भ्रमरी मरीचिकाचमरी[12]समरीतिकबरीरुचिपरीवाहदरीकृतनितम्ब[13]धुरीणाभि:, अधरमधुपानादरदूनागमनानाविधसूनाहतिदानैकनिदानाङ्घ्रिनिधानालिमिलनसनील-मणिविन्यासस्थूलमुक्ताहाराभि:, सन्तताकलितप्रमदाभि:,प्रमदाभिरधिष्ठिता:, कदम्बकनककङ्केलिनन्दनचन्दनमन्दारसिन्दूरसुन्दरविशाल[14] सालस्रवन्मरन्दबिन्दुबृन्द-तुन्दिलोपवनवाटिकापरिष्कृत [15]समनिकुजपुञ्ज[16]सञ्चरसुन्दरीसुन्दरपदालक्तिकाङ्कित-हृद्यपद्या:, अनवद्यं वीधिकामणिवेदिकामनोहरा:, हरपुन्दर[17]द्रुहिणादिलोभनीयमहिमसमासादित-सौभाग्यकविवरेण्यसम्पत्तिरस्कृतराजराजदौवारिकाष्टापदकशाभियात[18] त्रुटिताष्टदिक्पालक-मुखनिखिलपुरवरकिरीटतटविशीर्णविविधमणिचूर्णधूसरराजवीथिकापांसुक्रीडा-शारकान्तिदारका द्वारका नाम राजधानी।

किञ्च—

सिन्धौ मज्जनमेत्य [19]यद्गृहमणिशृङ्गान्तवातायनं
द्वारीकृत्य सखीमुखाद्गुरुमणेरन्तेवसंश्चन्द्रमा:।
आवृत्त्या बहुधैव षोडशकला: सम्प्राप्य शिष्टा: कला:
नोभेजे गुरुदारसङ्गमपरिक्षीणाश्च लब्धा: कला:॥ १८॥

---

१. मै१ मै२ मै३ ०प्रज्ञवैखरी०
२. मै१ मै२ मै३ ०कृतक्षोभ्या०
३. मै३ म१ ०प्रचारं०
४. म१ ०पदा०
५. मै१ मै२ मै३ ०कुम्भा०
६. म१ ०उरुद्वयसौन्दर्य०
७. म१ ०अमरो०
८. मै१ मै२ मै३ ०चेष्टताभि:०
९. म१ ०हेलात्मकि०
१०. मै३ म० नृत्त०
११. मै१ मै२ मै३ ०भ्रमरीचिका०
१२. मै१ मै२ मै३ ०समरीतिम्बरीं०
१३. म१ ०धुरीणाभि:०
१४. मै३ म१ ०किसाल०
१५. म१. ०सुरुनिकुञ्ज०
१६. मै१ मै२ मै३ ०सञ्चारत्०
१७. म१. ०द्रुहिणविलोभ०
१८. मै२ म१ ०तृटिता०
१९. मै१ मै२ मै३ ०यन्नृपगृह०

[1]विश्वस्रष्टा सिसृक्षुः सरसिजनयना यत्र मध्येन हीनाः
[2]वक्षोजातौ नितम्बं पृथुलसदयोऽयश्शिलाभ्यामतानीत्।
मन्ये नो चेत् कथं वा [3]सहगतिवसतीधारणं चान्तराले
मध्योऽस्त्री[4]त्येतदर्था(:)कलयति नितरां मानसे [5]कोशभङ्गी॥ १९॥

स्मारं तनुभ्रूयुगमङ्गनानां लस्तं तु फाले तनुहस्तसङ्गात्।
नालक्ष्यते यत्र च चित्रकश्री(:)बालो न रक्ती कुरुते सयूनः॥ २०॥

स्वाहाकारै[6]र्वषडिति पदैरध्वरे सोमयाजि-
व्राता यस्यां [7]मुखरितदिशामण्डलं हव्यवाहे।
[8]हुत्वा सद्यः सुरुचिरवपां सौधमार्गेण यान्तः
स्वर्गं तत्रावसथमपि ते कुर्वते चन्द्रशालाम्॥ २१॥

क्षीणश्चन्द्रः पशुपतिरहो [9]यत्र नूनं विषादी
जातिद्वेषः कुसुमसमये पादपाग्रे वियोगः।
दुर्वंशानां गिरिषु नितरां सम्भवो नैव यस्या-
[10]माशासङ्गे यशसि [11]न जनेष्वेवमुज्जृम्भते स्म॥ २२॥

यत्सौधाग्रे कमलनयना नैजवक्त्रेन्दुसाम्यं
द्रष्टुं चन्द्रे रुचिमतिकरग्राहमेनं गृहीत्वा।
दृष्ट्वा पश्चाद्वपुषि मलिनं तस्य ताटङ्कदम्भात्
सेवाकृत्ये निजमुखविधोर्हन्त संयोजयन्ति॥ २३॥

---

१. मै३ ०विविस्रष्टं०
२. म१ ०दक्षोजातौ०
३. मै१ मै२ मै३ ०सहति०
४. मै३ ०त्येतदधा०
५. म१ कोशभङ्गीम्०
६. मै३ ०वर्षदिति०
७. मै३ ०मुखन्त०
८. मै२ ०हंत्वा०
९. म१ ०तत्र०
१०. मै१ मै२ मै३ ०माशास्वङ्गे०
११. म१ ०नमेष्वेव०

लङ्कैवैषा खलु परिवृता दानवारिप्रचारैः
[१]वाणीवैषा वहति च रसज्ञानबन्धातिरेकम्।
नागाक्रान्ताप्यगविलसिता पल्लवैर्वल्लिकेव
श्लाघ्या नूनं जयति नगरी वासुदेवस्य [२]विष्णोः॥ २४॥

चलद्भृङ्गोत्तुङ्गस्तबकमधुनिष्यन्दिसुमनो
ललद्वल्यन्तानोकहतति[३] तया या विजयते।
[४]तमोनीलं तारावलि[५] ललितचन्द्राङ्कितपयो-
धरां श्यामां पार्श्वे लसति दधतीवानिशमपि॥ २५॥

॥ चू॥

क्वचित् अभङ्गुरमङ्गलपूर्वरङ्गसङ्गीतभङ्गीरङ्गद्वारकुरङ्गीदृक्पदकमलसङ्गत किङ्किणीकलकलमुखरिततया, प्राप्तचतुर्दशभुवन[६] लोभनीयनगरीसाम्राज्य पट्टाभिषेकावसरेव, अपरत्र [७]दिक्कुम्भितकर्ण[८] कुहरपाटनसमुद्दण्ड वैभवनिस्स्वान भेरीपटहकाहलीशङ्ख[९] गम्भीरध्वानसमुत्तम्भिततया, उन्मत्तघोषभीषणस्वपरिष्वङ्गप्रसारितोर्मि-बाहुमुदन्वन्तं भर्त्सयन्तीव, अन्यतरः, सन्नद्धरथगजतुरग-पदातिघर्घरबृंहितहेषा, स्वेलितविह्वलतया मन्थानमहीधरमथ्यमानमहार्णवोल्लोलकल्लोलपटपटात्कारमनु[१०]कुर्वतीव, एकत्र, कनकशलाका-पिञ्जरपञ्जरकूजित्कोकिलशुकशारिकाप्रभृत्यलब्धवर्णस्वरमेदुरतया, सङ्गीतकलाभ्यासकृतादरेव, स्फटिकमणिरुचिधवलाम्बरपरिगतसालसीमतया, पलितकेशकलापेव [११]कम्बमानपयोधरतया जरठेव, या सर्वजनलोचन[१२] लोभनीया विद्योतते॥

किं भूयः कथनेन तादृशमहोदारेण वाराशिजा-
दारेणामितभक्तसन्ततिसमुद्धारेण सालङ्कृता।
वक्तुं यं मनसा विचेतुमपि वाऽशक्ताः स्फुरल्लोचनाः
फाले पादतले श्रुतौ श्रुतिशिरः प्रत्यग्रचूडामणिम्॥ २६॥

---

१. म१ ०वाणीवौश्या०
२. मै१ मै२ मै३ ०निष्णोः०
३. म१ ०तयानवतमी०
४. मै१ मै२ मै३ ०तमोनीलं०
५. मै३ ०ललितनवतमि०
६. म१ ०लोभनीय्य०
७. मै३ ०द्विकुम्भि०
८. म१ ०कुहर०
९. म१ ०गभीर०
१०. मै३ म१ ०कुर्वन्तीव०
११. मै१ मै२ मै३ ०लाम्बायमान०
१२. म१ ०लोभनीय्यां०

नेत्रे यस्य हिताहिते जलजयो(:) श्रुत्यन्तवेद्ये द्विधा
श्रोत्रे यस्य सरत्नकुण्डलभरे श्रीकारिणी च द्विधा।
नाभी [१]हृच्च तनूभवत्वममतां मध्ये विधौ च द्विधा
कुर्वाते हरितत्त्वसङ्गतिमहो चेलं करोति द्विधा॥ २७॥

पार्थानां हितकाम्यया त्रिजगतीरक्षाकृते दुर्जन।
व्रातस्यावततार भञ्जनकृते दीनार्थदानाय च॥ २८॥

निटालदृग्जटाघटोत्कटालयोद्भटापगा-
स्फुटाङ्घ्रिक्लृप्तकालिय[२] स्फटाच्छटानुरक्तिनः।
निरीति[३] रीति यो धरां चरीकरोति सत्कृपा
झरीधुरीणमानसो[४] वरीवरीति सज्जनान्॥ २९॥

कंसादिहिंसाकलनप्रशंसा
संसारशान्तिं वितनोति यस्य।
यः [५]पूतनामारणकारणास्यः
यः पूतनामाऽनुगतागमान्तः॥ ३०॥

चित्रं नैतदुपेत्य कृष्णमनिशं [६]दीप्तप्रभावोऽर्जुनः
कृष्णां [७]रक्ततमां करोति न गुणं [८]स्वीयं जहातीति यत्।
भूयः कृष्णयशः सुधानुकलिताकर्पूरधूलीरुचं
धत्ते चित्रमिदं निशा हिमकरे रागं च तत्याज यत्॥ ३१॥

नीलोत्तुङ्गसुदीर्घबाहुयुगलीदत्तावकोशौ शिरः
कोटीरान्तरितस्थती कलयतो यस्याब्जचक्रेश्वरौ।
एकान्तास्त[९] मयोदयोन्मुखनिशानाधा(थ)म्बुजातेशयोः
शोभां [१०]पश्चिमपूर्ववार्थिगतयोः स्वर्णाद्रिमालम्बतोः॥ ३२॥

---

१. म१ ०हत्व्तनू०
२. म१ ०भटाच्छटा०
३. म१ ०रितियोधरां०
४. मै३ ०वरी० नास्ति
५. मै३ ०पूताना०
६. मै१ मै२ ०दीपप्रभा०
७. म१ ०रक्ततमीं०
८. म१ ०स्वियं०
९. म१ ग्रन्थपातः (मयो.....न्मख)
१०. मै३ ०पश्चम०

॥ गद्यम् ॥

मन्दमन्दहसितनिन्दित[१] कुन्दबृन्दः, कुरुविन्दसन्दोहसन्देहसन्धानदाननिदानरदन[२]च्छदः, चन्द्र(न्द्रं)कलङ्केनेव, जलजमलिकदम्बनेव, [३]मुखं मृगमदतिलकेन परिष्कुर्वन्, [४]कालीयभङ्गापनयकृतसन्देश तत्कान्तापहितमणि[५] रञ्जितफणफणिशिशुभ्यामिव, रत्नकुण्डलाभ्यां गण्डमण्डलं पाण्डुरयन्, केनापि कनकक्षोणीधरेणेव रत्नसानुना किरीटेन गोवर्धनधारणवैखरीं [६]सूचयन्, अनेकनायिक [७]सहस्रकटाक्षसङ्गादिव, जलधिमथनपरमन्दरमूल-स्थितिलब्धकालकूटपरिष्वङ्गादिव, नीलनीलेन दिव्यमङ्गलविग्रहेण वार्षिककादम्बिनी[८]मपहसन्, योगिजनकृतस्मरणेन रथचरणेन, दूरीकृतदैत्यजन्ये(न्ये)न पाञ्चजन्येन, आवर्त्तेनेव यमुनाम्, निशामिव चन्द्रेण, भुजायुगलीमनुरञ्जयन्, इतर [९]भुजावप्यपहृतवैरिमदया गदया, सज्जनानन्दकेन नन्दकेन च व्यञ्जयन्, [१०]शार्ङ्गनामानं, चापराजमप्यनुकलय्य उरसि मूलप्रकृत्येव सूक्ष्मया श्रीवत्सरेखया समुल्लसितः, केनापि[११] श्रीरवाराशिभागधेयेन चरिष्णुना स्थिरेण च द्विधा [१२]रक्तेन नायकेन हारमिव, पृथिमिव मेरुणेव, कुसुमफलमधूलिसम्पदा काननमिव, चन्द्रेण निशामिव, वसन्तेन शरद (दिव) (दीमिव) मिव, वक्षः फलकमाभरणयन्, उज्ज्वलया मुक्तावल्या दीपिकया, रत्नावल्या रुचिदत्तामोदया प्रसाद[१३] करिण्या वनमालया च [१४]भ्रमरहितं प्रवचनमनुकलयन्, एकदैव चतुर्वेदीमप्युद्गु (द्घु) ष्यता केनापि किशोरेण नाभीकमलमलयन्, पीताम्बरेण रत्नमेखलया च कटतटीं चपलया जलदपङ्क्तिमिव [१५]प्रोज्ज्वलयन् राजराज[१६] गिरिराज[१७] सुरराज जलराजराजधरमकुटशाणोत्तेजितचिररत्न-रत्नमञ्जीरशिञ्जितेन रञ्जयन्, लावण्यसिन्धुपूरणेव कटाक्षधारा[१८] सारेण सकलजनस्या-प्युल्लासमुद्वेलयन्, स्वसमसकलविभवेन, महोदग्रप्रतापानल[१९] राशिभूतेन, नाम्ना धर्मेण च द्विधा बलेन स्वाग्रजेन सङ्गतः, अनन्तकल्याण[२०]गुणगणक्षीरवाराशिः, वसुदेवानन्तसुकृत-परिपाकः, देवकीगर्भ[२१] शुक्तिमुक्तामणिः, त्रिलोकीसार्वभौमः, स्वामी भगवानेव बालोपच्छदनन्यायेन राजा ॥

---

१. मै३ ०कुन्दिदबृन्द०

२. मै३ ०च्छन्दः०

३. म१ ०मुख०

४. म१ ०कालीय्यं०

५. मै१ मै२ मै३ ०पणा०

६. मै३ म१ ०सुकरयन्०

७. मै१ मै२ मै३ ०सहस्त्र०

८. मै१ मै३ म१ ०अपहसन०

९. मै१ मै२ ०अपहृतगदयागदया०

१०. म१ ०सन्निधौ०

११. मै३ ०क्षोरवा०

१२. मै३ ०रकेन०

१३. मै३ ०कारन्या०

१४. मै१ म१ ०भ्रमरहिम०

१५. मै३ ०पुरोज्वलयन्०

१६. मै२ ०सुरराज०

१७. म१ ०सुरराजगीराज०

१८. म१ ०वारेण०

१९. मै१ मै२ मै३ ०राशीभूतेन०

२०. म१ ०ग्रन्थपातः (गण......क्षीर)

२१. मै२ मै३ ०शुक्त०

अष्टाभिर्महिषीभिरिष्टकलने जुष्टः कृपावीचिभिः
क्लिष्टानां नमतां च कष्टहरणे [१]पुष्ट(ष्टि) प्रदाने पटुः।
स्रष्टा शास्त्रततेर्दिशा कबरिना स्पष्टप्रसूनश्रिया
कीर्त्याऽष्टापदभूधरोन्नतगतिर्भाति स्म लोकोत्तरः॥ ३३ ॥

तस्याभूद्गृहिणी कलेव शशिनः कल्पदृ(द्रु)शाखाभुजा
कान्ता काञ्चनकल्पकान्तिकलिता कालाम्बुदत्कुन्तला।
सौन्दर्येऽनुपमा सुधारसझरीपारम्परी सोदरी
भूतापाङ्गरुचा नमच्छुभकरी रामायणी रुक्मिणी॥ ३४ ॥

महासान्ध्याक्षेत्रेऽरुणमणिसमाजैकरुचिरा-
लवाले सिन्दूरैरपि च [२]घुसृणैर्दोहदवति।
तपोभिर्बन्धूकः प्रभवति यदि प्राप्त[३] विभवं
प्रसूनं यद्विव्याधरसमरुचिः स्यात् किमु न वा॥ ३५ ॥

कलापूर्णाविणाङ्कितनुकरौ यन्मुखरुचो
गतौ द्यूतं स्निग्धा उपमितकृतौ सोमपृथुकौ।
जये मूर्धन्येव स्थितिरिति [४]जयाशीर्षमभजत्
तयोरन्यः पीत्वा विषमपि वहत्येनमनिशम्॥ ३६ ॥

न बन्धे पारुष्यं न च मधुरशब्दे कठिनता
समासा दीर्घापि त्रिवलिरुचितस्निग्धमृदुता।
जगु[५] र्वैदभी(र्भीं) यत्कनकरशनां केचन वयं
सकान्तिं [६]गौडीयां मनसि नितरां निश्चिनुमहे॥ ३७ ॥

---

१. मै१ मै२ मै३ ०पुष्टिपादेन०
२. म१ ०घुसुणैः०
३. मै१ मै३ ०विभव०
४. म१ ०जयीशीर्ष०
५. म१ ०वैदर्भं०
६. म१ ०गौडिय्यां०

जगन्मातुर्यस्या विमलनखसाम्यं खलु भवेत्
सुधांशुर्मेधश्चेज्जलमपि सुध(धा)चेत्तदुदरे।
त्यजेन्मुक्तास्फोटो यदि मलिनतां [१]वक्त्रसुषिरं
वसन्ते वृष्टिश्चेत्फलति यदि मुक्तामणिगणः॥ ३८॥

तमो [२]द्रव्यं नैल्यादिति हि यद्यभाषिष्ट भगवान्
तदेतत्सत्यं न स्फुरति नितरां जैमिनि[३] मुनिः।
तमो वेति श्रुत्या प्रकटनिजभावत्वमलका-
त्मना [४]वक्त्रस्येन्दोः प्रणयियदमुष्या विजयते॥ ३९॥

सा हि श्रीरमृता सतां मनसि या पद्माक्षवक्षःस्थले
पद्मे पद्मभवप्रसूः श्रुतिशिरः सौधान्तरालेऽपि च।
याऽभूत्पङ्क्तिरथस्नुषा धरणिजा त्रेतागमे जानकी
विद्वांसो वसुदेवपुत्रमहिलां तां जानते द्वापरे॥ ४०॥

वचनममृतमब्जं वक्त्रमिन्दीवरं त-
न्नयनमलिकदम्बं केशपाश[५] प्रकाशः।
अमलकमलपाली तत्कटाक्षप्रणाली
तनुरतनुजयश्रीसन्ततोद्यानकेली॥ ४१॥

॥ चू॥

या च [६]पयोनिधेर्जनकस्य राज्ञोऽनुरूपलीलाभिः, वलीभङ्गीवैखरीभिः, नाभीमहावर्त्त[७] सङ्गतीभिः, नयनेन्दीवरसमृद्धिभिः, अधरप्रवालश्रीभिः, रोमलताशैवालकान्तिभिः, वक्षोजकोकरुचिभिः, [८]हसनप्रणादैश्च समुल्लसिताः,

---

१. मै३ ०वक्र०, म१ ०वक्रं०
२. म१ ०दिव्यं०
३. मै३, म१ ०मुनेः०
४. मै३ ०इयदिदोः०
५. मै३ ०प्रकाशं०
६. मै३ ०वसुधा०, मै२ ०पयो(सुधा) निधेर्जन०, मै१, म१ ०सुधा०
७. मै३ ०सङ्गतीभिः०
८. मै३ ०हसनप्राणादैश्च०, म१ ०हसनप्रणादवैजरीभिश्च०

मुखाम्बुजविरहासहिष्णुतोपगतेन दैवात्कर्णमप्याकलय्य द्विगुणीकृततनुना भानुनेव, रत्नताटङ्कयुगलेन नयनेन्दीवरानुरञ्जनसमागतेन सतारगणेन सुधाकरबिम्बेनेव[१]मुक्ताललन्तिकाभरणेन च कपोलसीमानं धवलिमानं [२]नयन्तीः नित्यस्वक्षेत्रवासायेव भ्रूधनुषी [३]नयनमीने च आदरकृतागमेनेव गुरुणा नासामुक्तामणिना मुखोपमान[४] कधायाम[५]लाभव्यञ्जनबिन्दुनेव सुधाकलितेन अधरचिन्तामणेः, शिरोमणिनेव परिष्कृताः दुर्धर्षपुण्डरीकाक्षवक्षः सीमानमधिगम्य दृप्तं सहजं कौस्तुभं जेतुमुत्कण्ठयेव किमपि कुचदुर्गद्वयमाकलय्य कनकचेलमन्तरा भासमानैरसमानैरदसीयलावण्यपयोनिधेस्तनूभवैरिव मुक्ताहारैस्तारकानिकुरुम्बमञ्जुलां निर्मलनभः श्रियं कोरकानुकलितां वनलक्ष्मीं च रोचयन्ती, वैकुण्ठानुरागरक्तमञ्जूषिकाकुञ्चिकयेव, [६]गर्भभङ्गबन्धुरया रोमलतया कामजनकमपि रञ्जयन्ती, पादतल[७]परिमलधूमधूमित[८] कबर्या, गौर्या सन्ततसेवनकृतय्या(या) शय्या, अनवरताञ्जलीकृतपाण्या वाण्याप्यनुकलमभ्यर्थितेन अपाङ्गकिरणविकिरणेन दीनजनतां [९]जनतामितसम्पदमादधाना, मीनाक्ष्येव कृतमधुरानुबन्धया अधरश्रिया, कामाक्ष्येव काञ्चीलसितया नितम्बसम्पदा, [१०]अतिरमणीयश्रीरङ्गभूतया तनुलतया च वाङ्मानसयोरगोचर-विभूतिः परिदृश्यते ॥

तया शृङ्गारिण्या तिलकितसमृद्धिः प्रतिकलं
[११]विलासैस्तत्तादृक् त्रिभुवनमनोज्ञैरुपगतः।
अनेकैरक्षोहिण्यधिपतिभिरासेव्य सविधं
बभौ श्रीमत्सिंहासनमधिवसन्नब्जनयनः॥ ४२ ॥

---

१. मै१, मै२, मै३ ०मुक्ता० नास्ति।
२. मै३ म१ ०फालभूमानं० अधिकं वर्त्तते।
३. म१ ०नयनयनमीन०
४. मै२ ०च्छाया(म)ला, मै२ ०याया०।
५. मै१, मै२, मै३ ०लाभव्यञ्जनशून्यबिन्दुनेव०
६. म१. ०वली०
७. म१. ०परिमले०
८. मै१. ०वलीभङ्गबन्धुर०, मै२. ०वलीभङ्गबन्धुरया०
९. म१. ग्रन्थपातः (जनितामित......मादधाना)
१०. म१. ०अतिरमणीय्य०
११. मै३. ०विवासैस्ताधृत्रिभुवनमनोज्ञैकृपगतः०

सरसवचनसीमां भाषणैः सत्यभामां
विहितविविधगाथां वीक्षणैश्चापि राधाम्।
अशिथिलपरिरम्भैर्भोगिनश्चापि जृम्भन्
मदनकदनगुम्भैस्तोषयामास शौरिः॥ ४३॥

ग॥ तत्तादृशगरिम्णा नीतेषु कतिपयेषु वासरेषु।

आपन्नसत्त्वे निखिलप्रपञ्चे
रूपं नवं प्राप्य मुरारिनारी।
आपन्नसत्त्वा विरराज काम-
रूपं नरं स्वात्मभवं चिकीर्षुः॥ ४४॥

वलग्नमस्या वनिताशिरोमणेः
कृता तनुश्रीकमभूद्द्विधैव हि।
कुचौ गिरीशाहितनैजवृत्तिकौ
कपोलसीमा मकराङ्कतामगात्॥ ४५॥

कर्पूरस्फुटरुक्कपोलफलकं विस्तारनेत्राम्बुजं
प्रस्वेदोज्ज्वलफालदेशमलसापाङ्गं कुरङ्गीदृशः।
निःश्वासप्रचुरं सखीजनकथादूरान्तरङ्गं किम-
प्यासीच्चेष्टितमङ्घ्रिदूरगमनं भूषाप्रसङ्गाक्षमम्॥ ४६॥

प्रस्वेदस्वातिवृष्टिं कलयति कबरीधूमयोनौ समन्तात्
तन्वा लावण्यवारांनिधिपतिमभितः सोर्मिहस्तप्रवालम्।
भेजे तद्गर्भशुक्तिः कमपि गुरुतरं दिव्यमुक्तामणीन्द्रं
येन स्यात्सर्वकान्ताहृदयसमुदयारञ्जनं क्वाप्यदृष्टम्॥ ४७॥

तस्या मध्य[१] मवाप्य दैवतवशाल्लोकोत्तरे यादव-
श्रेणीनामृषभे तदा स्वरसतामामोदमाधास्यति।
आपे गोभिरमन्दता कुचमहाक्रौञ्चेन [२]च स्थूलता
तन्त्रीपञ्चमसङ्गतिश्च शनकैर्मन्द्रा[३] भवत्तत्क्षणे ॥ ४८ ॥

स्वगर्भसंस्थातनुवैरी [४]शम्भु
जये धरा स्यन्दनतामवाप।
इतीव रोषान्महिला मुरारेः
[५]चखाद मृत्स्नामधिकं तदात्त्वे ॥ ४९ ॥

॥ ग ॥

क्वचित्पृथुतरीभवन्नितम्बबिम्बसैकततया शरदिव, क्वचिद्ध्वंसकदूर-पदपङ्कजतया, प्रावृडिव, क्वचिद्वलीतरङ्गविनिर्मुक्तोदरतया ग्रीष्मसरसीव, माधवात्यन्त[६] प्रीतितया वसन्तवनवैखरीव, सकल[७] भूषाजीर्णपलाशविनिर्मुक्ततया हेमन्तवनलक्ष्मीरिव, [८]कुचकोकमुखमालिन्यसम्भिन्नतया[९] निशेव विललास ॥

कृष्णानुषङ्गेण [१०]विनाकृतौ मे
वक्षोजकुम्भौ विफलावितीव।
दध्रे तया [११]श्यामलचूचुकात्मा
तयोस्तदानीं [१२]कनकोज्ज्वलाङ्गी ॥ ५० ॥

---

१. मै२. ०ममाप्य०, म१. ०माप्य०
२. म१. ०तं०
३. मै२. ०भदत्तक्षणे०
४. मै३. ०शम्भु जे जये०
५. मै२. ०खखाद मृ०
६. म१. ०प्रीतिविषयतया०
७. म१. ०भषाजीर्ण०
८. म१. ०कुचकोरकमुखमालिन्य०
९. मै३. ०निवेश०
१०. म१ ०विनैकृतौ०
११. मै२. ०शामल०
१२. मै१, मै२, मै३. ०कनकोज्ज्वलाङ्गी०

वसन्तमित्रे वसुधावतीर्णे
ससम्भ्रमं पल्लवितं सतीहृत्.......।
रतिस्तदा [१]पुष्पितकौतुकाऽभूत्
पुरो(र:)स्थितानां फलिता तदा श्रीः॥५१॥

अथाऽविरासी[२]दखिलानुराग-
निकेतनं सर्वजगद्विमोहम्।
हरेः [३]सरूपं निखिलैः प्रतीकैः
अदृष्टपूर्वातिशयं महामहः॥५२॥

भर्त्ता [४]नः सतनुर्जगज्जयकृते प्रायो [५]यदूनां कुले
जातः पुष्पशरासन[६]स्तदधुना गन्तव्यमामोदतः।
इत्यालोच्य सुरालिहस्तगलिता कल्प[७]द्रुमादुद्धता
पुष्पाणां विततिः पपात समया तस्मिन् क्षणे द्वारकाम्॥५३॥

सखा नः कन्दर्पो हरनयनवह्नौ शलभतां
गतो दैवाज्जातः [८]पुनरिति नभस्वानतिमुदा।
परागैः सर्वेषां वपुषि कलयं (यंश्च) चन्दनरुचं
ववौ नैजामोदं किमपि कथयन् किं नु [९]मृदुलम्॥५४॥

ग॥

तदनु अन्तःपुरदासीषु कौतुकात् किमपि कर्तुमलब्धावकाशतया, गतागतमात्रविश्रान्तासु, कालज्ञेष्वप्यङ्गुलिगणनव्याजेन सङ्ग्रहानन्दतया, अज्ञातग्रहराशिभावेषु, दौवारिकेष्वप्यत्युत्साह-अभिपदैकनागरिकनिवारणकृतहुङ्कारेषु, विप्रेष्वपि राजधान्यां धान्यादिलाभः दक्षिणानां

---

१. म१. ०वृषित०
२. म१. ०बलानुराग०
३. म१. सरूपैरखिलैः ०
४. मै३. ०न हि०
५. मै१, मै२, मै३ ०यादूनां०
६. मै१, मै२, मै३. ०तदाधुना०
७. म१. द्रुमादुदृता
८. म१. ०पुनरति०
९.मै१, मै२, मै३. ०मुहलम्०

[1]दक्षिणादिसङ्गतिरद्य भवति दृष्टं चेज्जातकर्म[2] जातकर्मपरिपाका वयं पाकोत्साहेन पाकलाभो भवेदस्माकमित्यादिदीनपरिहसनीयवचनशब्दायमानवदनेषु भगवानपि मुनिजनचोदितेन [3]पथा जातेष्ट्यादिकमकार्षीत् ॥

निशाचरः कश्चन शम्बराख्यो
वशीकृताम्भोनिधिमध्यदेशः।
शिशुं [4]समाधाय हरद्विषं तं
विवेश वाराम्बुधिवारिपूरम् ॥ ५५ ॥

शिशुं समीनध्वजमाशु(सु)रेशः
निजध्वजे योजयति स्म तीव्रम्।
स चात्मतातप्रथमावतार-
परीक्षणायेव विवेश वक्त्रम् ॥ ५६ ॥

ग ॥

ततः संवर्त्त इव व्याकुलीकृतभुवनः, विवर्त्त इव मृत्योः [5]पाश इव गुणजालं प्रदर्श्य किमपि जीवनं प्रकाश्य अन्यजीवनं यूनां वारतरुणीजन इव झषाणां सङ्ग्रहीष्यन् [6]कैवर्त्तः [7]कुम्भः इव अम्भोनिधेः सम्पदं संक्षोभयाञ्चकार ॥

अनन्तरमनन्तजन्तुलाभपूरिताशेन दाशे(से)न तेन अच्छगुणे [8]मत्स्यगणे तीरमुपनीते स्वान्तरस्थितमनिकेतनं बहिरुद्गिरतेन, विचित्रघृणकरम्बितेन स्वकरलम्बितेन [9]भासमानेन धावल्यविजितमानेन मीनेन स च (सहज) जलचरकुलान्तकः सकलभयङ्करवीर्यडम्बरं शम्बरं नाम निशाचरमामोदयाञ्चक्रे ॥

---

१. मै१, मै३. ०दक्षिणानाम् ०अधिकपाठः
२. म१. ०जातकर्म० इति पदं नास्ति।
३. म१. ०पदा०
४. म१. ०समीरध्वज०
५. म१. ०पाशमिव०
६. मै३. ०कैवरः कुम्भबि इव०
७. म१. ०कुम्भज इव०
८. म१, मै२. ०मत्स्यगणे० इति नास्ति।
९. म१. ०भासमानेन मीनेन०

महानसौ महानसं पलाशनो [१]निनाय तं
बिभेद पाचको झषं तदन्तरा शिशुं स्मरम्।
विलोक्य शम्बरश्च मृत्पयोनिधौ निमग्नवत्
सुविस्मितो जिघांसया करे जहार तत्क्षणात्॥ ५७॥

रतिरतिरतिः कामं [२]कामं विबुध्य तमर्भकं
कृतनतिततिस्तस्मै रात्रिंचराय चिराय सा।
अतनयनयाद्गन्तारं तं निजाङ्कमनीनयत्
[३]निशिचरगृहे सेयं चेटीमिषात्कृतगोपना॥ ५८॥

ग॥

तदनु तया मृदुल[४] मधुरभारत्या रत्या सत्यापितस्वेदयाऽवसरपरीक्षणव्रतया संवर्धितः तन्मुखवचननिचयपरिचयविशद[५] निजजनिमुखनिखिलवृत्तान्तः समुद्दण्ड[६]भुजदण्डकुण्डलित-कोदण्डमुखनिःसरत्काण्डकाण्डैस्तमसुरं शमनराजधानीवास्तव्यमूर्धन्यं विधाय तावदनिदान [७]नयापनयानु[८]विकलमनोरथां मातरं सकलतत्त्वकूलङ्कषज्ञानमपि सत्यसङ्कल्पमप्यप्रतिहतवीर्यमपि स्वतनयावस्थानानभिज्ञामिवाभिनयन्तं[९] तं[१०] पुण्डरीक[११] लोचनं जनकमप्यासेवितुमुत्कण्ठितः तया सममममेयसम्पदास्पदं, स्वमुख[१२] यामिनी कामुकपरिष्वङ्गविनिद्रतरुणीनयनकुवलयस्यन्दि[१३] मरन्दधारापूरयितानन्दबाष्पनिष्पातनपङ्किलराजवीथिकाम्, [१४]अनवरतालिङ्गन [१५]परस्वबान्धव

---

१. मै१, मै२, मै३ ०विनाय०
२. मै१, मै२, मै३. ०कामं० नास्ति
३. म१. ०निशिचरपतेर्गेहे०
४. म१. ०मधुर० नास्ति।
५. मै१, मै२. ०निजनिखिल०
६. म१. ०दोर्दण्डकुण्ड०
७. म१. ०न० नास्ति।
८. मै३. ०यापनानुकविकल०
९. मै१, मै२, मै३. ०तं० नास्ति
१०. म१. ०पुण्डरीकलोकलोचनं०
११. म१. ०तनयानमममेय०
१२. मै३. ०यामीनी०
१३. मै१, मै२, मै३. ०मारन्द०
१४. मै१, मै२, मै३. ०अविरत०
१५. म१. ०दरस्व०

कुशलवचनमेदुरघण्टापथाम्, अभिमुखापतद्वारिकीरवाणीमन्दहसितधोरणीकुन्द-कुसुमवृन्दविकिरणसूचितसकल[१] भुवनविजयाम् अभिमुखोन्नमितकरवैतालिकपालिका[२] तोष्टूयमानशम्बरविजयपराक्रमक्रमे [३]समुदित्वरपुलकद्विगुणिततनुयादवडिम्भगुम्भिताम्, पौरकान्ताकरान्तलतान्त[४]नितान्तच्युतराजसमाजकोरकितवीथिकान्तर[५] सौवल्लभ मल्लकरवेल्लितमल्लश्रेणीपल्लवितघण्टाविसरसमुल्लसद्[६] घणघणात्कारद्विगुणित[७] वादित्राम्, पवित्रचरित्रां द्वारकां प्रविश्य उद्भटविकटभटार्भटीदूरदूर[८] परिसर्पित[९] पौरवारसभयसम्भ्रम कलिताञ्जलिपुञ्जकञ्जसुसेवितप्रतापभास्करः, [१०]विचित्रगतिवैखरी [११]धिक्कृतपवमान मानसवेगवन्तमर्वन्तमधिरुह्य मुक्तातपत्रयुगल्या कोटीरं सनाथयन् स्वावलोकनस्वच्छन्दनिर्गतस्तन[१२] पयोधाराभिषिक्तभुजान्तराल[१३] मानीय, समोदं सबाष्पगद्गदं ससात्त्विकविकारमङ्कमारोप्य, [१४]अदृष्टपूर्वमिव पश्यन्तीं जननीं रुक्मिणीं पुनः [१५]पुनः प्रणामादिभिराश्वास्य मातरमखिललोकानां त्रातारमापन्नदीनजनानां, जेतारममर्यादगर्व-पूर्वहशर्वरीचराणाम्, नेतारं षोडशसहस्रकुवलयाक्षीणाम्, हर्त्तारमानतमनोमालिन्यानाम्, स्मर्त्तारमतिरिक्तभक्तिकलितपत्र पुष्पफलाद्युपचाराणाम्, [१६]भोक्तारमखिलाध्वरवपाविमर्दानाम्, शास्तारं निशाचरसम्पदाम्, रन्तारं मुनिमानसपङ्कजानाम्, अनादिवाणीवेणीफुल्ल मल्लिकातल्लजायमानानर्घ्यशक्तिम्, साकूतमर्धापाङ्गप्रसरणमालोकमानं नन्दककृपाणं व्रजसुन्दरीप्राणं प्राणंसीत्॥

---

१. मै३. ०भुवनजयाम्० २. म१. ०तोष्टूय्य०

३. मै३. ०समुत्वर० ४. मै३. ०च्युतराज०

५. म१. ०रससेकवल्लभ०, मै१, मै२, मै३. ०रसोवल्लभ०

६. म१. ०स्पुरणात्कार०, मै१, मै२, मै३. ०घणघणारव०

७. मै३. ०वादिताम० ८. म१. ०परिसरत्०

९. मै३. ०त्वारवार० १०. म१. ०विचित्रतरगति०

११. म१. ०धृक्कृतपमान० १२. म१. ०पयोधराबिषिक्तमात्मानं०

१३. म१. ०मानिय्य० १४. मै३. ०अद्यष्ट०

१५. मै१, मै२, मै३. ०पुनः ०नास्ति। १६. मै३. ०भोक्तान०

लक्ष्मीकान्तोऽपि पुत्रं स्वसदृशविभवं तं परिष्वज्य दोर्भ्याम्
आनन्दाम्भोधिमग्नं निजहृदयपयोजातमुद्धर्त्तुकामः।
तत्तेजश्चण्डरश्मेरकलयदमितं वैभवं तादृशद्विट्
मत्तेभेन्द्राद्यकुम्भस्थलदलनललसच्छस्त्रधाराकठोरम्॥ ५९ ॥

इति श्रीमद्वाधूलकुलकलश[१] पाथोनिधिराकासुधाकरसर्वतन्त्र[२] स्वतन्त्रोभय वेदान्ताचार्य[३] वरदगुरुवरकरुणाकटाक्षलब्धभाष्यार्णवतात्पर्यकणेन, तदनु[४]ग्राहित पाणिनीयोदयनीयजैमिनीया-दिसम्प्रदायेन श्रीमत्कन्दालकुलतिलकचतुस्तन्त्रपारीणदिवाप्रदीपबिरुदाङ्कश्रीनिवासार्यतनयेन सहजविनयेन सुरसद्मगिरि[५] नगरवास्तव्येन नव्यदिव्यगव्यभव्यसाहिती[६]सम्प्रदाय-पारावारपारदर्शिना, वेङ्कटाचार्येण कलिते बाणासुरविजयाह्वये चम्पूप्रबन्धे प्रथमोल्लासः॥

❑ ❑ ❑

---

१. म१. ०जलनिधि०
२. मै१, मै२, मै३. ०स्वतन्त्र० नास्ति।
३. मै१, मै२, मै३. ०वरदाचार्य०
४. म१. ०ग्राहितजैमिनिय्योदयनिय्यसम्प्रदाय०
५. मै१, मै२, मै३. ०नगर० नास्ति।
६. मै१, मै२, मै३. ०सम्प्रदाय० नास्ति।

[1]श्रीसैन्धवकन्धराय नमः   श्रीरस्तु

द्वितीयोल्लासः

अमृतसदृशेर्वाजीवक्त्रे स [2]देवशिखामणिः
नयनलसितैर्मेधां सिञ्चन्[3] मदीयमुखाम्बुजे।
सरसमृदुलां वाचं मोचारसायनसन्निभां
विशदयतु मे [4]साक्षाल्लक्ष्यं प्रतिक्षणमीक्षणे॥ १॥

अत्यादरवत्या स तु रत्या शुभगत्या
प्रत्याहितदीप्त्या सुरसत्येव सुदत्या।
भोगैरविभागै[5] रनुरागैर्जुष्टः
परिदृष्टः परिपुष्टोऽन्वजनिष्टः(ष्ट)॥ २॥

ग॥

अलङ्कारवता स्वतारल्यभाजा भा-जाल-भास्वता, स्वतातसमशुभवता, भवता पद्मरिमहिमवता, हिमवता, समधैर्यसञ्चितसुखभुजा [6]भुजानुगतप्रतापश्रीमता, [7]मतार्थवशंवदबलवता, लवतारूपदीकृतविभववारिजातेन, वारिजातकरेण [8]करेण कलयता चापं, [9]चोपन्नगपन्नगाशनेन तेन रतिः विद्रुमलतेव सुरभूरुहेण, विद्यै(द्ये)व विनयवैभवेन, वीरलक्ष्मीरिव, महाराजभुजालम्बेन, मणिरिव तप्तकाञ्चनसङ्गमेन नानाविलासवैखरीभिर्निनाय चिरकालम्॥

१. म१. ०श्रीरामाय नमः०
२. मै१. ०दैवशी०
३. म१. ०मदीय्य०
४. मै१, मै२, म१ ०साक्षाल्लक्ष्म्याः०
५. मै१, मै, ० परभागैः०
६. मै३. ०भुजानुगत०
७. मै१, मै२. मतार्थ......बलवता०
८. मै१, मै२, मै३. ०करेण० नास्ति।
९. मै१, मै२, मै३. ०चापन्नविपन्नवपसन्नेन रतिः०

तस्यामाविरभूदिव[१] भूमिरखिलोक्तीनाममेयो गुणैः
आस्वादः सुधियामपार[२] जलधिस्सौन्दर्यवीचीतते:।
पुत्रो यादवगोत्रमित्रनिजचारित्रो[३] द्विषत्तासदः
शस्त्राशस्त्रिवदान्यधन्य[४] जनतामूर्धन्यजन्योद्भटः॥ ३ ॥

प्रद्युम्नो जनकः परं रतिरहो माता, पिता चेत्पितुः
त्राता सर्वचराचरस्य जननी [५]श्रीरेव शृङ्गारिणी।
रूपे सम्पदि [६]वैभवोन्नतिबलेष्वेतत्समः स्यात्पुमान्
[७]यद्यभ्राम्बुजलाभदीक्षिततपा [८]जायेत वन्ध्यासुतः॥ ४ ॥

बाणेनाप्यनिरुद्ध एव भविता [९]बालोऽयमित्याध(द)रात्
चक्रे चक्रधरोऽप्यवक्रमहिमोदग्रप्रतापक्रमः।
नाम प्रेमसमं [१०]प्रकामसुमनस्तोमानुमप्युन्मुखं
सारासारविचारधीरचतुराचारप्रचार[११] स्थिरः॥ ५ ॥

[१२]**अ**नर्घ्यसौन्दर्यघनप्रतीको
निज[१३] प्रतापौष्ण्यनिराकृतद्विट्।

---

१. मै१, मै२, मै३, ०भूमिरिव०
२. मै१, मै२, मै३. ०जलनिधि०
३. अत्र छन्दो भङ्गः वर्तते।
४. म१. ०जनमूर्धन्योद्भटः०
५. मै२. ०श्रीश्रीरेव०
६. मै३. ०वैभवोस्सति०
७. मै१, मै२, मै३. ०यद्यभ्राम्बज०
८. मै३. ०जात्रित०
९. मै१, मै२, मै३. ०बालोऽयमित्यादयत्०
१०. म१. ०चकार०
११. मै१, मै२, मै३. ०स्थितिः०
१२. म१. ०अय्यसौन्दर्य०
१३. मै२. म१. ०पौष्ण०

रुचा स भास्वानिव चारुसंविद्-

धरा[1] सुरद्रुर्विरराज राजा ॥ ६ ॥

(अस्मिन् [2]श्लोके पादचतुष्टयादिवर्णानां पठने अनिरुद्ध इति प्रतीयते)

विशालनेत्रो विपुलास्यचन्द्रः

प्रशासनाधीन[3] दिशाधिराजः।

अमेयभाग्यैरमरेशयोग्यैः

अमन्दभोग्यैरुदिरोदित(रधिरोहित)श्रीः॥ ७ ॥

[4]स च प्रतिदिनोदयोन्मुखविभूतिः छायानुषङ्गसमुज्ज्वलः, अद्वितीय[5] पराक्रमाक्रमणचक्रवर्तिविक्रमक्रमः, क्षणममर्य्यादखुरलीविहरणसार सास्फालनभुजो, भुजमृषामृथकलनेन क्षणमाकर्णाकृष्टशरासनः, निरातङ्कनिस्सरच्छरनिकरनिर्भिन्न-विविधदिव्यशरव्यवीक्षण(णा)श्चर्येण, क्षणमुत्तुङ्गतुरङ्गपुङ्गवविविध[6]धाटीपरि-पाटीकलितपट्टसयुगलीविचित्रचालनेन क्षणममलकाव्यकलाकलापालापरसिकसद्-हृदय[7]सवयोवचननिचयपरिचयेन, [8]क्षणमपारपाणिनीयोदयनीयजैमिनीयमुखतन्त्र[9] स्वतन्त्रविबुधगोष्ठ्या, क्षणं रसालङ्कारध्वनिगुणदोषविवेचनचतुरमहाकाव्यपरिशीलनेन, क्षणं सङ्गीतकलाभिज्ञवैणिकसङ्गृहीतातोद्यानवद्याभ्यासपाटवेन, क्षणं [10]सात्त्विकाङ्गिक-कमुखसकलाभि[11] नयनाट्यदेशिकविशदीकृतचतुष्षट्यङ्गसमेतसन्धिसन्धानकौशलेन, क्षणमखिलभुवनभरणसपत्न [12]हरणौपात्यकमित्रभेदसुहृल्लाभादितन्त्रपञ्चकसमेधित-प्रभुमन्त्रादिशक्तिलसितनीतिशास्त्रानुवचनेन, क्षणं विविधदेशसिद्धभाषाविशेषङ्ग्रहेण शैशवं

---

१. मै३, म१. ०सुरदृर्विरराज० २. म१. ०लोके०
३. मै१, मै२, मै३. ०दिशाधितराज० ४. मै३. सदप्रति०
५. मै१ ०पराक्रमश्रमणक्रीणित०, मै२०पराक्रीणित०, मै३. ०पराक्रमक्रमणात०
६. मै३ ०दाप० ७. मै१ मै२ ०समयोपवचन०
८. मै१, मै२. ०क्षणमसार० ९. मै१, मै२, मै३ ०तन्त्रनिबुध०
१०. मै१, मै२, मै३ ०सात्त्वक० ११. म१. ०नयनाट्य०
१२. म१. ०हरणौपैक०

क्षणयन्, यौवनमहाराजजैत्र-यात्राप्रारम्भ[१] सूचकनीलपताकयेव, समग्राक्रमणव्यग्रकामयौवनाभ्याम अविरोधाय कृतया स्वतनुराज्यविभागशासननील[२] शिलयेव, रोमलतया व्यञ्जित-हावभावादि-शृङ्गारचेष्टः, गुरुजनस्मरणापहृतस्त्रैणाभिलाषः, किञ्चित् कालमासामास ॥

[३]कुसुमविशिखः कोपाच्चापं करे कलयन्निज-
प्रतिमविभवे तस्मिन् बाणैर्जघान[४] हृदन्तरे।
तदनु [५]तदनु (तदिषु) क्षेपाद्रक्तं तदाशु महीविभोः
कुटिलजनता प्रायः कालानुचिन्तनतत्परा ॥ ८ ॥

[६]चिन्तादीने मनसि न पुनर्गन्धपुष्पादिलिप्या(प्सा)
तादृग्ग्रस्येद्वपुषि विमुखिता तस्य भूयो बुभुक्षा।
सख्या साकं न हि समुदभूदेकदा वा विवक्षा
कामस्याभूद्विशिखविततेस्तत्प्रतीके परीक्षा ॥ ९ ॥

गात्रं नैवास्ति, चापं कुसुममयमहो [७]वाहनं तस्य पक्षी
सेना नार्यस्तदीयाश्चलदलि[८] सदृशा दृष्टिकोणाश्च बाणाः।
एवं[९] भूतेऽपि साक्षाद्यम इव सततं बाधते पञ्चबाणः
नो चेत्सर्वेऽपि सर्वं स्वहृदयविषयं स्वानुरूपं भजेरन् ॥ १० ॥

निद्रा न द्रागुदिता स्मरविवशहृदस्तस्य तावन्निशान्ते
प्रीतिश्चातीव नासीद्धुतवहकणिकाकल्पमासीच्च तल्पम्।
सैकं त्वेकं वचोऽपि श्रवणकटुतरं मारुतभ्रूणवार्ता
तत्कालेऽभूत् स्मरार्त्या स्वमसमविभवा यादवक्षोणी(णि)भर्तुः ॥ ११ ॥

---

१. मै१, मै२. ०सूचका०
२. मै१, मै२ ०लतयेव०, म१ ०शैलयेव०
३. मै३. ०कलसुमविशिखा०
४. मै१, मै२, मै३ ०हृदन्तरं०
५. म१. ०तदनु तदनु......क्षेपाद्रक्तं०
६. मै३. ०चिन्ताप्रश०
७. मै१, मै२ मै३ ०वहनं०
८. मै२ ०दृशा०
९. मै२, मै३. ०भूते साक्षाद्यम०

च्चू ॥

तावत्कदाचन भगवत्[१] पराशरपुरातनतपश्चर्यापरिपाकपर्यायः, पदक्रम पूतलोकतया जटानुबन्धदेदीप्यमानतया तथागतकथाशतधाकरणजागरितो मूर्तिमान् वेद इव चक्षुषाप्यनुभाव्यः अनवरतमुखमथनपदयु गलप्रणिपतनमणिलसितमति[२] विलसदकृतहृदयरञ्जनतया द्विधापि [३]सुदृक्त्वमनुकूलयन्, मुखसुधाकरसमालोकनसमुपगतया, सुधाम्बुधिवीचिकयेव, अखिलवेदसारप्रकाशकतया, कृष्णभावं व्यक्तीकर्त्तुं धृतया अर्जुनमूर्त्येव, स्वमित्रमित्रश्रौत-द्वादशभावासहिष्णुतया स्वयमपि तथात्वम् आविष्कुर्वता किशोरसुधाकरेणेव सकलनिष्ठुरतमतमःस्तोमपराकरणकृतावतारेण सत्त्वगुणेनेव, सान्तरालधवलोर्ध्वपुण्ड्रेण पाञ्चरात्रतन्त्रं व्याचिख्यासुरिव, अनन्त[४] साधारणं [५]त्वैकान्तं किमपि बादरायणपदमाकलय्य तथाविधं नारायणपदमाकलयतो भगवतस्तादात्म्यं रत्नं निकषोपल इवोत्तेजयन्, [६]कमलाक्षमालासितवक्षस्थलः, ब्रह्माण्डकिशोरपरम्परां दशनकिरणधारयेवोज्जीवयन्, तुलसीमणिमालिकाविशदवैराग्यभूमा सदा द्वयानुसन्धानबन्धुर[७] मुखतया, प्रपञ्चब्रह्माद्वयत्वमन्यधयन्निव, अङ्गुल्यन्तरालपरिस्फुरदशुष्कदर्भपवित्रतया, ब्रह्मतत्त्वार्थनिर्णयं करबदरयन्निव, परमपुरुषपरत्वस्थापनविजयारब्धध्वजदण्डाभ्यामिव, बाहुदण्डाभ्याम्, अतप्ततनुतां तनुतां [८]नयन्तं कामबदरारिचिह्न[९] रुचं विकलयन्, सन्ततानु[१०] वर्तितचरमश्लोकोऽपि तपस्विनामचरमश्लोकः भागवताग्रणीः, आश्रयः शान्तिदान्त्यादिगुणानाम्, आकरो वैराग्यकाष्टानाम्, आदिविजयो, भगवद्विभूतिपारीणानाम्, आवासो [११]निगमान्त(न्ता)विरोध[१२] सम्पादनवैखरीणाम्,

---

१. म१. ०पराशन० | २. मै३. ०विमलसद०
३. म१. ०सुदृक्त० | ४. म१. ०साधारण०
५. म१. ०त्वैकान्तमपि किमपि० | ६. म१. ०कमक्ष०
७. म१. ०मुखरतया० | ८. मै१, मै२ ०म१. ०नयन्तीं०
९. म१. ०रुचि० | १०. मै१, मै२. ०वर्ति०
११. म१. ०निगमान्ततापादानवैखनीणाम्० | १२. मै३. ०सम्पान०

अशनिः शैवशाक्तेयजैनबौद्धचार्वाकादिदुर्मतमहीधराणाम् नाट्यरङ्गस्थलं कमलाकमन-वैभवविलासिनीनाम्, सत्यवतीगर्भाम्भोनिधिकौस्तुभो भगवानमेयचर्यः पाराशर्यः श्रीकान्तं [१]भगवन्तं नन्तुकामः किमपि रहस्यं वक्तुकामः द्वारकां निकषा समुपागमत्॥

ततः पतनभयाद्वामकरनिरुद्धोष्णीषाभ्यां दक्षिणकर[२] परिग्रहीतरजतदण्डाभ्याम्, [३]आप्रपदलम्बमानकञ्चुकाञ्चलतया सप्रतिपदस्खलनं सभयकौतुकप्रस्विद्यन्मुखम् उपसर्पद्भ्यां कञ्चकिभ्यां जय जय महाराज राजशेखरेति प्रत्यभिज्ञानपूर्वकं निवेदितमहर्षिसमागमः रत्नसिंहासनादुदयाद्रेर्बालभास्कर इव सत्वरमुत्थाय, सरस्वतीविलासाभिधानां वैराग्यशालां सज्जीकर्तुं परमभक्तं पवनव्याधिं नियुज्य, मङ्गलतौर्य [४]त्रिकश्रवणसविस्मयपौरसङ्कटनिवेशां राजवीधिकां चन्द्रेणेव नभःस्थलीं धवलातपत्रेण सम्भावयन्, अम्भोजसम्भवशम्भु-जम्भरिपुप्रमुखैः साञ्जलिबन्धं किञ्चिदानम्रोत्तमाङ्गं, अनुपदमावेदितस्वप्रयोजनैर्निजगुणा[५] स्वादनरसैकतानैः भ्रमरैः कल्पतरुस्तबक इव [६]संसेव्यमानः, नित्यकैङ्कर्यपरैरन्तरङ्गभक्तैः स्वपदप्रापणोचितैः समानीत [७]स्वाराधनोपयुक्तार्घ्यपाद्याचमनीयगन्ध[८] पुष्पफलादिसमुदयः, [९]लम्बमानकञ्चुकसज्जीकरणपरेण दारुकेण सङ्गतः, [१०]इत इतो गन्तव्य[११] मित्यवसरमभिदधता सात्यकिना आमन्त्रिततदागमनकारणः वेद[१२] राशिमुद्रीकरण[१३] दारुणेव, चन्दनमयेन पादुकायुगलेन पन्थानं तिलकयन्, मन्दहसित[१४] विलासेन पौरनारी[१५] कबरीः कोरकयन्, अखिलवन्द्योऽपि स्वयं मानुषानुजिघृक्षया सेवकतामुत्तम्भयन्, स्वेनाप्यनाकलितमिव [१६]च्छन्दोमयं ज्योतिरद्राक्षीत्॥

---

१. म१. ०पाराशर्यः श्रीभगवन्तं०
२. मै३, म१. ०परिगृहीतबलक्षरजत०
३. म१. ०अप्रपद०
४. मै२. ०त्रिश्रवणक०
५. म१ ०स्वादर०
६. मै१, मै२, मै३. ०सेव्यमानः०
७. मै३ ०वेदाराधनोपयुक्त०, म१. ०तदाराधनोपयुक्त०
८. म१. ०पुष्पादिसमुदयः
९. मै१, मै२, मै३. ०लम्बायमानः०
१०. मै१, मै२, मै. ०तत०
११. मै१, मै२, मै३. ०मित्यभिवधता०
१२. म१. ०राशी०
१३. म१. ०दारुणेन०
१४. म१. ०विलातेन०
१५. म१. ०कबरी०
१६. म१. ०चन्द्रोमयं०

[1]दूरादेव करे गृहीतकलशः पादौ स्पृशन् मस्तके
ध्यायं ध्यायमुदारतद्गुणगणान्मायामनुष्यो हरिः।
खर्वाङ्गेण च तेन [2]एष कुशलं पप्रच्छ तस्योन्नतः
त्रय्यन्तार्थनिरन्तरायकलनं सानन्दबाष्पोद्गमः॥ १२॥

स्वाहाकारवषट्क्रियानुकलितस्तोत्रैश्च शस्त्रैस्तपो-
वन्या किं कुशलं चकास्ति पृथुलाः पीनाश्च गावस्तथा।
साङ्गत्रय्यनुचिन्तनेन [3]विशदज्ञेयास्तपोभिर्भवत्-
[4]कल्पाश्छात्रगण(णाः) जयन्ति कुशलं [5]योगीश्वराणां गुरो!॥ १३॥

किमागमनकारणं शमदमाभिरामाकृते
तपोधनकृपावनोज्ज्वलसुपावनोक्ते सदा।
किरीटतटकोरकीकृत[6] भवदृशाज्ञे मयि
प्रकाशय वचः सुधाविलसितैः प्रसादोन्नतिम्॥ १४॥

यद्वा -

लोकोपकाराय भवादृशानां
सर्वाः क्रियाः स्वात्मसुखाय नैव।
विना तमोमग्नजगत्प्रकाशं
विभावसो नैव विशेषकार्यम्॥ १५॥

करतलकृतमोक्षे कर्मनिर्भेददक्षे
स्थिर[7] सदयकटाक्षे सिद्धवेदान्तदीक्षे।
विदितसकलवेद्ये वीतकामानवे(व) द्ये
भवतु मम मनीषा [8]त्वय्युदारे विदोषा॥ १६॥

---

१. मै३. ०दूरादेव गृहीतकरे०
२. मै३. ०पृष्टकुशलः०
३. मै१, मै२, मै३. ०विशालेच्छया०
४. मै३. ०तल्पारधात्रः०
५. म१. ०योगोश्वराणां०
६. मै३. ०भवादृशेज्ञि०, म१. ०भयावादृशज्ञे०
७. मै३. ०सवध०
८. मै३. ०त्वय्यदारे०

ग॥

इति निगद्य तं [१]मुनिकुल[२] शिरोमणिं विनयप्रसारितनैजभुजावलम्बद्वि–गुणितपुलकं प्रतिपदनमद्यादवकुलमङ्गलाशासन[३] मन्दमन्दगतिं हृदयोज्जृम्भितप्रमोदभरपूरायित[४] स्वेदकिञ्चिन्मृष्टपुण्ड्रं वैराग्यशालायां रत्नसिंहासन उपवेशयाञ्चकार॥

त्रय्यन्तोदन्तमूलैर्बहुकथकमनोवेद्यतत्वार्थगुम्भैः
[५]नो नीचैर्नापि रुद्रैर्मधुमधुररसैस्साधु तुष्टाव [६]भावैः।
(सेयं) [७]यं प्राचीनवाचासमगरिममुचा चातुरीचारुवाचा
स्वाचा[८] राचातमोचाफलरससरुचा चालयन् सन्मनांसि॥ १७॥

जगज्जननरक्षणक्षपण[९] दक्षिणायानवद्यैः
[१०]गुणैः [११]प्रगुणितात्मने सततक्लृप्त[१२] सद्वर्त्मने।
अशेषवपुषे निशाचरमुषे ततश्श्रीपुषे
नमो विमलधर्म(र्मि)णे भवतु ते परब्रह्मणे॥ १८॥

सनातनझषात्मना सकलवेदहर्त्ता(र्त्रा) त्त्वया
हतः खलु स सोमकाभिधनिशाचरो वारिधौ।
तदादिवसुधासुधाशनगणस्य जीवातवे
श्रुतिः प्रभवति प्रभो मुरहराम्बुजातेक्षण!॥ १९॥

देवान् जीवयितुं निशाचरगणान् हन्तुं पयोधेर्यशो
दातुं सज्जनरञ्जनं कलयितुं [१३]कौर्मं शरीरं वहन्।

---

१. म१. ०मुनिकुशल०
२. मै३. ०शिरोमणि०
३. म१. ०मंमन्दगति०
४. मै३. ०स्वेतशिदशात्०
५. मै१, मै२, मै३. ०नोनीचैर्मधुमधुर०
६. म१. ०शारिं०
७. म१. ०हेयं०
८. म१. ०राचान्त०
९. मै२. ०वीक्षणा०
१०. मै२. ०गुणैः गुणिता०
११. मै३. ०द्विर्गुण०
१२. मै१, मै२, मै३. ०सद्वन्मने०
१३. मै३. ०कार्मी०, म१. ०कौर्मशरीरं०

इन्द्रं सार्थकनामधेयमतनोर्दन्ताबलेन्द्रादिभिः
स्वामिन्नाश्रितरक्षणक्षमदयाधौरेय! पद्मेक्षण!॥ २० ॥

लक्ष्मीसन्ततसङ्गतिप्रविलसत्[१] क्रोडाय सर्वोन्नत-
क्रीडाय क्षपितारयेऽस्तु कुहना[२] क्रोडाय ते मङ्गलम्।
दंष्ट्रादीप्रवसुन्धराय सकलक्षेमावलम्बायते
तादृक्पालितसिन्धुराय जगदाधारास्फुरद्भक्तये॥ २१ ॥

[३]स्तम्भाद्योऽ[४] वततार निष्ठुरनखज्वालाकरालाकृतिः
वक्षः संक्षपयन् हिरण्यकशिपोर्जिष्णुं परं प्रीणयन्।
लोकावग्रहभञ्जनं च कलयन् शिष्टाद्यसंस्थापनम्
प्रह्लादं च नयन्त्स एव कुहनापञ्चाननात्मा भवान्॥ २२ ॥

यत्पादाम्बुझरी मृडस्य मकुटे मन्दारमालायिता
लोकानद्य पुनाति पापकलुषान्मुक्तिं प्रयच्छत्यपि।
तस्याहं कुहनावटोर्बलिशिरः कोटीरचूडामणी-
भूतात्माङ्घ्रिनखद्युतो(ते)स्तव पदद्वन्द्वं सदा भावये॥ २३ ॥

यद्दोः स्तम्भविजृम्भमाणपरशुस्वर्भानुरत्युन्नतं
दृप्यन्मानसराजमण्डलमलं क्रूरः क्षणादग्रसत्।
भूयो दिग्वनितापयोधर[५] तटीकल्हारमालोपम-
[६]स्फायद्दिव्यपराक्रमः स च भवेत्तेजोविशेषो न किम्॥ २४ ॥

---

१. म१. ०क्रोदाय०
२. म१. ०क्रोदाय०
३. मै१, मै२, मै३. ०स्ताम्भाद्यो०
४. मै३. ०अवतानिष्ठुर०
५. मै३. ०तप०
६. मै२. ०स्फायदिव्य०

[1]किञ्च–

ग॥

वाल्मीकिना मन्थानमहीधरेण आपादचूडमनुकलितस्य भावत्कदिव्यावतार महिमाकूपारस्य, तुषारकणिका[2]रेणुपरागांशेन मानसमानन्दयन् जिह्वां कृतार्थयामि।

श्रीमत्सकलसुरवरसन्ततानु[3] भूयमाननिशिचरकृतसवनभङ्ग, दुरित[4]सङ्गविकलान्तरङ्ग, धरणीरमणीदुर्भरव्यसननिर्भरपशुपतिप्रजापतिदीनदीनस्तुतिवचनसमाकर्णनसमुत्तेजित-निरुपमकरुणारसकल्लोलमावितीर्ण, सकलदुरिततिमिरमिहिरायमाणकलशपारावारान्तरीप-कमलाकुचतटीगाढाङ्कपालीकेलीलोल, श्रीभगवत्स्वपरिपूर्णावतरणप्रतिज्ञाविरचित बहुकालतनयविरहविकलमनोरथदशरथसङ्कलितपुत्रकामेष्टिप्रसन्नदिव्यपुरुष करसरसिज-कनत्कनकपात्रसम्पन्नपरमान्नग्रसनव्याजरायन्मन्दिरीकृततद्वरवर्णिनीभवत्कौसल्या-गर्भमुक्तास्फोटानर्घ्यदिव्य[5] भव्यस्थूलमुक्तामणिना, स्वापृथक्सिद्धदिव्यास्त्रीभवत्-सुदर्शनपाञ्चजन्यस्वशेषतैकतानशेषसमारचितभरतशत्रुघ्नलक्ष्मणाभिधानमानुष-मूर्तिनिरन्तरसंसेवितसन्निधानेन राधवत्त्वेऽभवत्इत्यादिवचनसहस्रजोघुष्यमाणस्वान-पाथिताककमला कलितवसुन्धरा[6]गर्भाविर्भावपूर्वकप्रकाशितजनकराजकुलकलशजलनिधिना, शैशववशीकृतसकलवेदार्थानुष्ठानगरिष्ठवसिष्ठमुख[7] सङ्गृहीतसाङ्गसोत्तमाङ्गपुराणवाणी-चतुष्टयतदुपकरणमीमांसाव्याकृतितर्कमुखस[8] कलाकलाध्ययनधिषणानुष्ठानप्रकाशितसर्वज्ञ-सार्वशक्त्यादिकल्याणगुणगणेन, [9]अतिदृप्तदशलपनदवदहनदंदह्यमानावनीमुनीशान[10] वनीकदीन

---

१. म१. ०किञ्च० इति नास्ति।

२. म१. ०रेणु० इति नास्ति।

३. मै१, मै२. ०श्रूयमाण०

४. मै१, मै२. ०भङ्ग०

५. म१. ०मालिका०, मै३. ०भव्यभव्यस्थूल०

६. मै१, मै२, मै३. ०गर्भाविर्भावपूर्व०

७. म१. ०सङ्ग्रहीत०

८. म१. ०अध्ययनधीषणानुसङ्ग०

९. मै२. ०अतिदृप्तलवसालन०

१०. म१. ०वनीपकदी०

नदीनसुरनदीनविधुमुखसकलजङ्गमाङ्गमरक्षासमारब्धदशरथकुमारतापदेशावतरणेन, निजमु(म)ख[१] रक्षणसविनयकुशिकतनयप्रार्थना[२] वशंवदस्वपितृवियोगसम्पादित-तदन्तेवासितासमासादितबलातिबलासमुन्मूलितताटकता सम्मोदिततन्मुन्युप-दिष्टदुर्धषजृम्भकादिविविध[३] शस्त्रतापूर्वकमखरक्षणरिपुशिक्षणहृष्टजनकमहाराज-स्वयंवरास्थानी[४] निबिडितनरपतिसमक्षानन्यसाधारणकपर्दिशरासनद्विधाकरणसमुत्सिकित-जानकीभुजलताभुजावितीर्ण हारसमाकलिततत्परिणयानन्तरजिगमिषितायोध्येन, अतिहृष्टदशरथ[५] तन्यतन्यमानस्वाभिषेकावसर[६] दुष्टकेकयात्मजावरद्वयवितरणवशंवद [७]तन्नियोगसङ्कलितजटावल्कलधारणवनवाससज्जगुहमैत्रीतरणितीर्णगङ्गाप्रवाहेन, दुर्बोधतनु[८]विराधविध्वस्तमुनिसमय[९] बन्धकबन्धशूर्पन(ण)खादिनिर्मूलनधुरीणशरपरम्परा-विदारितखरादिचतुर्दशसहस्रनिशिचरपरिवृढेन, पवनतनयविरचिततरणिसुतसमागम [१०]कलिततदहितपुरुहूतसुतमथनेन, बाणकोण[११] झर्झरितपयोनिधिना, नलविरचितसेतुहेतुक-समुद्रतरणकपिसैन्यसंक्षोभितलङ्कासाम्राज्येन, बहुतरनाराचधारादावानलशलभीकृतदशग्री-वकुम्भकर्णघननिनद कुम्भनिकुम्भधूम्राक्षादिसकलरिपुकुलेन, जानकीकल्पलतासमालिङ्गितेन, सकलसुरासुर [१२]परिवृढदृढमकुटीतटीनरीनृत्यच्चरणनखरविधुकिरणविकरणामृत-किरणशेखरीकृतधरणीसुरचरणरथचरणशकुन्यरुणतरुणकिरण[१३]भरणायमानवितरणोद्युक्त-करुणावरुणालयेन, मदमेदुरनिशिचरवरनिकरविषतरुसमुदय विदलनकहोरकुठारायमाण

---

१. म१. ०रक्षणपरसविनय०

२. मै१. ०वंशवदस्वपितुवियोग०

३. मै१, मै२, मै३. ०शास्त्रापूर्व०

४. म१. ०निबिडनपति०

५. मै२. ०तन्तन्यमान०

६. म१. ०रुष्ट०

७. म१. ०तन्नियोगेन सङ्कलित०

८. मै३. ०विराध्य

९. म१. ०मुनिबन्धकबन्ध०

१०. म१. ०कलिततहित०

११. मै१, मै२, मै३. ०जर्झरित०

१२. म१. ०परिवृढमकुटी०

१३. म१. ०किरणस्फुरणायमान०

काण्डकाण्डशरकाण्डोद्दण्ड[१] कोदण्डदण्डदोर्दण्डचण्डिमापाण्डित्यमण्डलीकुण्डलीकृताखण्डलसूनुयशोमण्डलेन, भीषणमखदूषणपरदूषणमुखवेषणकृततोषणहितपोषणमुनिभाषणमणिभूषणजय घोषणसुमवर्षणरिपुघर्षणकृत[२] चक्रवर्त्तिस्फूर्तिकेन, [३]कल्याणफ(फु)ल्लत्पुण्डरीकलोचनेन, अतिविशाल[४] वक्षःस्थलरङ्गस्थलनानटन्नानामणिहारलतावितानगभस्तिसहस्रशेखरिताविरलद्युतितरलतरलद्युमणिशोशुभ्यमानोदयदरीकुहरायमाण गभीरनाभीसमुदितशृङ्गारलतिकाराराज्यमानकोमलताश्यामलरुचिकोमलतनुसजलजलद चपलचपललीलाकूलङ्कषविकटकटितटस्फुटघटितहाटकपटकपटकान्तिपूरेण, अयोध्यानगरक्षीराकूपारनिस्तुलकौस्तुभायमानसहस्रकनकस्तम्भकान्तिसम्भिन्नातिसुन्दरललनासहस्रकरकलितकनककुम्भनीराजना(न)सहस्र-देदीप्यमानसकलविद्याविशारदवन्दि [५]बृन्दजो(ज्ञे) गीयमानत्रिभुवनविजयबिरुदा[६] वलीपाठेन, नानारत्नोपहारसङ्कुलिततत्प्रतिभट[७] क्षितिपतिसाष्टाङ्गप्रणामसमयकिरीटतटप्रच्युतहारमालिकारङ्गवल्लीभाभास्यमानविविधभूषणभूषितदिव्यदुकूल [८]धार्यनन्यसाधारणसौन्दर्यनरी[९] नृत्यद्वार[१०] वनितापदगुरुजन्मञ्जीरकिङ्किणीघलंघलरवमुखरितातिवेल[११] कालागरुधूममञ्जरीरञ्जितरत्नमहा[१२] मण्डपानुपम-नरेन्द्रमणिविलसितेन, अतिसुन्दरमुखचन्द्रनिरीक्षणपरवशमुनिजनसमभ्यर्थितनिजरतिवितरेण, विनतकामितकल्पनचिन्तामणिना, मन्दहासचन्द्रिकाविमलरदनकुन्दमुकुलेन, कनकलतयेव संजीवितया, स्थिरयेव तटिल्लतया, बडबाज्वालये[१३] वानुष्णाया, शारदाकलङ्क परिपूर्णसुधाकरकलयेव, नित्यप्रकाशया,

---

१. म१. ०कोदण्डदोर्दण्ड०

२. म१. ०चक्रवर्तिकीर्त्तिमूर्त्तिस्फूर्तिकेन०,

३. मै१ ०कल्याणफल्लत्पुण्डरीक० मै३. ०कास्यात्पुल्पुण्डरीक०

४. म१. ०वक्षः स्थली०

५. मै२. ०जोश्रीय्यमान०, म१. ०चेश्रिय्यमाण०

६. मै१. ०विरुदावन्द्यपठता०, मै२. ०विरुदापद्यपटन०

७. म१. ०क्षितिपक्षाष्टगप्रमाण०

८. मै३, म१. ०धार्यनननन्यसाधारण०

९. मै१, मै२, मै३. ०वनितापद(कु)जन्मञ्जरी०

१०. मै१, मै२, मै३. ०धूमञ्जरी०

११. मै३. ०मण्डपानुपमविपुलनरेन्द्र०

१२. मै२. संजीविततया०

१३. मै१, मै२. ०वानुषणया०

शृङ्गारलतयेवाविनाभूतया, शक्त्येवाप्रतिहतया, मारणमन्त्रसिद्ध्येव निशिचर-कुलवेतालसमुदयस्य आकर्षणमन्त्रसिद्ध्येव सकलसौभाग्य[१] सञ्चयस्य, कुठारधारयेव रावणविषद्रुमस्य, कर्पूरधूल्येव सज्जनदर्शनस्य, कादम्बिन्येव भक्तजनमयूरनिकरस्य कयापि लोकातिशायिसौन्दर्य[२] सौभाग्यसौशील्यसौहार्द्रलावण्यतारुण्यकारुण्याद्युपेतानन्यशरण्य-रक्षणागण्यमहिमया, वीक्षामात्रसमासादितसौभाग्यविनतजनता[३] तोष्टूयमानया, यामिनीकमनकमनीयमुखया, सीताभिधानया, रमया परिष्कृतवामाङ्कपीठेन, पुरोभाग-स्थितपवनतनयकरसरसिजसंसेव्यमानदक्षिणपादतलेन, उभयपार्श्वावसद्वशिष्ट-वामदेवादिशमधनविशदीकृततत्त्वार्थसमाकर्णनसमुत्सुकितहृदयेन, अव्याजकरुणाशालिना, हतवालिना, विचक्षण[४] लक्ष्मणकलितमुक्तामयसितच्छत्रेण, शुभरत[५] भरत शत्रुघ्न-करान्दोलितचामरपवनपीतनिदाघजलशीकरेण, पदरेणु[६] सञ्जीविनीसञ्जीवितशिलाविग्रहेण, सकललोकनिदानेन, विहितसकलार्थ[७] दानेन रक्षितदीनेन, कृतनिशिचरपतिविरामेण, आवासीकृतमुनिहृदयारामेण, [८]अविरताङ्कपालीमिलितरामेण, कुरुबिन्दमणि-बृन्दनिन्दितपुरन्दरकोटकीटेन किरीटेन, प्रभाविजितरविमण्डलेन कुण्डलेन, संराजदलकेन तिलकेन, धावल्यविजितनीहारेण मुक्ताहारेण, सङ्कीलितहरिन्मणिरुचिविजितमयूरेण केयूरेण, नानारत्नरुचिभूम्ना मेखलादाम्ना, विततविबुधमनोरञ्जितेन, मञ्जीरशिञ्जितेन चात्यर्थकमनीयेन, शङ्करेणेवाचलात्मजापरिष्कृतेन, चतुर्मुखेनेव सत्यलोकवत्सलेन, त्वयेव विराधासुरञ्जितवता किष्किन्धानगरेणेव, [९]तारावलीसङ्गसमुत्सुकितसुग्रीवेण, मन्दरेणेव कृतजलनिधिकबन्धमथनेन, पाण्डवसमुदयेनेव, कुम्भसम्भवगृहीतशरासनागमेन, दुर्जनेनेव विश्वामित्रानुकूलस्वभावेन [१०]अखण्डभूमण्डलादि(धि)पेनेव, सुबाहुसङ्गतप्रमथनविजयेन,

---

१. मै१, मै२, मै३. ०सञ्चरयस्य०

२. म१. ०सौन्दर्यभाग्य०

३. म१. ०तोष्टूय्यमानया विप्रभुविमानसरसहितया,
एकैकमक्षरं विहाय पठनीय्यं यामिनी०

४. म१. ०लक्षण०

५. म१. ०भरतकरान्दोलित०

६. सञ्जीविना०

७. मै१, मै२, मै३. ०दानेन दीनेन०

८. म१. ०आकलिताङ्कपाली०

९. मै३. ०तावलीसङ्गमसमुत्सुक्ति०

१०. म१. ०आखण्ड०

हेमन्तसमयेनेव, निर्मूलितमेघनादेन, कुम्भिकुम्भस्थलचलदङ्कुशेनेव, कुम्भकर्ण-मूलच्छेदकारिणा, कण्ठीरवेणेव[१] सदृशवदननिक्षिप्तपञ्चत्त्वेन, वीरवैष्णवेनेव शैवधर्मभञ्जनरञ्जित[२] विबुधेन, अवाप्तजगज्जयेनेव सबलपादोत्सारितवैरिदुन्दुभिमूर्तिता, अजकुलसम्भवेनापि मनुजरूपिणा, एकान्तिनेव सुमन्त्रहितेन, कलिकालेनेव कुजातिप्रियकारिणा, [३]तक्राटेनेव शरभङ्गविहितस्नेहेन, कन्दर्पकेतुनेव वासवदत्तान्तरङ्गरथाधिरूढेन, [४]वृत्तशास्त्रेणेव [५]भजनरसमय(त)सद्वृत्तगणेन, श्रीमद्वाल्मीकिजन्मसरस्वतीकुन्तलान्तरदरदलितमल्लिकाम-तल्लिकायमानयशोविसरेण, शरणा[६]गतसन्त्राणबिरुददृष्टान्तीकृतकाककङ्कमिहिरसुत-विभीषणेन, आधारेण सकलजगताम्,अन्तर्यामिणा जङ्गमाजङ्गमानाम्, आदिकारणेन चिदचिद्विततीनाम्, अवधिना अभयप्रदानवैखरीणाम्, अम्बुधिना अनन्त[७] कल्याणगुणानाम्, अर्कातपेन सज्जनचक्रवाकानाम्, अद्भुतफलेन इक्ष्वाकुकुलपारिजातानाम्, आदर्शेन मुक्तिप्राप्ति[८] प्रतिबिम्बानाम्, आरम्भेण [९]सौजन्यसम्भ्रमाणाम्, आस्वादेन वेदान्तसुधानाम्, अन्तकेन दुरितनिचयानाम्, आविर्भावेन समस्तकल्याणानाम्, श्रीरामारामवक्षः स्थलहारामलमुक्ता-तारामनोज्ञेन अतिवेलधवलधवलनयनान्तकान्तिप्रतिक्षणजनितकलशाम्बुधिशतसहस्रेण, अश्वमेधशतारम्भ [१०]सम्प्रीणितसकलामरगणेन, [११]श्रीमत्सीतालक्ष्मणभरतशत्रुघ्न-हनुमत्समेतश्रीरामचन्द्ररूपेण त्वयैव सनाथोऽहं सनाथोऽहम्॥ अधुना त्वयापि सर्वे दुष्टाः निगृहीताः॥

---

१. मै१. ०सरसवदनसंक्षिप्त०, मै३ ०सरसदशवदननिक्षिप्त०
२. मै१, मै२, मै३. ०विबुधेन०
३. मै१, मै२. ०तकताटेनेव०
४. म१. ०शास्त्रगुणेनेन०
५. मै१, मै२. ०भजनसमय०
६. मै१, मै२, मै३. ०कल्याणानाम्०
७. मै१, मै२, मै३. ०कल्याणानाम्०
८. मै. ०प्रतिबिम्भ्यानाम्०
९. मै१, मै२, मै३. ०सौजन्यसंग्रहाणाम्०
१०. मै३. ०सम्प्रणितशकल०
११. म१. ०श्रीमता लक्ष्मण०

परं तु ॥

रोगशेष इव बाणनामको
बाधते बुधजनान्निरन्तरम्।
शम्भुपालित[१]कवाटवेदिकः
जम्भवैरिकृतजानुमर्दनः॥ २५ ॥

लोकास्तस्य वशे त्रयोऽपि भगवान् धाता वृथा [२]ताम्यति
प्रायः पाचकतामुपैति दहनो गोप्ता न कश्चित्सताम्।
कान्तं कन्तुसमानकान्ति[३]मधिकप्रत्यर्थि[४]दन्तावल-
[५]प्रोद्यत्केसरिणं नितान्तदुरित[६] ध्वान्तान्तकं त्वां विना॥ २६ ॥

अवध्यत्वं लब्ध्वा पशुपतिवरात्पन्नगविभोः
समानाकारेणोन्नतभुजसहस्रेण लसितः।
अधस्साले ज्वालाजटिलपरिघे[७]भीतिविकलो
मदोन्मत्तः केनाप्यपरिहृतभाग्यो विजयते॥ २७ ॥

तद्रूपानल[८] दग्धवैभवसुरादीशादिरक्षाकृते
देव! त्वत्करहर्म्यवासरसिको ज्योतिर्मयः कश्चन।
तादृग्दानवराजहंसपटलीकालाम्बुदो मादृशा-
ज्ञानस्वान्तदिवाकरः प्रभविता श्रीचक्रराजः पुमान्॥ २८ ॥

---

१. मै३. ०कवाटि०
२. म१. ०तादृति०
३. म१. ०मधिकश्रान्तार्त्तिदन्तावल०
४. मै३. ०दन्तावले०
५. मै१, मै२. ०प्रद्योतेकेसरिणं०, मै३ ०पोलद्यत् केसरिणम्०
६. मै१, मै२. ०ध्वान्तान्तकः०
७. म१. ०भीतिविहिलो०
८. मै३. ०दग्धवैरिभव०

इति वदन्तमुदन्तमतिस्फुटं
मुरहरस्तमुवाच महामुनिम्।
भवदनुग्रह एव मयीदृशः
घटयति प्रसभं रिपुभञ्जनम्॥ २९॥

पुरैव माया मम तत्सुतामिषात्
जनिं गता बाल्यमतीत्य कामपि।
दशां विलासैर्जगतां विमोहिनीं
उपेत्य तद्दर्पहतिं [१]करिष्यति॥ ३०॥

इत्यादि माधववचांसि [२]निपीय भूयो
मत्वा तृणाय स च बाणमुदारतेजाः।
ध्यायंश्चिरं हरिगुणान्विबुधाग्रगण्यः
सिंहासनादवततार निजाश्रमाय॥ ३१॥

ग॥

तावत् पद्मिनीवल्लभे(भो)ऽपि पश्चिमाचलशिखरसमुदित्वरसरसीकृतस्थिति-पद्मिनीमुखकमलान्युल्लासयितुमिव [३]अनयोर्मुनिवरमाधवयोर्बाण[४] भञ्जनलोचनापरिशील-नजनितापराधं, दूरस्थितमिषेण परिहर्त्तुकाम इव प्रतीचीविलासिनीं पृथुतरपयोधरपरिष्वङ्गेण सरागं विधातुकाम इव, लोकलोचनतया लोकलोचनानि तमिस्राञ्जनेन रञ्जयितुं [५]चुल्लभिषजं कमपि वरुणनगरे अन्वेष्टुमिव, मुनिवरविनिर्गमनसमय[६]निरर्गलनिर्गलितभेरीदन्धणाङ्कार-

१. मै१, मै२, मै३. ०करोति० २. मै३. ०निपीय्य०

३. म१. ०मुनिर्मार्बाणभञ्जना० ४. मै१, मै२. ०भञ्जनापरिशीलन०

५. मै१, मै२, मै३. ०चुल्लभिषजं वरुणं० ६. मै१, मै२, मै३. ०निर्गलित०

कातरवरुणनगरकातराक्षीराश्वासयितुमिव,[१]स्वमण्डलान्तर्वर्तिपरमपुरुषप्रियां [२]तज्जनकपश्चिमपयोनिधिं नेतुकाम इव आगमिष्यतो गोरुदारिकस्य दर्शनं परिहर्त्तुकाम इव, प्रतीचीवरविलासिनीपरिष्वङ्गलोलुपनिशाकमनपरिभवव्यग्रकालमहाभटकरतलोपस्कृतप्राग्दिशाभाग[३] शतघ्नीमुखनि:सृतपृथुलतप्ताय: पिण्ड इव भीमेऽन्धकारे कुरुक्षेत्र इव नभ: स्थले गदामिवोत्कटरुचिं परिगृह्य [४]कालयोगात्प्रहर्त्तु[५]मुपसर्पयिष्यति, अप्रतीकाराज्जलस्तम्भनमेव स्वतनुरक्षणाय शरणं मन्वानो सुयोधन इवापर[६]वारिनिधौ मज्जति।

सरोवरजलेषु जलाधिपस्य प्रचेतसो दुकूलेष्विव पुण्डरीकाणि (केषु) पद्मिनीपलाशशिलाफलकेषु प्रक्षाल्य दिवा चण्डातपे वितत्यान्त[७]र्गृह्णत्सु धनिकस्य धननाशानन्तरं पूर्वरक्षितकृतघ्नजनेष्विव मिलिन्दहतकेषु कमलसरांस्युत्प्रेक्षमाणेषु अकुलीनविद्या[८]वैभव इव सत्पथविरोधिनि तम: कदम्बे, [९]मिथा(थो) विरहसमयपरिशुष्यत्कण्ठ[१०] कूजितेषु चक्रवाकेषु वाचामगोचरानन्दपूरेषु पौरचारेषु, [११]कृतशयालुजागरूकजनविचारेषु चोरेषु, तरणिवियोगखिद्यमानकामिनीमुखपयोजाश्वासनसमुगताभिर्दूतिकाभिरिव दीपिकाभि: प्रकाशसुन्दरेषु मन्दिरेषु रत्युचितसामग्रीसङ्ग्रहणसूचक[१२] वीणातन्त्रीमिलत्कररुहासु करारोहासु निशाकालसर्पं जग्धुमसमर्थेषु इव आश्रित[१३] रूपकण्ठेषु नीलकण्ठेषु कामिनीपदकमलविन्यास[१४] धन्यधन्यकेलीमन्दिरदोला मञ्चाधारकनकरज्जुघण्टा[१५] रणितमणितानङ्गसङ्गरप्रियप्रशंसावैखरी[१६] सहस्राव्यक्त

---

१. मै३. ०स्वमण्डलान्तर्वर्त्तित०

२. म१. ०तज्जनकं चरमपयोनिधि०

३. मै३. ०शतघ्नमुख०

४. मै१, मै२. ०कालययोधाप्रहर्तुमुपसर्पधिर्ष्यात०, मै३. ०कालयोत्प्रहर्तुमुपसर्पयिष्यति०

५. म१. ०घुपसर्पाश्यति०

६. मै१. ०वारिनिधो०

७. मै१, मै२, मै३. ०गृह्वत्सु०

८. म१. ०वैभवसत्पथ०

९. मै१, मै२, मै३. ०विधो०

१०. मै२. ०कूजितचक्रवाकेषु०, म१. ०कूजितवक्रपाकेषु०

११. मै३. ०कृतश्यालजागरुक०

१२. मै३. ०वीणातन्त्रमिलत्कर०

१३. मै१, मै२. ०रूपकण्ठेषु कामिनी०

१४. म१. ०धन्यकेली०

१५. मै१, मै२, मै३. ०मणितानङ्गसङ्गर०

१६. मै१, मै२, मै३. ०सहस्र०

वचनविच्छिन्नसन्दर्भश्रवणदत्तादरखिन्नखिन्नबहिर्वितर्दिकाकृतशयनचिरविरहित-पुरुषनिःश्वासबोधिकासु, वीथिकासु, भगवानपि सायन्तनराजवैभवयोग्यां काञ्चिदास्थानीमासाद्य प्रदीपसहस्रमण्डितकरकिङ्कर[१]कृतवन्दनगणिका[२]तिवेदितायव्ययक्रमः, तदधिकारिनिवेदितगज-हयादिसकलसैन्यक्षेमः, वन्दिकृतस्तुतिपद्यघोषमन्दीकृतदुन्दुभिस्वनः, अतिविलक्षणवार[३]सुन्दरीकराम्बुजलोलुपमरालायमानचामरवीजितोभयभागः, अन्यया पुरःसमाकलित-कनकताम्बूलकरण्डः, अपरया समानीतपाद्यकलशः, एकया सकङ्कणझण[४]झणत्कारं चालिततालवृन्तः, कयाचित् कलित[५]चन्दनपुष्पादिपरिकरः, [६]अवचनीयप्रथमरसाङ्कुरः मन्दमन्दमन्तःपुरमयासीत् ॥

॥ द्वितीयोल्लासः समाप्तः ॥

❑❑❑

१. मै१, मै२, मै३. ०कृतवदनगणितनिवेदि०
२. म१. ०निवेदिदायव्रयक्रमः०
३. म१. ०सुन्दर०
४. मै३. ०झणोत्कार०
५. मै३. ०चन्द्दनपुष्पादि०
६. म१. ०अवचनीय्य०

तृतीयोल्लासः

हयवदनरदनकिरणैः
वदने मम सिञ्च नवसुधा[१]सारम्।
[२]अखिलान्तरात्मभूत-
स्वाश्रितजनरक्षण[३]दीक्षविभो!॥ १ ॥

ग॥

अथ कदाचन सकलर्त्तुशिखामणिःप्रतिदिनोच्चतरगुलुच्छ[४]स्वच्छतया विपुल-विपुलचकोरविलासतया अतनुभूतविकासकलितया किञ्चित्पल्लवानुरागवशंवदतया वयोविलासानुविद्धतया प्रतिदिनस्तनोन्नतिनयनवैपुल्यविलक्षणकान्तिविटमनोहारित्त्व-यौवनसम्पत्त्या तरुणीभिरिव पुष्पसमयं व्याचक्षणाभिर्लताभिः समरकल्याणमण्डपीकृतनिकुञ्जः [५]मलयदेशिकमारुताचार्यजैत्रयात्रा पूर्यमाणकाहलीकेली [६]स्थूललक्षपिकस्वरविकस्वरः, स्वरमणविरहरमणीद्विगुणी भवन्मान्मथज्वरचिकित्साकत्कमलमुकुलनिष्यन्दिशिशिर [७]मकरन्दकृततत्तन्नयनाञ्जनः, विटाग्र [८]गण्यसरण्नुगततरुण्य [९]गण्यसुखशरण्यलीलारण्य-पुण्याहवाचकमधुकरश्रोत्रियसमार्जितधनपञ्जशङ्काकरकनककुसुमपिशङ्ग[१०]दिशान्तः

---

१. म१. ०धाराम्०
२. मै२, मै३. ०अखिलाश्रितात्मभूत०
३. मै३. ०दीक्षत०
४. म१. ०स्वच्छतया विपुलचकोर०
५. म१. ०मलदेशिक०
६. म१. ०स्थूलअक्षपिकस्वर०
७. म१. ०मकरन्दीकृत०
८. मै३. ०गण्यसरण्यनुकृत०
९. म१. ०गण्यशरण्य०
१०. म१. ०दिशान्तर०

केलतीकामुकानङ्गराज्यश्रीपाणिग्रहणसमुचितकुरुविन्दखचितसिंहासन रुचिवदान्यपुष्पित-किंशुकसाङ्गारकमठनिशितीक्रियमाणनाराचसन्दिह्यमानपुष्पन्धयस्तनन्धयकिसलय-डोलारोहणसमयपापठ्यमानमाधवचरित्रविचित्र [1]झङ्कारश्रवणदूरपरिसर्पद्वीरशैव-मण्डलीभवद्विरहोत्कण्ठितापटलीसकलाङ्गुलिप्तभसितानुकारिपाण्डिमव्याजयशः कदम्बः, कदम्बकुसुम [2]कदम्बविपुलाम्बरनिकेतनवातपोतधूत[3] सकलवनतिलकतिलकसलय-किसलयपताकापालिकासमुल्लसत्पल्लवजलरसालजालसालसालविचित्रपवित्रात[4] पत्राकुण्ठ-कुहूकण्ठ [5]कण्ठीरवनिनादायमानपञ्चमवादित्रसमुदञ्चनस्फुरितानङ्गजैत्रयात्रा [6]समुचिताशोक [7]कुरवकमरुवकविमलकमलविरहिजनमनोबन्दीवलयकुवलयविलासा [8]वक्राङ्गचक्राङ्गमुख [9]निखिलसेनासन्नाहव्यञ्जितस्वयौवराज्याभिषेकभीतकातराक्षीस्तनदुर्गवशीकरण-सूचकमकरिकामनोज्ञविभवसहचरीकृत[10] स्वेदझरीपरीवाहः, अनङ्गकृतचिन्तादोला-समारूढकामिनीमानसभेदन शतधारायमाणमलयमारुतकिशोरमन्दमन्दगमनविकीर्ण-कुसुमपराग-मोहनचूर्णमुह्यमानजनसमुदयसमुज्ज्वलमधुभावोऽपि हंसजालकं सललितं पुष्यन्नपि पूतनालीकखेदहरोऽपि माधवः, अखिलसुमनस्सुजातिप्रियोऽपि जात्यप्रियः, सौस्नातिको मरालानाम्, आकर्षकः कनकसौरभतारतम्यानाम्, प्रातिकूलिको मुनिवर[11] तपश्चर्यामर्यादानाम्, [12]दिशान्तविश्रान्तरतिकान्तकीर्तिकान्ताकुन्तलान्तानतितान्तलतान्तायमानोदन्तदुरन्त-वैभवनितान्तकान्तो वसन्तः प्रादुरासीत्।

---

१. म१. ०झङ्कारश्रवणभयमारपरिसर्पद्वीरशैव०
२. मै१. ०कदम्बक०
३. मै१, मै२, म१. ०धूत० इति नास्ति
४. म१. ०पत्रलकुण्ठ०
५. मै३. ०कण्ठीरवन्विनदाय०
६. म१. ०समुचितलशोक०
७. मै३. ०शोकरुवकमरुत्व०
८. मै१, मै२, मै३. ०वक्राङ्गचक्राङ्गमुखिल०
९. ०मै३. ०मुखनिसेना०
१०. म१. ०स्वेदपरीवार०
११. मै१, मै२, मै३. ०तपश्चर्चामर्यादानाम्०
१२. मै२. ०दिनान्तविश्रान्त०

तस्मिन् समये प्रगल्भवरवर्णिनीकलितपुरुषायितपरस्पर[1] मेलनत्रुटितमणिहार-प्रक्षिप्तमुक्ताफलपुष्पाञ्जलिविलसितम्, काञ्चीकिङ्किणीकलकलमिलितमञ्जुमञ्जीर-शिञ्जितरञ्जितमणितानवद्यातोद्यमेदुरम्, अतिसुन्दरमुखेन्दुपरिरम्भपरस्वेदतारकापटलम्, रतिगोपनकृतनीलावरणशङ्काप्रदलोलकचभरकालिन्दीप्रवाहव्याकुलितनितम्बसैकतकुच-गिरितटम्, अनुकलजरीजृम्भपरीरम्भकलनमर्दितस्तनकुम्भिकुम्भसृणीभूतस्वरमणपुनर्भवक्ष-तरत्नणपेशलम्, प्रतिकल [2]वीटीकलनसज्जकरसरसिजकनत्कङ्कणरणितकोमलम्, अपरिमितानन्दसन्धानमीलितनयनचकोरम्, रतिसाहसदर्शनहृष्टस्मरमहाराज-कृतकनकाभिषेकायमाणभ्रश्यद्भूषणरत्नम्, प्रतिक्षणसन्धुक्षितदन्तक्षतपीतसुधारसं किमपि कौतुकमशेषलोकमुल्लासयाञ्चकार॥

शतं पुत्रान् लेभे बलिरति[3] बलः शोणितपुरे
स च ज्येष्ठो बाणो निशिचरकुलानामधिपतिः।
पुरारातिस्फायन्[4]मधुरकरुणालब्धमहिमा
महावीरो रेजे दशशतभुजास्तम्भलसितः॥ २॥

बाणस्याभूत्तनूजा गणनविरचनादूरलावण्यपुञ्जा
घोणालङ्कारसाचीकृतकनकसुमाशोणभूताक्षिकोणा।
स्त्रैणालङ्कारशीला सकलजनमनस्सौधसञ्चारिणी [5]साऽ-
प्येणाङ्कोदारवक्त्रा कुसुमशरकरस्मेरबाणासनभ्रूः॥ ३॥

[6]उषा मधुतुषारवाक् स्ववपुषा तटिच्छ्रीपुषा
तुषारकिरणत्विषा वरवृषाप्तिमासेदुषा।
[7]मुखेन विशिखेन वारिजसखेन लोकत्रयी
सुखावगतिसाधनं विरुरुचे रतीशस्य सा॥ ४॥

---

१. मै१, मै२, मै३. ०मेलत्रुटित० २. मै३. ०वीपी०
३. म१. ०बलान्० ४. म१. ०मधुकरण्णा०
५. मै३. ०का० ६. मै३. ०पुषाम मधुतुषार०
७. मै३. ०सुखावहावातिपरं विरुरुचे०, म१. ०सुखा वः गतिः०

वेणी नूनमुदारनीलमधुपश्रेणी वधूटीमणेः
वाणी दिव्यसुधाधुनीसुरसरद्वेणी मनोहारिणी।
श्रेणी क्षोणिधरोन्नतिः सरसिजे पाणी कृपाणी तनुः
तूणीका च(राभ)भुजा स्मरस्य रमणी सा स्त्रैणचूडामणिः॥ ५॥

अपि चकोरकमालिकया स्तन-
द्वितयकोक[१]युगी परितुष्यति।
कमपि चन्द्रमुपेत्य सतीमणेः(णिः)
घननिनादमवाप्य च हंसकौ॥ ६॥

गोष्ठी चेदोष्ठरीतेर्भवति वनमहो याति बिम्बस्य लक्ष्मीः
व्यक्तिश्चेदुक्तरीतेर्भजति परमियं गोस्तनीमौस्तनीतिम्।
दृष्टा चेद्दृष्टिरस्या विषसरसि कृतं मज्जनं पुण्डरीकैः
वार्त्ता चेद्वक्त्ररीतेर्हिमकरहतको रात्रिसंचारमेति॥ ७॥

[२]मलिनं चिकुरे मनोज्ञ[३]मक्ष्णोः
मधुरं वाचि महन्नितम्बदेशे।
मृदुलं पदयोर्महस्तदेतत्
[४]सततं नैव जगत्त्रये विभाति॥ ८॥

वक्त्रे लोचनयोः कपोलफलके नासापुटे भ्रूयुगे
यामोष्टे कुचयोर्नितम्बयुगलीसम्भावनायामपि।
राकापूर्ण[५]सुधांशये जलजये यादर्शये [६]मञ्जये
स्मायेद्योद्धनये सुबिम्बफलये क्षोणीध्रये क्षोणये॥ ९॥

---

१. म१. ०युग०
२. म१. ०मदिन०
३. म१. ०रुक्ष्णोः०
४. म१. ०सदृश०
५. म१. ०शशाङ्कये०
६. म१. ०मुदञ्जये०

वलीतरङ्गमालिकामुपेत्य जृम्भितेम्बुधौ
स्वदेहकान्ति[1] संज्ञिके मुखेन्दुपूर्णतावशात्।
जपानुरागतो द्विजा ममज्जुरोष्टदीधितौ
सरस्वतीझरे [2]मनोजनीं (मनोजनिं) [3]विशेषतो भजन्॥ १० ॥

अहितां सा [4]पिहितायां
सुमनोभिस्समभजत्परं वेण्याम्।
चित्रमिदं कुम्भजाति-
प्रायो यस्यास्समुद्र[5]सामोदः॥ ११ ॥

तस्या विस्तार्य मञ्जीरकघननिनदे जृम्भमाणे स्ववेषी
[6]मायामोद्या(हा)नमोघान्कलयति सुमनोवैभवं तैरशेषम्।
हीनं दम्भोलिकेल्या भुवनमपि समालोच्य [7]मोदादुदीर्णो
लावण्याम्भोधिमध्यादिव धरणी(णि)धरौ तत्कुचौ दीप्तिभाजौ॥ १२॥

कस्तूरीतिलकं करोति कुतुकं यस्या निटाले पयो-
जाते बम्भरडिम्भबृन्दमिव सम्पूर्णेन्दुबिम्बेऽङ्कवत्।
यद्वा तत्सदृशं तदेव यदिदं धत्ते मनोज्ञः सदा
पूर्णे वक्त्रसुधाकरः चतसृभिः षष्ट्या कलाभिर्युतः॥ १३ ॥

---

१. म१. ०संज्ञिते०
२. मै१, मै२, मै३. ०मनोजल०
३. म१. ०विषतो भजन्०
४. म१. ०पिहितायासु०
५. मै३. ०सामो वः०
६. मै३. ०मामोयान०
७. मै३. ०मोदादुपर्णो०

मुक्ताहारनटीगुरोः स्तनभरादभ्यस्तनाट्यश्रियं
लब्ध्वा सूक्ष्मपटच्छलां यवनिकां सत्सूत्रधारोज्ज्वलाम्
वाक्केल्या विशदं ननर्त हि रुचं [१]विस्तार्य काञ्चिद् ध्रुवाम्
तादृक्षामुखलक्षणज्ञहृदयानन्दानुसन्धायिनि ॥ १४ ॥

स्तनौ तुङ्गौ नाभीगहनगहनश्रीर्मुखविधुः
गभीरस्तन्व्यङ्ग्या विपुलविपुले लोचनपुटे।
नितम्बश्चे[२] द्रुद्रस्तदपि च वलग्नेन किमु वा
तपस्तप्तं क्षीणं गुरुतरभ[३]राक्रान्तमपि च ॥ १५ ॥

लावण्याख्याधमर्णेऽवयवधनततिं प्राप्य [४]मत्तेभगत्याः
तारुण्याख्योत्तमर्णस्सह मदनमहालग्न[५]केनापयातः।
मुक्ताहारैश्च किञ्चिन्मलिनमुखतया [६]भाविनामानु[७]तापात्
स्वामिद्वन्द्वात् तनुश्रीरपि खलु तनुतामाप मत्तेभगत्याः ॥ १६ ॥

कदाचित्सा मल्लीघुमघुमितशय्यामुपगता
सखीभिस्सानन्दं परिहसनशीलोक्तिभिरपि।
तदा भावि स्प(स्व)प्ने स्वरमणमुपादातुमिव सा
पुरा निद्राचेटी नयनमररं साधु पिदधे ॥ १७ ॥

---

१. मै३. ०विस्तार्यकात् ध्रुवाम्०
२. मै१, मै२. ०दुन्द्रः०, म१. ०दून्द्रःत०
३. म१. ०क्रान्तिमपि यत् ला०
४. म१. ०मत्ते हितस्याः०, मै३. ०मत्तेवा तस्याः०
५. म१. ०केनोपयातः०
६. मै२. ०भाविकामा०
७. मै३. ०तात् स्वपि०

तदा खलु ॥

कामानुरूपनिजधामा[१] पुमानमलभूमास्पदात्मपटिमा
रामामणेर्नयनसीमामगात्स्वशुभनामातिदूरजडिमा ।
[२]स्त्रीमानसाब्धिशतधामा सुमालिमधुसामाजधुर्यवचन-
स्थेमा समानतनुभामान्यरीतिरतिसामाजकेन्द्र[३]गरिमा ॥ १८ ॥

कालानुजात[४]घननीलालका[५]वृतनिटालातिरम्य[६]तिलकः
स्वालापकेलिजित[७] लीलाशुको मदन[८] वेलायिताक्षिरुचिरः ।
बालार्कमण्डलविशालात्म[९] दीधितिकिसालातिरम्यविभवः
[१०]श्रीलास्यदेशसुरसालानुकारिकरलीलासमुज्ज्वलतरः ॥ १९ ॥

हसन्कुसुमकार्मुकं तनुरुचा स चामीकरा
चलोन्नतियुजा भुजायुगलचुम्बिजानुद्वयः ।
सुवर्णमणिमेखलाघटितपीत[११] कौशेयकः
शुचिस्मितसुधाझरीसुरुचिरास्यपङ्केरुहः ॥ २० ॥

विचित्रमणिभूषणैः हृदयपोषणैर्भाषणैः
समस्तरमणीमनः कृतगवेषणैरीक्षणैः ।
पुरःकमलकाननं [१२]विकचमल्लिकासन्ततिं
किरन्निव मनोहरन्निव चसर्प वामभ्रुवाम् ॥ २१ ॥

---

१. मै१, मै२, म१. ०पुमानलभूमा०, मै३. ०पपिमा०
२. मै१, मै२. ०श्रीमानस०
३. मै३. ०गरिमां०
४. मै१, मै३. ०घनलीला०
५. मै३. ०लकावृनिटाल०
६. म१. ०विभवः०
७. मै२, मै३. ०लीला(मृतो)मदन०
८. मै१, मै२, मै३. ०वेलाधिततक्षि०
९. मै२. दीधिता सालातिरम्य०, मै१, मै३. ०दीधितिसालातिरम्य०
१०. मै३. ०श्रीलान्यदेश०
११. मै२. ०कौशकेया०
१२. मै१ मै२. ०विम्ममल्लका०, म१. ०विमलम्मल्लिका:

मरालयुवमञ्जुवद्गतिररालनीलालकः
करालकरवालसङ्घटितमर्मवर्मोज्ज्वलः।
करादृतशरासनः [1]सुमशरासनः [2]श्रीपथा-
निरासनववैभवः कुलधरा[3]धरेन्द्रोन्नतः॥ २२।

चिरत्नरत्नसङ्गतद्युरत्नदीपभूषणः
सपत्नयत्नभञ्जनैकनूत्नवीर्यभीषणः।
पयोधिजापयोधरस्रवत्पयोझरीसमं
शुचिस्मितं वहन् मुखे दिशः प्रकाशयन् रुचा॥ २३॥

स लावण्यरत्नाकरः कामिनीनाम्
मनोज्ञैरुदारैर्गणैर्मानहारी।
महारत्नहारी समुद्यद्विहारी
मनोजानुकारी मनोज्ञोक्तिधारी॥ २४॥

तदा खलु [4]श्रुतिवेद्यगुणां परां देवतामिवेज्यासमये बहिरुद्गतां दहर[5]कुहरादि-निरुद्धप्रकाशमूर्ति[6]योगिनीव सा मौनमुपेत्य पक्ष्मकवाटपाटनधुरन्धरेण आनन्दबाष्पबिसरेण अर्घ्यपाद्ये परिकल्प्य [7]अधरामृतेनाचमनं वितत्य, अनङ्गमुज्जृम्भितसपुलकस्वेदझरेण स्तनकनककलशेन शुद्धामृताभिषेकम् आकलय्य पर्यङ्कालङ्कारासनं प्रापय्य स्ववीक्षणरुचिकमलमुकुलैरभ्यर्च्य निःश्वासमारुत [8]समुज्ज्वलितविरहानलप्रतप्तप्रणय-सारकालागरु[9]धूमायमानैः अलकैः धूपयित्वा ध्यायन्ती चिरमपरिमिताम्बुधि मग्नेव तस्थौ॥

---

१. मै१, मै२, मै३. ०सुमनशरासनः० २. मै२. ०श्रीपथा०
३. मै१, मै२, मै३. ०धरेन्द्रोन्नतिः० ४. मै३. ०श्रुतिवेद्यगुणो परां०, म१. ०श्रुतिवेद्यगुणां परा०
५. म१. ०दहरकुहरातलनिरुद्ध० ६. मै३. ०योगिनी वीनावकाशमुपत्ये०
७. मै३, म१. ०अधरामृतेनाचमनिय्य० ८. मै१, मै२, म१. ०समुज्ज्वलित०
९. मै१, मै२, मै३. ०धूमायमानौपरलकैः०

तावत्स्वप्ने क्षणदया समं विराममुपेयुषी अनुरागविह्वला सा विकीर्णमिव परितः विक्षिप्तमिव प्रकृतौ विलीनमिव, महति [१]विलिप्तमिवाहङ्कारे, विदग्धमिव तन्मात्रेषु, विस्तारितमिव भूतेषु, [२]विज्वलितमिव ज्ञानेन्द्रियेषु, विघटितमिव वागादिकर्मेन्द्रियेषु, प्रोतमिव प्राणभृति, गुम्भितमिव बुद्धौ सूत्रितमिवान्तर्यामिणि (नि) सूचितमिव चेष्टितेषु, [३]प्रत्युप्तमिव वचनेषु, प्रकाशितमिव स्मृतिपरम्परासु, प्रतिफलितमिव श्रावणरीतिषु, बिम्बितमिव काष्ठासु, निबद्धमिव कलासु, अनुकलमपि [४]दृष्टमिव, स्पृष्टमिव, [५]श्रुतमिव, घ्रातमिव, आस्वादितमिव, स्मृतमिव, तं स्वाप्निकपुरुषं पश्यन्ती, मुह्यन्ती, किमपि किमपि विलपन्ती, [६]प्रतिपदं भ्रश्यन्ती, मग्नेन विरहपयोनिधौ, भग्नेवाकाण्डे, भुग्नेव [७]शोकविषमविषसरसि उदिद्वग्नेव [८]सर्वथा, असहनीयवियोगशोकतरल[९]हृदया, स्मरविशिखचयदलितधृतिविसरहतिकलितमतिविरति जडसदृशनिजविद्धतिदुर्लक्ष्या, [१०]कामप्यनङ्गद्र(द)ष्टां, भुजङ्गतोऽपि दुष्टां चेष्टामाजगाम॥

तदा [११]सख्यस्तस्याः किमपि [१२]कथयन्त्यः स्ववशतां
विनेतुं नो शेकुः स्मरशरसमाक्रान्तमनसः।
दृढे ध्वान्ते लोकं कबलयति खद्योतततयो
यतेरन् किं काष्ठानिचयविशदीकारविभवैः॥ २५॥

१. मै२. ०विलुप्तमिवाहङ्कारे०
२. मै१, मै२, मै३. ०विज्वलतमिव०
३. म१. ०प्रातमिव प्रभृति०
४. मै३. ०स्पष्टमिव०
५. मै१, मै२, मै३. ०शृतमिव०
६. म१. ०प्रतिपदं पदि भ्रश्यन्ती०
७. म१. ०शोकविषसरसि उद्विग्नेन०
८. मै१. ०सर्वथा सहनीय्य०, म१. ०सर्वथा असहनीय्य०
९. मै३. ०इत्दयास्सरविशिखचरमदलित०
१०. मै१. ०अनङ्गदृष्टां भुजङ्गतोपि०
११. मै३. ०सख्यःसुतस्याः०
१२. म१. ०कथयन्तः०

शय्यां मल्लीसमाजैः [१]कुमुदकुवलयैरुत्तमाङ्गोपधानं
चर्चा पाटीरगन्धैः कमलदलपरिस्पन्दनैः शीतवातम्।
कुर्वन्त्यस्ताः सखेदाः [२]स्मरजनितमहातापशान्तेर्निदानं
किं वा कार्यं कथं वेत्यविदितविषयाः स्तब्धदेहा बभूवुः॥ २६॥

तत्रान्तरे–

कुम्भाण्डपुत्री कुतुकादुपेत्य
सम्भावयामास हि चित्ररेखा।
गम्भीरवाचा स्मरशौर्यतप्ताम्
अम्भोरुहाक्षीमतिदीनचित्ताम्॥ २७॥

बाले [३]प्रालेयधामा मलिनरुचिमगादम्बुजे मीलिते सा
तान्ता गाङ्गेयवल्ली स्फुरति न हि कुतो विद्रुमस्यापि लक्ष्मीः।
मौनेनालं गिरीशोऽप्यतनुशरहतः [४]प्राप्तकामस्तनुत्वं
तस्मादस्मासु मुग्धे विशदय वचनैर्मोहक्लृप्तामवस्थाम्॥ २८॥

त्रिलोक्यां वा यस्मिंस्तव हृदयरक्तिस्तमधुना
दृशोः साक्षाल्लक्ष्यं सुदति करवाणि स्फुटधृतिः।
कुतो वैषावस्था तव समुदभूद्दिष्टविभवात्
उषे शेषे कस्मात्परिजनविशेषेऽनभिरुचिः॥ २९॥

---

१. मै३. ०कुसुमकुवल०
२. मै१, मै३. ०स्मरचरित०, मै२. ०स्मरचित०
३. म१. ०प्रालेयधारामलिन०
४. मै१, मै२, मै३. ०प्राप्तुकास्तनुत्वं०

इत्यालपन्तीं कथमप्युपात्त-
प्रज्ञा तदा बाणसुताऽप्युवाच।
अलभ्यलाभैकमनोरथाया
वृथा वचोविस्तरवैभवो मे॥ ३०॥

स्वप्ने कश्चन सुन्दरेन्दुवदनः [१]साक्षाद्रतीशाकृतिः
दृष्टः [२]स्पष्टमनोज्ञभूषणगणः श्रीमान्विशालेक्षणः।
नानादिव्यकलानुरञ्जितमना नूनं रुचा भास्करः
स्त्रीणां मन्मथमन्मथो निरुपमाऽक्षुण्णप्रतापो युवा॥ ३१॥

[३]तदीयदिव्यसौन्दर्यकाननकण्ठीरवतामापादितेन चक्षुषा इतरेन्द्रियस्तम्बेरमेषु [४]निगृहीतेषु दुःसहवेदना त्वयैव रक्ष्याऽहं केनाऽप्युपायेन तत्समागमं सम्पादयितुं त्वमेवालम् इति चित्ररेखायै विज्ञापयामास॥

सापि [५]स्वयोगविभवसाक्षात्कृतचतुर्दशभुवनाकारं, कलाभिज्ञ[६]प्रथमगणनीयवैभवा सद्य एव अपरिमितसौन्दर्यसिन्धून् [७]सुरासुरबन्धून्, पुरन्दरप्रमुखाननिमिषान् गानकला-पारीणकृतगर्वान् गन्धर्वान्, रम्भादिमनोहरान् किन्नरान्, पातालवासिनो वासुकिप्रमुखान् मध्यमलोक[८]महनीयानतीता[९]ननागतान् वर्त्तमानान् सौन्दर्यादिसम्पन्नान् शिबिनलनहुषादीन् पृथिवीपालशिरोमणीन् [१०]भगवन्तं तं गोपिकाप्राणवल्लभं वासुदेवं तत्तनूजान् साम्बप्रद्युम्नप्रमुखान् चित्रे विलिख्य दर्शयामास॥

---

१. म१. ०साक्षाद्द्रतीशाकृतिः० २. म. ०स्पृष्टमनोज्ञ०
३. मै३. ०तदीय्यदिव्य०, म१. ०तदिय्यदिव्य०
४. मै३. ०निगृहतेषु० ५. म१. ०स्वयोगविभव०
६. मै३. ०प्रमदगणनीय०, म१. ०प्रथमगणनीय्य०
७. म१. ०सुरपुरबन्धून्० ८. म१. ०महानिय्यात्०
९. म१. ०अन्वर्तमानान् शिबिबल० १०. म१. ०भगवन्तं गोपिका०

चित्रे विलोक्य निखिलानपि सा कृशाङ्गी
पुत्रे हरेः पृथुलदीप्तिवितानभाजि।
स्वप्नानुभूतपुरुषेण समं स्वरूपं
दृष्ट्वा सलज्जवदना स्फुरितस्मिताऽभूत्॥ ३२॥

तदनु सा विदग्धजनशिरोमणिः स्वकरकौशलं प्रकाशयितुमिव प्रद्युम्नतनूभव-मनिरुद्धाभिधानमतिकोमलतनुमद्भुत[१]सौष्ठवमनर्घ्यभूषणमधिकदर्शनीयम्अलीलिखत्॥

सुतनुरतनुमोदाद्वीक्ष्य कान्तं युवानं
स्मरशरविहितेव प्राप मूर्च्छामवस्थाम्।
कथमपि पुनरेषा लब्धसंज्ञा[२] सखी तां
शरणमुपगताऽभूद्रक्ष रक्षेति साध्वी॥ ३३॥

तावत्कुमुदिनीभुजङ्गः प्राचीहर्म्यगवाक्ष इव, रात्रिकृष्णकरकलित[३]-नवनीतगोलक इव, स्फटिकदर्पण इव प्राच्याः [४]हीरकन्दुक इवानङ्गसाम्राज्यलक्ष्म्याः, [५]सुधालिप्तशराव इव नभः केदारस्य [६]हरिणमदचित्रकसमुज्ज्वलितवदनमिव निशायाः शिशूचक्रमिव, प्राचीललनायाः, उदयाचलसिंहासन-मधिवसतो मदनमहाराजस्य धवलकौशेयपृष्टोपधानमिव, उदयमहीभृतः किरीटमिव अद्भुतफलमिव, व्योमतरोः कामिनीमनः कनकनिकषोपल इव कण्ठीरव इव दुरन्तध्वान्तदन्तावलस्य [७]परशुरिव प्रणयकलहविषद्रुसमुदयस्य

१. म१. ०सौष्ठवमनर्घभूषणं०
१०. मै१, मै२, मै३. ०सखीं ताम्०
३. मै२ ०नवनीश०
४. म१. ०हीरकन्तुक०
५. मै१, मै२, मै३. ०सधालिप्त०
६. मै२, म१. ०हरिणनदचित्रकसमज्जीलत०
७. मै१, मै२, मै३. ०परशुरिव विषद्रुसमुदयस्य०

भाग्यपरिपाक इव क्षीरवारिधेः, यशःखनिरिव, व्योमकमलायाः, हीरमञ्जूषेव शृङ्गारविलासानाम् बलिदीप इव नभः कासारस्य, सुवर्णताम्बूलभाजनमिव, जिष्णुहरितः, अमृतकलश इव [1]गीर्वाणानाम्, [2]उत्तेजनमिव रतिसौरम्भमणीनाम्, प्राणप्रतिष्ठेव विटविरहाणाम्, अभयप्रदानमिव चकोरकान्तानाम्, मौनव्रतमिव चक्रवाकचेष्टानाम्, सञ्जीवनमिव तिग्मकिरणतप्तभुवनस्य, आम्रेडितमिव मदनपराक्रमस्य, सकलकलासान्द्रः, पूर्णचन्द्रः प्रादुरभूत्॥

ततःक्रमेण निशाकरकलितनभश्चालिनी[3]रन्ध्रततिरिव, नभस्सरस्समुदित [4]कुमुदावलीव, अनङ्गमहोत्सवव्यञ्जकसत्पथराजवीधिकान्यस्तदीपावलिरिव, निशावधूटीतिमिर-कबरीविरलमल्लिकामतल्लिकामालिकेव नभः पयोनिधितमिस्रतरङ्गचलितफेनशकलसमुदय इव कुमुदिनीकम्रमृगेन्द्ररुचिबिसरनखर-दलितनभस्तमः कुम्भीन्द्रकुम्भ स्थलविकीर्णमुक्ता-राजिरिव तारावलिरुल्ललास॥

चित्ररेखापि-

योगं कंचिदुपेत्य हृत्सरसिजे[5] नत्वा हरिं श्रीपतिं
लब्ध्वा तत्कृपया बलं प्रतिभटप्रागल्भ्यदर्पापहम्।
सेयं गन्तुमियेष बाणतनयाप्राणप्रतिष्ठाकृते
कुम्भाण्डस्य कुमारिका सकुतुकाटोपा तदा द्वारकाम्॥ ३४॥

आश्रित्य सा नूनमसह्यवेषम्
उषामनस्तोषकृते जगाम।
सरांसि चन्द्रस्य कलेव सर्व
कल्हार[6]पाणी प्रियकारणाय॥ ३५॥

---

१. मै२. ०गीर्वाणासाम्०
२. मै२, मै३. ०उत्तेजिनमिव प्रणयकलहसौरभमणीनाम्।
३. मै३. ०रन्ध्र इततिरिव०
४. म१. ०कुमुदावलि०
५. मै१, मै२, मै३. ०मत्वा०
६. मै१, मै२, मै३. ०पालीप्रिय०

कर्णालम्बितहीरकुण्डलरुचा नासाग्रमुक्तात्विषा
सेयं दन्तमरीचिकाभिरभितो मार्गं तमस्संहतिम्।
छिन्दन्ती निजवेगदूरचकितस्फायत्तरक्षव्रजं
विन्ध्यारण्यमवाप वारिजमुखी नानामृगैराकुलम्॥ ३६॥

॥ चू ॥

तत्र खलु

क्वचनतपस्विजनतपश्चर्यासमास्तीर्णकुशकाशद्विगुणशाद्वलभक्षणदत्तक्षणहरिण-गणनिर्भयसञ्चरणपूतोभयतटविटपिविटपस्फुटकेकिकेका-समुदञ्चितमनोज्ञाम्, मज्जनसज्जनिर्जरमत्तकाशिनीमुखचन्द्रमुकुलीभवत्पद्मपराङ्मुखसितरच्छदसुदती-समालिह्यमानतत्करकमलरुचिप्रवालसान्द्राभ्यन्तरपुलिनाम्, पुलिनसन्निवेशसुखनिद्राण-किन्नरीकुचतटस्पर्श[१] परिमलितसमीरकिशोरादनस्पन्दमानाजगरकलेबराविशेष-लताकुञ्जसम्पदम्, [२]रोधस्संरूढतरुवरकुसुमपराग[३]पङ्किलकज्जलमानुषवचननिशमन-स्तब्धतनुनक्रचक्र[४] समालोड्यमानगन्धसिन्धुरागाम्, कैलासतटीमिव शैवालापशोभिता-मार्याङ्घ्रिविन्यासधन्यसोपानां च, शरत् सम्पदमिव [५]प्रसाद-प्रसाधितदिशावकाशाम्, क्वचिदुन्नतगन्धशैल [६]स्फालनात्यन्तजर्झरिततया ब्रह्मण्यसंस्पर्शकलुषविकलां सुरझरीं शुद्धिं नेतुं कृतोद्योगामिव, आपयोनिधिकूलमुद्रच्छतया कलित[७]पुष्पकन्दुकक्रीडामिव, प्रतिपदभ्रममाणावर्त्तततया, कुलालसदनलक्ष्मीमपहसन्तीमिव, अप्रतिहतप्रसृतिमपि भङ्गानुकलिताम् सरसकमलोज्ज्वलामपि नीरसहिताम्, सर्वशर्मदां नर्मदाम्, विरजां मुक्तावलिरिव [८]दिवसश्रियं चन्द्रिकेव हर्षाविर्भावं हंसपालीव तीर्त्वा क्षुल्लकलनागुल्म-

१. म१. ०परिमेलितसमीर०
२. मै३. ०मोधस्सरूढ
३. म१. ०पङ्किलजलरज्यज्जल०
४. म१. ०समालोच्यमान०
५. म१. ०प्रसाद० इति नास्ति०
६. म१. ०स्फालनोत्पतझरतया०
७. म१. ०पुष्पकुन्तकक्रीडामिव०
८. मै१, मै२, मै१. ०दिवसपिण्डाम्०

किञ्चित्प्रकाशितखड्गचर्मोष्णीषैः करतलकलितद्व्यरत्निमात्रस्थूलमुसलैः ध्वनिमात्रज्ञेयसकलकर्त्तव्यैः दुरासदवागुरासहस्रवेष्टितमृगमृगैः [1]भर्त्र्यय मर्दय मारय भर्जयेति निष्ठुरवचनमुखरमुखैः, व्याकुलितपर[2]शिखरैः, शबरैः, परिगताम्, [3]अन्यत्र गिरिदरीचरच्चमरीनिनदमुखरीकृतगुहाविनिर्गतहर्यक्षनादभीत[4]कुञ्जरधावनवेगत्रुटितनानाशाखिशिखा[5]निष्यन्दसारघुमघुमितोपत्यकाम्, जलाशयविहरणहर्षकृतपलायनकुलायविषाण[6]कर्षणदर्दुरगिरिकटकचत्कुरङ्गनयन सफलीकरणचुञ्चुपुलिन्देन्दीवरेक्षणासन्दोहपदार्णोजालत्तकचित्रितशिलातलाम्लानगानविधानसानन्दकिन्निरकलकण्ठीपरिरम्भणपरकिंपुरुषसमुदयाम्, सन्ततसमारब्धाध्वरतपस्विजननिबिडपर्णशाला[7] सहस्रधान्याम्, कामपि वन्यामतीत्य उपवनसङ्केतशालानिर्णिद्रविटमनोरथपूरण[8]व्याप्रियमाणजारकान्तां द्वारकां तामद्राक्षीत्॥

कान्तानां कुचयोः कपोलफलके कर्पूरलक्ष्मीं किरन्
मल्लीकोरकमञ्जिमानमधिकं मध्ये कचं मानयन्।
काञ्चित्पीनकटीतटे च कलयन् कान्तादुकूलश्रियं
चन्द्रो मध्यमवाप सान्द्रकिरणो व्योमाम्बुधेरब्जवत्॥ ३७॥

विद्यावशात्सा क्षणमात्रमेव
सौधेषु कन्दर्पसुतं विचिन्त्य।
मल्लीमिलन्मञ्चनिषण्णमेनं
करे गृहीत्वा स्वपुरं जगाम॥ ३८॥

॥ इति तृतीयोल्लासः समाप्तः॥

❑❑❑

---

१. म१. ०भर्त्र्यय भर्त्र्यय मर्दय मर्दय दूरय भञ्जय भञ्जय०

२. मै१, मै२, मै३. ०शिखरैः परिगण० ३. म१. ०अन्यतः०

४. मै३. ०कञ्जरभावनवेतात्रुटित० ५. म१. ०निष्यन्दिसार०

६. मै१, मै२, मै३. ०कर्षणदुर्दर० ७. मै१, मै२, मै३. ०निबिडपूर्णशाला०

श्रीसैन्धवकन्धराय नमः

चतुर्थोल्लासः

यत्केलीसदनायते श्रुतिवचश्चूडाद्वयीसन्ततिः
यद्भूमस्तुतिपद्यपाठककलामङ्गीकरोति स्मृतिः।
यत्कान्तिः सुरराजराजमुकुटादीनां शिरोभूषणं
[१]तच्छ्रेयाद्धृदये हयाननपदाम्भोजं [२]मदीये सदा॥ १ ॥

शोणपुरे बाणसुता प्राणहितं [३]तं च [४]पञ्चबाणसुतम्।
[५]प्राणंसीदेणाक्षी तपसा लभ्यं स्वभाग्यपरिपाकम्॥ २ ॥

सौधे [६]रत्नमये वितानपटलीनद्धान्तराले मृदु-
स्फायत्कोमलहंसतूलविलसत्तल्पे सुमालङ्कृते।
कस्तूरीहरिचन्दानादिकलिते तौ दम्पती सङ्गतौ
वीक्षालिङ्गनचुम्बनादिविविधव्यापारमाबिभ्रतुः॥ ३ ॥

ग॥

चित्ररेखापि अद्भुत[७]परिवशद्धृदयाय अनिरुद्धाय उषामनोरथं विशदीकृत्यैवमवादीत्॥

---

१. म१. ०तच्चित्थाद्धदयेद०
२. म१. ०मदिय्ये०
३. म१. ०तं०इति नास्ति।
४. मै३. ०पञ्चं० इति नास्ति।
५. मै३. ०प्राणंसादेणोक्षी०
६. ६. म१. ०रत्नमयी०
७. म१. ०परिवशछदयाय०

उषामेनां पाणौ कलयतु मुदा [1]सात्वतविभो!
भवान्कामः साक्षा[2]द्रतिरियमुदारा गुणगणैः।
वयोरूपं तावत् सकलमनुरूपं हि युवयोः
चिरादेषा यस्मात्त्वयि कृतमनोवृत्तिरपि च ॥ ४ ॥

यथा पुंसामन्तः पुरनिरतरक्षाकृतिधियां
तवावासो व्यक्तो न भवति तथा त्वं वस चिरम्।
सुखं लोके यस्माद्भ्रमकलनलभ्यं हि बहुधा
विषैर्मिश्रं शाल्यौदनमिव दुरापं खलु नृपाम् ॥ ५ ॥

अपि च-
कान्तामणेर्लाभकृते त्वयाद्य
कार्यं कथं चित्तनुगोपनादि।
न किं सुधाभ्यो (म्भो) निधिमन्थनं स-
श्चकार लक्ष्मीकलनाय शौरिः ॥ ६ ॥

सप्तच्छदच्छदनवत्खलु मानिनीनां
गुप्तापि रीतिरिह निन्दनकण्टकेभ्यः।
तादृङ्महाबलमनोजसमागमेन।
छिद्राण्युपेत्य परिवादपथं प्रयाति ॥ ७ ॥

उक्त्वैवं निजसदनं जगाम सेयं
तत्सौधात्तटिदिव कालमेघमध्यात्।
लज्जामान्मथकलिता ततस्त्वुषेयं
सर्वाङ्गे पुलकयुता नताननाऽभूत् ॥ ८ ॥

---

१. मै१, मै२, मै३. ०सात्वविभो०   २. मै३. ०रतिरितयमुदारा०

नीवीं वामकरेण दक्षिणभुजेनौन्नत्यभाजौ [१]कुचौ
दन्तैर्दन्तपटं च साधु पिदधे लज्जासमालिङ्गिता।
[२]पर्यङ्कं विजहौ तथाविधमहाकामातिरेकादियं
यातुं नैव शशाक केलिसदनात्कान्ते स्पृशत्यङ्गकम्॥ ९ ॥

निश्चेष्टा तनुरुल्ललास करुणग्रामः सुखन्मूर्च्छितः
वक्षोजः पुलकाङ्कुरैस्समुदभूदुल्लोलकल्लोलवान्।
स्विद्यद्दण्डतलं विवर्णवदनं त्वङ्गत्कराम्भोरुहं
किञ्चिच्चेष्टितमाततान तरुणी कान्ते कचालम्बिनि॥ १० ॥

सङ्कोचं गमिता तनुःकरयुगी वक्षोजयुग्मे तथा
नीवीबन्धनगोपने प्रियदृशोर्भूयः पिधानेऽपि च।
श्रान्ता नैजदृशो[३]स्तथा श्रवणयोर्मध्येऽभजत्सङ्गमं
तत्कालोचितचाटुचेष्टितपरे कान्ते मुखं चुम्बति॥ ११ ॥

[४]लज्जा सात्त्विकभावसख्युपगता दूरे जगाम स्मरे
कोदण्डं परिगृह्य तीक्ष्णविशिखेनासारमासीदति।
नीवी च त्रुटिता स्वयं कुचयुगी चिच्छेद सा कञ्चुकं
बाहावल्लभकण्ठसन्निधिपरीरम्भाय सम्भाविता॥ १२ ॥

वचननिचयदूरैर्मानसेनाप्यवेद्यैः
मदनकदनभेदैर्मानयन्ती स्वकान्तम्।
अपरिमितमुदारं कञ्चिदानन्दपूरं
सपदि समुपयाता तेन बाणस्य पुत्री॥ १३ ॥

---

१. म१. ०स्तनौ०
२. मै३. ०पर्यङ्क......... तनुल्लास० ग्रन्थपातः।
३. म१. ०दृशोर्निज०
४: म१, मै२. ०लब्ध्वा०

तस्मिन्नङ्गजसङ्गरे सुमभरं वेणी ववर्षोत्सुका
श्रोणी मङ्गलवाद्यमाशु विदधे काञ्चीनिनादच्छलात्।
वक्षोजौ च तदा मुदा ननृततुर्हारै[१]रुदारैर्मुदं
राजा कश्चन [२]कर्णसंश्रयवते रत्नाय चाजीजनत्॥ १४॥

एवमद्भुत[३]प्रायैर्वयोरूपावन्ध्यतोपदेशदेशिकैः प्रतिदिनप्रवर्धमानस्नेहनदीपूर [४]वर्षागमोत्कर्षाभिः अच्छापार्वणचन्द्रकृष्णपक्षप्रथमादिदिननिशाभिः [५]एकरसस्य विक्रीतलोकत्रयकौतुकाभिः सकलाङ्गसौष्ठवपरीक्षात्यक्तगृहीतच्छात्रविद्वद्भावाभिः [६]परस्परसमवलोकन [७]विरहतथागतसमयत्रयीशिखाभिः शृङ्गारचेष्टाभिर्नीतेषु कतिपयेषु वासरेषु॥

हावैर्भावैर्विलासैरसमयवचनैर्गात्रचिह्नैश्च धन्यैः
भूषावेषादिभेदैः कुसुममु(म)खसमावर्जनैर्गानभेदैः।
[८]दूतीदासीसखीनां बहुतरमयथापूर्वकार्यातिदेशैः
पुंसां केनापि योगं विदुरमलधिया सङ्गता द्वारपालाः॥ १५॥

को वाऽनिरुद्धौ भवनं प्रविष्ट
इति स्म [९]पृष्टाः किल सौविदल्लैः।
सख्यो विरुद्धः सकलो(लैः) भवद्भिः
कृ(कु)तोऽनिरुद्धस्य कथेति चोचुः॥ १६॥

ततस्ते सर्वेऽपि बाणकर[१०] बाणवीरपाण[११]शङ्कनीयप्राणाः कथं नु स्थातव्यं, किं नु कर्त्तव्यमिति चिन्तातन्तुसन्ततिनिबद्धहृदय[१२]डोलारूढमात्मानं मूर्खकिशोरमिवावतारयितुं [१३]नाशकन्।

---

१. म१. ०रुदारैर्मुदा०
२. मै१, मै२, मै३. ०कर्णसंश्रयते०
३. म१. ०प्रायाभिः०
४. म१. ०समयोत्कर्षाभिः०
५. म१. ०एकरसस्य०
६. म१. ०परस्परसमयलोकन०
७. मै२ ०विरहतथातथागत०
८. म१. ०मातीदासी०
९. म१. ०रुष्टाः खलु सौविदल्लैः०
१०. मै३. ०बाणवरपाण०
११. म१. ०शङ्कनीय्य०
१२. मै१, मै२, मै३. ०दोलारूढमात्मानं०
१३. मै३. ०नाशङ्कन्०

तस्मिन्नङ्गजसङ्गरे सुमभरं वेणी ववर्षोत्सुका
श्रोणी मङ्गलवाद्यमाशु विदधे काञ्चीनिनादच्छलात्।
वक्षोजौ च तदा मुदा ननृततुर्हारै[1]रुदारैर्मुदं
राजा कश्चन [2]कर्णसंश्रयवते रत्नाय चाजीजनत्॥ १४॥

एवमद्भुत[3]प्रायैर्वयोरूपावन्ध्यतोपदेशदेशिकैः प्रतिदिनप्रवर्धमानस्नेहनदीपूर[4]वर्षागमोत्कर्षाभिः अच्छापार्वणचन्द्रकृष्णपक्षप्रथमादिदिननिशाभिः [5]एकरसस्य विक्रीतलोकत्रयकौतुकाभिः सकलाङ्गसौष्ठवपरीक्षात्यक्तगृहीतच्छात्रविद्वद्भावाभिः [6]परस्परसमवलोकन [7]विरहतथागतसमयत्रयीशिखाभिः शृङ्गारचेष्टाभिर्नीतेषु कतिपयेषु वासरेषु॥

हावैर्भावैर्विलासैरसमयवचनैर्गात्रचिह्नैश्च धन्यैः
भूषावेषादिभेदैः कुसुममु(म)खसमावर्जनैर्गानभेदैः।
[8]दूतीदासीसखीनां बहुतरमयथापूर्वकार्यातिदेशैः
पुंसां केनापि योगं विदुरमलधिया सङ्गता द्वारपालाः॥ १५॥

को वाऽनिरुद्धौ भवनं प्रविष्ट
इति स्म [9]पृष्टाः किल सौविदल्लैः।
सख्यो विरुद्धः सकलो(लैः) भवद्भिः
कृ(कु)तोऽनिरुद्धस्य कथेति चोचुः॥ १६॥

ततस्ते सर्वेऽपि बाणकर[10] बाणवीरपाण[11]शङ्कनीयप्राणाः कथं नु स्थातव्यं, किं नु कर्त्तव्यमिति चिन्तातन्तुसन्ततिनिबद्धहृदय[12]डोलारूढमात्मानं मूर्खकिशोरमिवावतारयितुं [13]नाशकन्।

---

१. म१. ०रुदारैर्मुदा०
२. मै१, मै२, मै३. ०कर्णसंश्रयते०
३. म१. ०प्रायाभिः०
४. म१. ०समयोत्कर्षाभिः०
५. म१. ०एकरसस्य०
६. म१. ०परस्परसमयलोकन०
७. मै२ ०विरहतथातथागत०
८. म१. ०मातीदासी०
९. म१. ०रुष्टाः खलु सौविदल्लैः०
१०. मै३. ०बाणवरपाण०
११. म१. ०शङ्कनीय्य०
१२. मै१, मै२, मै३. ०दोलारूढमात्मानं०
१३. मै३. ०नाशङ्कन्०

सन्दिग्धो विषयो मृषा भवति चेदास्माकजीवान् हरेत्
सत्यं चेत्तनयापि तस्य गलितप्राणा[१]भवेत्तक्ष(त्क्ष)णे।
तूष्णीं वापि न शक्यते पुनरिह स्थातुं यतोऽस्मान् पुनः
पुत्रीरक्षणहेतवे निहितवान् [२]बाणक्षमाभृद्वरः॥ १७॥

तानाह वृद्धो विदिताखिलार्थः
श्लेषेण गुप्तीकुरुतात्म[३] भावम्।
अवश्यभाव्यं यदिहास्ति लोके
कृतोऽनिरुद्धो भवते(ती) ति तस्य॥ १८॥

बाणस्याखिलदनुजत्राणस्य करात्तवरकृपाणस्य।
विविशुः सभां सभाजनभाजनभाजनकनकभित्तियुताम्॥ १९॥

दंष्ट्रां [४]भग्न(तिग्म)करालवक्त्रकुटिलभ्रूवल्लिकासूचित-
ब्रह्माण्डप्रलयत्रसत्सुरनरव्यालाधिराजव्रजम्।
तत्तद्दुर्मदवैरिमण्डलसमायत्तप्रतापावली-
शङ्कासङ्कुलनक्षमाङ्गदलसद्बाहासहस्रोज्ज्वलम्॥ २०॥

दिक्पालादिसुरेन्द्रहृत्कमलिनीहेमन्तसामन्तित-
स्फायद्बाहुपराक्रमानलवशीभूताखिलक्ष्मापतिम्।
दोः कण्डूति [५]परीक्षिताखिलमहीभृत्कूटकोटिं [६]द्विषत्-
प्राणास्वादनदन्दशूकरमण(णं)दिव्यायुधालङ्कृतम्॥ २१॥

---

१. मै३. ०भवेक्षणे०
२. म१. ०बाणः
३. म१. ०भूतम्०
४. मै३. ०युग्न०, म१. ०तिग्न०
५. म१. ०परीक्षितामरमहीभृत्०
६. मै३. ०द्विषत्राणोस्वादन०

तादृशं बाणनामानं
[1]ददृशुर्नेमिराकुलाः।
कम्पमानशरीरास्ते
साञ्जलीकृतपाणयः। २२।

प्रियमधिगम्य कृशाङ्गी
क्रीडति तव पुत्रिका मनोज्ञरुचिः।
विस्मरति बन्धुजातं
चेटीजनमप्यहो न विश्वसति॥ २३॥

[2]किञ्च-
अनिरुद्धवयोविशेषयोगात्
कलहंसीगतिमाकलय्य सेयम्।
घनशब्दमपीह मादृशाना-
मधिकं नैव सहत्यलं वचोभिः॥ २४॥

स्वामिन्निशान्तमधिगम्य [3]तमोविहीनं
कुर्वन्सतामरसवैभवशालिनीं त्वम्।
भास्वानिवाद्य हि निराकृतकामजातं
शुद्धान्तरङ्गमुपलालय साधुरीतिः॥ २५॥

एवं भावमयानि [4]कञ्चुकिमुखोद्गीतानि कर्णव्यथा-
कृद्वार्त्तानि हृदम्बुजातहिमरुक्कल्पानि [5]जल्पान्यसौ।
श्रुत्वा रोषपयोधिपूरमभितो [6]देशं [7]किरंश्चक्षुषा
रक्ताम्भोरुहसन्निभेन निरगात्तीव्रं सभामध्यतः॥ २६॥

---

१. मै१, मै२, मै३. ०ददृशु०
२. म१. ०किञ्च० इति नास्ति।
३. म१. ०तमोविहीना०
४. मै३. ०कञ्चुतोमुखोद्गीतानि०
५. मै. ०जल्पास्यसौ०
६. मै३. ०देशे०
७. म१. ०किरचक्षुषा०

ग ॥

[1]अम्बुधिरिव तरङ्गमालिकाभिः, फणीन्द्र इव फणासहस्रैः बाहापालिकाभि-रुल्लसितः [2]रोषकषायितनयनगोलकाभ्याम् हसन्तिकामपि [3]हसन्तीं कामपि शैलीं परिशीलयन् स्वदर्पापनयनसाग्रहग्रसितततेः, स्वभावं प्रकाशयितुमिवाश्रितकुटिल[4]भावया [5]भ्रूलतया भीतसकल[6]परिचारकजनः निष्ठुरपदविन्यासत्वङ्गधरणीभारभुग्नदिक्कुम्भिबृंहितवलित-चक्रवालचक्रं, ऊ(उ)रुवेगजनितचण्डमारुत [7]मधिपवनभूरुहाद्वैतदीपम्, उषासदनं प्रविश्य तदङ्कोदयगिरिशारदराकासुधाकरनीकाशप्रकाशवदनमनिरुद्धमपश्यत् ॥

दृष्ट्वा तं तनयाङ्कक्लृप्तशयनं रोषात्स रात्रिंचरा
धीशः पञ्चशतेन मुष्टिभिरलं संक्षोभयामास तम्।
सोऽप्युत्थाय रुषैकयैवं(व) भुजया तादृग्बलोपेतया
जामातुर्दशमग्रहत्वमुचितीकुर्वन् जयानासुरम् ॥ २७ ॥

केशाकेशि मृथे तयोर्बलवतो बा(र्बा)णानिरुद्धाभिधा
भाजोर्विस्मयपूरमग्नविबुधाधीशो(शे) प्रवृत्ते सति।
आपे वैणिकसार्वभौममुनिना केनापि बाहाबल-
श्लाघावन्दि[8]कथावदान्यशिरसा हर्षप्रकर्षोऽधिकम् ॥ २८ ॥

---

१. मै१, मै२, मै३. ०अम्बुनिधिरिव०   २. मै१, मै२, मै३. ०रोषकायित०

३. मै२. ०हसन्तीं हसन्तिकामपि०, मै३. ०हसन्तीं हसन्तीकामपि०

४. मै२. ०भावाभ्यां लतया०   ५. मै१, मै२, मै३. ०भ्रूतलया०

६. मै३. ०परिकजनः०   ७. मै३. ०मधिताप०

८. मै३. ०कथावदास्यशिरसा०

ततःक्षणादेव बलितनयः महाबलं तं निश्चित्य महाबलाशानास्त्रेण बद्ध्वा अनेकशस्त्रपाणिपरिवेष्टितद्वारतलं निगलरवमुखरदिक्तलं बन्दीकृतजनमन्दी[१] भूत[२]शोकरवघोराकारं कारागारमासादयामास ॥

विरहविषानलेन परितोऽभि[३]हतात्मतनुः
निभृतमृषा मनोजजनुषा निजधैर्यमृषा।
कलितविषादशीर्णहृदया हृदयालुजने-
प्यहह पराङ्मुखी [४]ग्रहसमाकुलितेव बभौ ॥ २९ ॥

चित्ररेखा-

सन्तापकारणदुरन्ता(न्त)तनुप्रकटचिन्तानिमग्नहृदया
किं [५]ताम्यसीह सखि हन्तालसा भुजगसन्ताडितेव नितराम्।
रन्तायमेव तव तं तातदर्पमचिरं [६]शान्तिमद्य गमयन्
कान्तां मनोज्ञदलकान्तां भजत्यधिक[७]तान्तां न तेऽस्तु विशयः॥ ३० ॥

इति सखीजनवागमृतं सखी
खलु [८]निपीय कथञ्चन जीवितम्।
कलयति स्म कठोरशराहता
कुसुमबाणविभोरनघा गुणैः॥ ३१ ॥

[९]अथ समयस्समास्परितो विकिरन्विमलं
करकमलं घनालि[१०]रमणीयविलासयुताम्।
कुचसमकोशवक्त्रकमलस्फुटकान्तिभरां
खलु कमलामुपेत्य [११]कलहंसकनादवतीम्॥ ३२ ॥

---

१. मै२. ०भूतशोककरवधोराकार० २. मै१, मै३. ०शोकरवधोराका०
३. मै३. ०अभिहतातनुः० ४. म१. ०ग्रहहंसमाकुलितेव०
५. मै१, मै३. ०रं० ६. म१. ०तान्तमद्यमगमयन्०
७. म१. ०तान्ता० ८. म१ ० निपिय्य०
९. म१. ०अधःसमयस्समाप० १०. म१ ०रमणीय्य०
११. मै१, मै२, मै३. ०गतहंसकनादवतीम्०

व्रजवदुपेन्द्रगोप[1]कमनीयमणी[2]रुचिरः
[3]क्वचन विनीलकण्ठकृतनर्त्तनरम्यतया।
रचितगिरीन्द्रसम्पदमुदञ्चयति स्म [4]महा-
नटनटनानुरूपघटनास्फुटनादघनः॥ ३३ ॥

अपि परिमुल्ललास ककुभां पटलीषु रजसो
भरसितकेतकीपरिमलोर्मिलपुष्पततिः।
रतिपतिनिर्मिता निशितकीलसमुज्ज्वलिता
पथिकमनोविदारणकृते क्रकचालिरिव॥ ३४ ॥

शिशिरसमीरडिम्बमिषभागवताकलिता
कथमपि केतकी रुचिरविष्णुपदाङ्कमगात्।
तदिह जनोऽपि पाशुपतदूरकथाकलितां
कथयति तामुदार परिमेलमिलद्भ्रमरीम्॥ ३५ ॥

सजलजलदनिकरसुकरगिरिदरीसरज्झरी-
कलित[5]ललितविपुलविमलकमलहारशोभिताम्
घटितनटनतरलतरलभुजगभुङ्मनोहरां
[6]पथिकविहतिकरणनिपुणविविधशक्तिमुद्वहन्॥ ३६ ॥

---

१. म१. ०कमनिय्य०
२. मै१, मै२, मै३. ०रुचिकरः०
३. म१. ०क्वचन च नीलकण्ठः०
४. म१. ०महानयनानु०
५. मै३. ०ललितललितविपुल०
६. म१. ०पथिकृहतिकरण०

कुटजमुकुलमालारङ्गवल्लीविधानैः
मलिन[1]जलदपालीमञ्जरीकायमानैः।
धवलसलिलधारास्मेरमुक्तावितानैः
स्फुटयति [2]किमु पाली यत्र कल्याणलक्ष्मीम्॥ ३७॥

पान्थप्राणसमीरपन्नगपतिश्चक्राङ्गनिर्वापणं
नीलाम्बोधरकच्चराभ्रसरणिर्विद्युत्त्रसन्मानवः।
नाना[3]शैवलिनीसमृद्धिदगतिः प्राणो मनोजन्मनः
श्रीमान्सोऽयमवाप वर्षसमयो नानाविलासास्पदम्॥ ३८॥

[4]कासारीयति पुष्करेऽम्बुदगणः [5]शैवाललीलां वहन्
[6]तस्मिन्नम्बुनि धीयति क्षणरुचिव्याजौनभासन्ततिः।
ऐन्द्रं चापमुदञ्चयत्यतितरां भूभृन्नितम्बे प्रभां
दिक्चक्रं दलयत्यतीव विपुलं कादम्बिनीगर्जितम्॥ ३९॥

समये तस्मिन् कलहोदरम्भरिग्रामणीः स्वयोगमहिमसात्कृतचतुर्दशभुवन-भवनस्वच्छन्दसञ्चरणः, [7]चरणनखदीधितिस्तबकावतंसितगीर्वाण[8]परिवृढमौलिभागः, भागवतलक्षणप्रथमलक्ष्यसंस्कारः कैलासकुधरकान्तिकबलनकल्यकलेबरकलशजलधि[9]-कल्लोलकलाकटाक्षकामधेनुकलित[10]कामितलोचनलोभनीयलीलः, कृष्णसार[11]चर्मान्तरीय-घटिततया तमालतरुरिव कुसुमधवलशिखरः, [12]वल्लकीक्वणितरागवलमान चञ्चरीकपटलपरिवृततया,

---

१. म१. ०मलिनजदपाली० २. म३. ०तटिदाली यत्र०
३. म१. ०शैवतिनीसमृद्धि० ४. म१. ०कासारिय्यति०
५. मै३. ०शैशवाल वहन्० ६. म१. ०तस्मिन्नम्बु निधिय्यति०
७. मै३. ०चरणदीधिति०
८. मै२. ०परिवृढमौलि०, मै१, मै३. ०मौलिबागवत०, मै२. ०मौलिभानःभागवत०
९. मै१, मै२. ०कल्लोलकलाकटाक्ष० १०. मै३. ०कामितलोकलोचन०
११. म१. ०चर्मान्तरिय्य० १२. मै१, मै२. ०वल्लकीकणित०

तिमिरानुकलित इव, सुधाकरः त्रैकालिकाखिलार्थवेदननिपुणतया बिरुदामिव, त्रिधा निबद्धां मौञ्जीमेखलामुद्वहन्, जटापटलवेष्टितशिरस्तटतया कलहकौशलराज्यपट्टाभिषेक-कलितपट्टबन्ध इव, हृदयान्तरमेयानुरागसिन्धुवीचीदायादेन अधरपुटेन द्वयोः प्रवालयोर्वनवासमादिशन्, श्रुतिपथमञ्जुलया कयापि महत्या देवतयेव कराम्बुजं सनाथीकुर्वन्, सहागतान् सुरपरि[१]वृढान्निर्गमने नियुज्य प्रत्युद्गच्छेद्यादव[२]महीपतिकोटीरहीररुचिनिचम-समुल्लसितपदोपान्तदेशः, शारदनीरद इवान्तरिक्षदेशं नारदो द्वारकामाससाद ॥

प्रावृण्णीलघनाघनं विहसता दीव्यत्तमालश्रियं
दर्पापेतनिजच्छविं कलयता गोपीमनोहारिणा ।
तादृग्दीप्तिलसत्पुरन्दरमणिं क्षोणीधरश्यामल-
श्रीरम्येन कलेबरेण लसितं भेजे यदूनां पतिम् ॥ ४० ॥

नानारत्नविशेष[३]दीप्तकनकस्तम्भप्रभामण्डलीम्
आस्थानीं समुपागतप्रतिनृपश्रेणीघनाभ्यन्तराम् ।
नृत्यद्द्वारवधूकटाक्षलहरीकह्लारमालोज्ज्वल-
[४]प्रान्तां शेखरयन् किरीटघृणिभिः स्वामी यदूनां तदा ॥ ४१ ॥

ग ॥

स च क्षणादेवोत्थाय सिंहासनादवरुह्य तस्मै भगवते [५]निरतिशयसुखपारदाय, पिण्डीकृत-संसारपारदाय नारदाय, विविधोपचाराणि वितत्य, अभिवादनेन पादौ च सम्भाव्य, कुशलम-प्यनुभाष्य, धन्याः सुकृति[६]मूर्धन्याः विगतदैन्या वयं[७]भवतामागमादीस्पि(प्सि) तसुरागमात्। अथ कर्त्तव्य[८]माज्ञापनीयं देवानुकूलेन कलहमूलेन [९]भवता [१०]शिवताति[११]वचनेन इति हर्षगि-रिशृङ्गमारोपितोऽमरमुनिरित्थमवादीत् ॥

१. म१. ०वृढान्निवर्गमने०	२. मै३. ०महापति०
३. म१. ०कनकप्रभामण्डलीम्०	४. मै३. ०प्रान्ता०
५. मै३. ०निरतिशयपिण्डीकृतसंसारपारदाय०
६. म१. ०मूर्धन्य०	७. मै३. ०भगवताभागमात्०
८. म१. ०आज्ञापनिय्य०	९. मै३. ०भवता शिखाताति०
१०. म१. ०वचनेनेतिपर्षगिरि०	११. मै१, मै२, मै३. ०इत्थमवादीत्०

किं ब्रूमः सकलार्थतत्त्वकुशलज्ञानाय सर्वात्मने
किञ्चिज्ज्ञा वयमीश्वरेण किमु वा कार्यं त्वया यत्नतः।
मार्त्ताण्डस्य तमोनिरोध[1]हरणे दत्तादरः केवलं
खाद्योतो निजपुच्छदीप्तिमधिकां कुर्वन् सदृक्षो हि नः॥ ४२॥

यद्वा–
ज्ञातज्ञेयविशेषवत्यपि भवत्यास्माकमेतत्पुनः
युक्तं ज्ञापनमद्भुतैकवसते भोः! वासुदेव प्रभो!।
अन्यूनापरिमेयवारिकलितेऽप्यब्धौ जडो वारिदः
किं नो वर्षति तद्गृहीतमुदकं माया हि सेयं तव॥ ४३॥

अथवा–
[2]अज्ञातं भवतापि किञ्चन किमप्यस्तीति चित्रं न तत्
किं त्वस्माभिरपास्त[3]बुद्धिभिरपि ज्ञातं किमित्यद्भुतम्।
[4]पीयूषे कटुता कदापि जनिता चित्रं न तत्केवलं
[5]क्ष्वेलो यन्मधुरः करोति सुमनोहर्षं तदेवोन्नतम्॥ ४४॥

एवं वा–
[6]तुरगविषाणतुल्य[7]लसितैर्गगनाब्जगलन्-
मधुमधुरार्थसङ्गतिभिरन्यवचोभिरलम्।
अतिगहनैरसायनसमै[8]रनघैरमलैः
अतिमृदुलैर्वचोभिरुपलालय लोकगुरो!॥ ४५॥

---

१. मै१, मै२, मै३. ०हरेण०
२. मै१, मै२, मै३. ०अज्ञान०
३. मै१, मै२, ०बुद्धिरपि०
४. मै३. ०पीय्यूकटुता०, म१. ०पिय्यूषे कटुता०
५. म१. ०क्षोलो०
६. मै१, मै२, मै३. ०तुरविषाण०
७. मै३. ०लसितैरनाब्ज०
८. म१. ०अनघैरमरैः०

ग ॥

इति भवगदनुग्रहलतालवालस्मितवितरणकल्पलतया वचनवैखरीकलनया आपादतलमस्तकम् अनादिपुरुषममेयसौन्दर्यमदृष्ट्यर्थमखिलधुर्यमानताचार्यम्-अचलधैर्यमब्धिगाम्भीर्यं दरसुदर्शनशार्ङ्गगदानकलितं, श्रीवत्स[1]कौस्तुभादिदिव्यलक्षणलक्षितं सूक्ष्मस्थूलममेयम्, अतिप्रिय[2]भक्तवरदायमुक्तिकन्याप्रदानात्त[3]कनककलशयेव, चिन्मुद्रया भद्रायमाणं स्वामिनं प्रह्लादमुखानां दृशा निर्निमेषया [4]निपीय प्रमदभर[5]परवशस्वान्तः नारदः कथञ्चन लब्धसंज्ञः वक्तव्यशेषं व्यक्तीकर्त्तु[6]मुक्तिभङ्गीमङ्गीचकार ॥

पौत्रस्ते बलिसूनुना खलु पराभूतोऽनिरुद्धोऽभवत्
तादृग्वीर्ययुतोऽपि शोणितपुरे बाणेन बाहाबलात् ।
लब्ध्वा तत्तनयामुषां निशिचरैर्भूयस्समाभर्त्सितः
कारागारमुपेत्य केवलमहोस्विन्नान्तरङ्गः परम् ॥ ४६ ॥

किं कुर्वाण[7]सुरासुरस्य पुरुषाधीशस्य कुक्षिस्थिता-
शेषस्याद्भुतचक्रराजविलसद्दोर्दण्ड[8]भोजस्तव ।
पक्षीशानतुरङ्गमस्य न पुनः पौत्रावमाने क्षमा
युक्ता याहि तदद्य वैरिविभवं हर्त्तुं पुरीं तां प्रति ॥ ४७ ॥

इति तन्त्रीसंचरणचटुलनखमुखबालचन्द्रिकाप्रचारसूचितामितानन्दं प्रसादलक्ष्मीरङ्गस्थ-लीकृतनयनारविन्दम् अधरसिन्दूरप्रत्युप्तमुक्ताफलायमान[9]रदनमुकुन्दं जैत्रयात्राप्रस्थानाय नियुज्य किन्नरवर्णिनीकर्णसुख कलननिपुणवीणागानसमुत्सुकितयादवकलकण्ठीकटाक्षमे-चकितदेहतया स्वामिना दत्तसारूप्य इव स्वच्छगमनाय च नियुक्तः अपहृतसज्जनाश्रमं बदरिकाश्रमं जगाम ॥

❑❑❑

---

१. म१. ०कौस्तुभादिस्थूलंमेयममेय०
२. मै१, मै२, ०भक्तवरदयमुक्तिकन्या०
३. मै१ मै२. ०कनकशकलयेव०, मै३. ०कनककलयेव०
४. म१. ०निपिय्य०
५. म१. ०परदशस्वान्तः०
६. मै३. ०मुक्तभङ्गी०, म१. ०मुक्तिभङ्गि०
७. मै३, म१. ०सुरासुराहिपुरुष०
८. म१. ०भाजस्तव०
९. मै१, मै२. ०रदनकुन्द०

पञ्चमोल्लासः

विधत्तां मे प्रौढिं विशदविशदैर्वीक्षणलवैः
करैर्व्याख्यामुद्रां दधदखिलभद्रास्पदगतिः।
सुधांशोर्बिन्बेऽन्तः स्फटिकमणिसच्छायविलसत्-
प्रतीको लक्ष्मीवान् हयवदनरूपः स भगवान्॥ १ ॥

ग॥

ततस्तौ वैतालिकावासाद्य बाणराजधानीं परमपुरुषसिद्धान्त निर्धारणध्वजाविव बाणास्थानीमासाद्य [1]स्वोत्तरीयं ग्रन्थीकृत्य मध्येसभं जानुविरुद्धभूतल[2]मुपरिष्टात्तमोराशिमिव, सकललोकदुरितपरिपाकसञ्चितं कण्टकद्रुममिव, अनेकविटप[3]समुल्लसितं तं बलितनूभवं बाणं तृणीकृत्य कावेतौ कुत आयातौ किमत्र प्रयोजनमिति पृच्छते तस्मै आवां पुनः सकलचराचर-रचनभरणहरणकरणविहरणस्य, निगमशिखरीकृतचरणपल्लवस्य प्रणतविततिदुरितपटलपटिमतिमिरविसरतरुणतरुणीकृतकरुणारसस्य, चरण[4]नख निःसृतपयोझरीपूतपशुपतिजटाजूटस्य, निशिचरधुर्यकदर्यसंक्षोभित[5] धरणीभारापनय-कलितावतारस्य, सर्वदा [6]सर्वेषु सर्वथा [7]तिलतैलन्यायेनाभिव्याप्य वर्त्तमानस्य सरमतया(तां)[8]अपरमतां द्विधापि स्वेतरेष्वाविष्कुर्वन्त्या ''विष्णुः परम'' इत्याम्नायवाचा विशदीकृतस्वस्वरूपस्य परतया परमपदनायकतां, व्यूहतया जगत्सर्वं विभवतया धरणीभारापनयम्

१. मै१. ०स्वोत्तरिय्य०
२. मै३. ०उपरि प्रौतमोराशिमिव०
३. म१. ०समुल्लसितं बलितनूभव०
४. म१. ०नखरनिसृतपयोझरीपूत०
५. मै१, मै२. ०धरणी०
६. म१. ०सर्वदा० इति नास्ति।
७. मै१, मै२, मै३. ०तिलतैलनयेनाभिव्याप्य०
८. म१. ०अपरमतां स्वेतरेष्वाविपूर्वन्त्या०

अन्तर्यामितया पुरुषप्रवर्त्तनम् अर्चारूपेण सकलदुरितहरणमाकलय्य पञ्चधावस्थितस्य श्वेतद्वीपवैकुण्ठादिदिव्यदेशवासरसिकस्य अतिनिष्ठुरकंसमहीधरदम्भोलिकल्पबाहाबलस्य बाललीलास्पदीकृतनन्दमन्दिरस्य पूतनाशकटादिप्राणहरणलब्धवर्णस्य अघजीवितकाल-मृत्युतुल्यस्य गोपिकाकुचकुम्भकुङ्कुमाङ्कितवक्षःस्थलीभरणीकृतकौस्तुभस्य, दोर्दण्डकेली-त्रुटिकुवलयपीडस्य, कुब्जाङ्गवैकल्यहरण कल्यकर[१]संस्पर्शनस्य, [२]अन्तर्हितगोपकुमार-वेषधारणव्यापारकलनसन्तोषितव्रजवासिजननिर्धारितोत्तमतत्त्वस्य, स्वपदसेवक[३]पाण्ड-वद्वितीयबाहाबलनिर्मूलितजरासन्धस्य, द्वारकानगरमणिदीपस्य, यादवभूपस्य अनादिरूपस्य शार्ङ्गचापस्य, सकलभुवनान्य(न्य)थाकरणचतुरकोपस्य, देवकीतनयस्य वासुदवेस्य दासानुदासौ तवाप्यपनयकालः समजनीति ख्यापयितुमागतावित्युदीर्य पत्रिकार्थं विशदया[४]ञ्चक्रतुः॥

रे बाणासुर मुञ्च दर्पवचनं यच्चक्रपाणिर्हरिः
त्वां हन्तुं कृतनिश्चयः सह महासैन्यैः समासीदति।
तावद्दृप्त[५]मदावलेन्द्रविवशाहङ्कारहुङ्कारवान्
यावत्तीक्ष्णनखो न याति सविधं प्रायेण कण्ठीरवः॥ २॥

तादृग्भक्तिलतावितानकलितप्रज्ञासुधावारिधौ
प्रह्लादस्य कुले कथं कृतजनिस्त्वं कालकूटोपमः।
[६]माधुर्यामृतसारपूरितमहापुण्ड्रेक्षुदण्डे यथा
पुष्पं सर्वरसापहारि विमलस्थूलाढ्यमुक्ताफले॥ ३॥

इत्याभाष्य [७]सभामुभावपि तदा संत्यज्य कण्ठीरवौ
क्षोणीभृत्कटकादिवाशु नगरादापेततुर्द्वारकाम्।
नानासैनिकदुष्प्रवेशकटकां भेरीगभीरस्वन-
भ्रश्यत्तारनिशाकराभयकरक्षोणीरजोमण्डलीम्॥ ४॥

---

१. म१. ०संस्पर्शस्य० २. म१. ०अन्तर्हितैगोगोपकुमार०

३. म१. ०पाण्डवद्वितीय्यनिर्मूलितबाहाबहाजरासन्धस्य०

४. म१. ०चक्रुः० ५. म१. ०मदावला हि विवशाहङ्कार०

६. म१. ०माधुर्यामित० ७. मै१. ०सभामुभावणि०

॥ ततः ॥

बाणो द्वारतलावनप्रकटितक्षेमाय दाक्षायणी-
रामायाशु [2]दिदेश [3]नैजविजयोपायादरान्मेदुरः।
कैलासात्प्रमथेश्वरैः सह भवान्दिव्यायुधालम्बनो
यातु श्रीपतिभञ्जनं कलयतः साहाय्यहेतोर्मम ॥ ५ ॥

अज्ञाताब्जाक्षशक्तिं [4]बलितनयममुं तामसोपास्ति योगात्
विज्ञाय प्राज्ञचक्रप्रथितगुणगणः प्राह [5]सार्वज्ञ्यशाली।
क्वाहं कैलासवासी क्वनु स च भगवान् प्राकृताल्लोकभागाद्
दूरेऽपारे समुद्यद्विरजमधिवसन् दिव्यवैकुण्ठदेशम् ॥ ६ ॥

दुराधर्षा लक्ष्मीः [6]सरसिजदृशस्तस्य महिला
समस्तस्येशाना धरति निजशक्त्या च वसुधाम्।
दिवोऽष्टम्भश्चेत्यपि निगमपद्या विजयते
कटाक्षादेवास्मान् कलयति च साम्राज्यगतिषु ॥ ७ ॥

त्रयीमूर्तिः [7]साक्षात् स्वपदनतवीर्यप्रदगुणः
महाशक्तिर्नानाभुजगपतिभङ्गक्षमनखः।
खगानामीशानो जलधिजलसंक्षोभचतुर-
प्रचारोद्यत्पक्षानिलविलसितस्तस्य तुरगः ॥ ८ ॥

---

१. मै१. ०सभामुभावणि०
२. म१. ०विदेश०
३. मै१, मै२. ०नैजयोपाय०
४. म१. ०बलितनयवमु०
५. मै१, म१. ०सार्वज्ञाशाली०
६. मै१, मै२, मै३. ०सरसिजदृशस्तस्य०
७. म१. ०साक्षात्स्वपनतवीर्यप्रदगुणः०

रुचां राशिर्वाचामविषयमहाशौर्यजलधि:
द्विषन्मत्तस्तम्बेरमदलनकण्ठीरवगति:।
करे तस्यावासं कलयति [१]कठोरैर्निजशिखा
सहस्रैश्चक्राणां पतिरतिगभीरोन्नततनु:॥ ९ ॥

गदामुदारधीरसौ दधाति संमदानयो
[२]मदानुविद्धकोणपच्छिदानिदानवैखरीम्।
[३]वदावदां पदे पदे मुदा विभोर्यशस्तते:
[४]सदा सुरद्रुमाल्यसम्पदा समुज्ज्वलच्छिखाम्॥ १० ॥

[५]कर्त्ता भर्त्ता हर्त्ता जगतां
यदि समरसुखमुपैति विभु:।
योद्धा को वा भा(भ)विता
भवता [६]वा लीयते कुत्र॥ ११ ॥

भक्तो भवान् नाशमुपैति चेद्विभो:
नूनं [७]ममाकीर्तिभरो भवेदिति।
[८]पौत्रं हरेरद्य नियच्छतु स्फुटं
प्रणामपूर्वं सुतया समं तव॥ १२ ॥

---

१. मै१, मै२. ०करैर्वैनिजशिखा० मै३. ०कठोरै: निजशिखा०

२. मै१. ०मदानुलिप्तकोणपछिदानदानवैखरीम्०

३. मै१. मै२. मै१ ०वेदांवदां०

४. मै१, मै२, मै३. ०सदासुररद्रु०

५. म१. ०कर्ता हर्ता भर्ता०

६. मै१, मै२, मै३. ०लियते०

७. मै१, मै२, मै३. ०महाऽकीर्त्ति भरो०

८. म१. ०पौत्रो०

ग ॥

इत्यपरिमितकृपया भक्तरक्षाबद्धदीक्षतया यथावस्थितं कथयन्तं सर्वमङ्गलाकम्रमनादृत्य अखर्वगर्वनिर्वर्तितरोषः, शर्वरीचराग्रणीः मानुषमात्रं भगवन्तं मन्वानः पञ्चशतभुजानास्फाल्य किमेवं विडम्बनेन ब्रह्माण्डमप्यन्यथ(था)यितुं दक्षे भक्तिसात्कृतत्वन्मूर्तौ मयि कुतो नन्दनन्दन[१]शौर्यावकाश इत्यनुभाष्य सपरिवारं नासीरमवतरेति विज्ञापयामास ॥ तावद्द्वारकायाम् ॥

सकलभुवनभर्त्ता सर्वदैन्यापहर्त्ता
निगमशिखरवेद्यो नित्यरूपानवद्यः।
सबलबलसमेतः साधुरक्षानुयातः
विजयकलनहेतोर्द्वारकातः प्रतस्थे ॥ १३ ॥

तदानीम् ॥

भवानीदृशः प्रमोदं कलयत्विति सर्वमङ्गलास्पदतनोरपि भवतः पराभवो मा भूदिति काममुषामनोस्थोऽलब्धो लब्धस्य भवेदिति, परप्रयत्नश्चित्ररेखाप्रयत्न इव सफलो विफलश्च भवेदिति बाणसहस्रकरवैखरीलाघवमलाघवं च भवेदिति, [२]द्व्यर्थपौरव्याहारा विपणयः॥

स्वामी यादववंश[३]मण्डनमणिर्दन्तावलाधीश्वरं
देवानामधिपो यथाभ्रकरिणं पूर्वक्षमाभृद्वरम्।
[४]तत्तादृग्द्युमणिर्यथा हिमवतः सानुं यथाम्भोधरः
सानन्देक्षणमारुरोह भगवान् पौरैः समलोकितः॥ १४॥

तस्याभूत्पुरतो ध्वजाग्रवसतिस्त्रोटीपुटं चालयन्
सज्जीभूतगुरुद्गुरुः स गरुडः क्षोणीधरेन्द्रोन्नतः।

---

१. म१. ०शार्यावकाशः० २. म१. ०द्व्यर्थपौरव्यापार०
३. मै२. ०मण्डनमणोर्दन्ताबलाधीश्वर० ४. मै२. ०तत्रादृक्०

बाणत्राणकृतादरस्य गिरिजाकम्रस्य भूषायितान्
हर्तुं पन्नगसञ्चयानिव समुद्युक्तः [1]करालाकृतिः ॥ १५ ॥

मुक्तागुच्छमनोज्ञरत्नकलशस्मेरप्रभामण्डलं
छत्रं दिव्यदुकूललोलमभितो गाङ्गेयदण्डोज्ज्वलम्।
दध्रे सात्यकिना सभक्तिहृदयाम्भोजेन तस्मिन् धृते
सोऽयं शारदपूर्णचन्द्रकलितोत्तंसायितः श्रीपतिः॥ १६ ॥

वदनसरोजहासमकरन्दझरीकलन
प्रकटितरागहंसयुगसन्निभदीप्तियुतम्।
अपि च रराज चामरयुगं परितोऽभिपतत्
सुरसरिदम्बुपूरकलिताद्रिरिवैष हरिः॥ १७ ॥

विचलितघोणमुन्नमितकर्णमुदस्तशिखं
विलुलितकेसरं खुरपुरस्फुटितक्षितिकम्।
निबिडितधूलिधूसरितदेहममुष्य हरेः
सपदि बभूव वाजिरमणः पुरतोऽवनतः॥ १८ ॥

ग ॥

एवं समरसन्नाहं सज्जीकृत्य, प्रतिपदोत्क्षिप्यमाणकुसुमविसरविमर्दापतद् भ्रमरपटली-झङ्कारसमाहूतपुरुहूतमुखनिखिलसुखवरस्पन्दमानसमन्दयान व्योमयानपरिहसनगभीर-नासीरतुङ्गरथाङ्गशताङ्गदेदीप्यमानमहारथिक तेजस्समाजाल्पीभूत[2]भास्करकरप्रचारनिराकरण-धूर्वहसैन्धवखुरपुटक्षुण्णक्षोणीसमुदितधूलीपालीसमाश्रितान्धकारिताचकितप्रमथगण-समाश्वासनपरपुरहरानभिरुच्य [3]सहपर्वतपर्वतराजकुमारीरोषकषायितेक्षणप्रसरण कमप्यमान-

---

१. मै१, मै२. ०कलाकिङ्कृतिः० २. म१. ०भारकरकर०
३. म१. ०कृद्धीपर्वत०

सुरतरङ्गिणीरभसस्रस्तजटापटलभ्रश्यच्छर्वरीशकपित्थफलभ्रमप्रसारितदीर्घशुण्डालसच्छुण्डाल-कमण्डलीभीद्कारयेच्छिद्यमानप्रतिभटभटहृदयसोदरतदीय कर्णखेददातिकारकपदाति [1]सिंहनादद्विगुणितनिस्सरणरणितप्रतिष्ठापितशब्दब्रह्मविभुतामोमुदत्पतज्जलि-प्रकृतिकुण्डलिराजन्यसुखपारवश्यकलितसकलशिरश्चालनडोलायिताला-समुत्क्षिप्तपयोनिधिपयः पूरनिमग्नचक्रवालशिखरक्रीडत्किन्नरीस्वयंग्रहालिङ्गन-सानन्दगन्धर्वयुवाभयदाननिपुणकलकलं, स्वविरहाक्षमपौरकलकण्ठीनयनबाष्पवर्षाव-ग्रहीकृतसकरुणकटाक्षधवलधवलायमानदशदिशाभोगं वातायनान्तरवीर्यमाणलाजपुञ्ज-वितर्दिकानिवसद्वसुधासुधाशन करसमुत्क्षिप्तकनक[2]पिशङ्गाक्षतम्,[3]अम्बरखेलल्लेख-कान्ताप्रक्षिप्यमाण कल्पतरुकुसुमाहमहमिकाजनितकेशि निवारणव्यग्रकिरीटतटयोजनम्, अनेककञ्चुकिकरसुरशाखिशाखास्पदकनकवेत्रलताकातरितमहारथिसमुदयं भगवानपि स्वनगरा[4]च्छोणितपुरं जगाम॥

मुरहरमनुजन्मानं
सकलबलैस्साकमनुगतोऽपि बलः।
गिरिवरमिव काञ्चनरथ-
मधिरूढस्सन्धयौ धीरः॥ १९॥

मुरहरतनयैः काञ्चन
रथचञ्चत्केतनैर[5]भासि तदा।
परित[6]स्सैन्यं [7]परभय
[8]करणोपाय[9]प्रवीणखड्गैः॥ २०॥

---

१. म१. ०सिंहसिंहनाद०
२. म१. ०खेलल्लेसङ्ख०
३. म१. ०महारथिक०
४. मै१, मै२. ०च्छेणितपुरं०
५. मै१, मै२. ०भावि
६. मै१, मै२. ०सैन्य०
७. म१. ०परभट०
८. मै, म१. ०हरणोपाय०
९. मै१, मै२. ०प्रवणखड्गैः०

शोणपुरी दृग्विषयो
बभूव खलु तस्य सैन्यस्य।
बाणभटैरपि नगरी
यमस्य दृष्टेव सा जज्ञे॥ २१॥

पारदकल्पं मानसमासी-
त्तस्य तदानीं दुष्टगुणस्य।
[१]मुरहरिसैन्यैर्विपुलितजन्य-
प्रकटितधैर्ये सविधगतेऽस्मिन्॥ २२॥

ईसा(शा)नस्सह देव्या
पार्वत्या धृतशूलः।
हेरम्बेण कुमारो-
पेतेनाप सधैर्यः॥ २३॥

गुणाधिका गणाधिपाः
समीयुरन्तिकं तदा।
हरस्य फालदृक्त्विषा
हतस्मरस्य सायुधाः॥ २४॥

पाशुपतं सैन्यमभात्
सप्तभिरप्यम्बुधिभिः।
अभ्रमिवाढ्यं कलितं
वैरिजनाक्षेमकरम्॥ २५॥

---

१. मैर. ०मुहुररि०

फालाक्षोऽपि प्राप्तामोदं
शोणाभिख्यां तामापाशु।
आरूढस्सन्नुक्षेशानं
स्वार्धाङ्ग [1]स्त्रीरुपोपेतः॥ २६॥

चन्द्रकला सा तस्य जटाग्रे
मोदममोदं चाप समग्रम्।
भावि समी(म)रे मन्मथशम्भ्वोः
अक्षतवीर्यव्युत्क्रमयोगात्॥ २७॥

सैनिकघोषै[2]स्सान्द्रतरे
सत्यखिलेऽस्मिन् भूवलये।
शाम्भवढक्का मौनयुता
सार्वजनीनां भीतिमदात्॥ २८॥

बाणस्तावन्निजसमबलं प्रेक्ष्य धारोक्तिभङ्ग्या
सन्नद्धस्सन्नतिरथमुखैर्वाहिनीशैर्महास्त्रैः।
धीरो बाह्याङ्गणमधिगतः शम्भुपादौ निपीड्य
स्वात्मानं तत्सुकृतनिहताशेषदोषं च मेने॥ २९॥

कुम्भाण्डाद्यस्सरयमखिलाः
सन्नाहैरुस्वैर्बहिरुपगताः।
सेनां नानाभटपरिगतां
गोप्तुं सज्जीकृतशरगणाः॥ ३०॥

सङ्ग्रामेऽस्मिन् सङ्गते व्योमसीमा
तादृग्वीरासक्तगीर्वाणभामा।
अम्भोजातैस्संभृतायास्सरस्याः
शोभां लेभे तन्मुखश्रीमनोज्ञा॥ ३१॥

---

१. मै२. ०श्रीरुपोतेतः०   २. म१. ०सान्द्रंतर०

वीररसानुगयोधसमेतं
तादृशराक्षसयूथपरीतम्।
घोरशताङ्गशतानुगतान्तं
भीषयति स्म तदाशु कृतान्तम्॥ ३२ ॥

चू॥

तदा भगवानपि समरोचितवेष[१]विशेषमाकलय्य, स्वमिवाप्रतिहतचक्रभीषणं, [२]चतसृषु दिशास्वनुकलितद्वारतया चतुर्मुखमप्यनुकुर्वाणं, धनुर्वेदराशिमिव, बहुमनुगतशास्त्रसारं, मूर्तिमिव वैनतेयस्य, स्फूर्तिमिव सकललोकविजयस्य [३]अतिरमणीयकनककलशशेखरिततया चन्द्रशेखरायमाणं, चिरकालसमरविरह-कण्डूलचरणाभ्यां कामपि वेगविद्यां पताकाग्र जाग्रत्पतगराजन्यपदसेवनलब्धां, सार्थयितुं, तदभिलषितपातालप्रवेशप्रतिरोधधरण्यप-नयरूपगुरुदक्षिणां, खुरपुटकुद्दालैः, कुर्वद्भ्यामिवार्वद्भ्यां त्रियुगाधिष्ठानतामपि सम्पादयितुमिव, स्कन्धेन्धानयुगाभ्यां समलङ्कृतम्, सन्ततस्वपदवन्दारुकेण दारुकेण पताकावसन्निजानुजन्म-समालोकनसमुपगतेनारुणेनेव गृहीततुरगखलीनरज्जुना समरसमयसमुचितसकलगतिकोविदेन समलङ्कृतपुरोभागं, [४]वितताभोगं कमपि नयनानन्दनं स्यन्दनमधिरूढः, निखिल[५]रमणीयगुण मणिगणनिम्नेन प्रद्युम्नेन अपारसैन्यरक्षाकृतावधानेन [६]युयुधानेन, दत्तरिपुजनहृदयगदेन गदेन, अप्रतिहतबलावलम्बेन साम्बेन, दृप्तनिशिचर[७]कुलसबलमारणकारणेन सारणेन, कलितामरसमुदयानन्देन नन्देन, लोकैकभद्रेण भद्रेण, अन्यैश्च तनूभवैर्महारथिकमूर्धन्यैः प्रत्याहारीकृतां सेनामष्टधा विभज्य कल्पान्तरिङ्खत्कल्लोलघोर[८]दर्शनीयमम्बुराशिमिव, परितः शोणितपुर परिखावलयमुन्मूलयितुमुद्योजयाञ्चकार॥

---

१. म१. ०विशेष०
२. म१. ०चतसृदिवसा०
३. म१. ०अतिरमणिय्य०
४. म१. ०वितताभांग०
५. म१. ०दरमणिय्य०
६. म१. ०युधानेन०
७. मै१. मै२. ०कुल० इति नास्ति।
८. म१. ० दर्शनिय्य०

कुम्भाण्डमम्भोरुहजन्मकल्पं
सेनामुखे संघटयाञ्चकार।
बाणस्तथा मन्त्रसमग्रशक्तिं
रङ्गस्थलं सङ्गरवीरलक्ष्म्याः॥ ३३॥

[१]तदीयसान्निध्यमुपेत्य रेजे
प्रभञ्जनोत्तेजितवह्नितुल्यः।
समग्रचापागमलाभपूर्णः
सदृक्षशून्यः खलु कूपकर्णः॥ ३४॥

[२]पार्श्वे तयोर्बाणसुतो रराज
प्ररूढरोषो गिरिराजतुल्यः।
गिरीशभक्तेः परिपाकशङ्कां
क्रव्यादबृन्दे कलयन्वयोभिः॥ ३५॥

आजिभूमिमधिगम्य दीप्तिमान्
अग्निभूरधिकबर्हिणानुगः।
क्रौञ्चशैलदलनात्तवैभवां
शक्तिमात्मभुजयोर्वहन् द्विधा॥ ३६॥

भूतगुह्यकगणानुगतस्सन्
सर्वभीषणदृगग्निशिखस्सन्।
किञ्च कञ्चन वहन्नपि शूलं
माधवस्य पुरतो गिरिशोऽभूत्॥ ३७॥

---

१. मै१, मै२. तदीयसन्निध्य० २. मै१, मै२. ०पार्श्वेयतो०

वक्त्राम्भोजेऽभूद्देवराजस्य शङ्खा-
धीश[१]श्चक्राङ्गाकारकान्त्यानुषक्तः।
गम्भीरध्वानं सैन्यमध्ये वितन्वन्
शत्रूणां [२]प्राणांश्चूर्णयन्नैजशक्त्या॥ ३८॥

अखिला नृपाल[३]मणयोऽपि तदा
निजशङ्खजात[४]मतिवेलरसाः।
समपूरयन् सकलदिग्वनिता
[५]हृदयानि तेन भिदुराण्यभवन्॥ ३९॥

रणसरस्वति शब्दमहीधर-
प्रमथिते हरिशार्ङ्गधनुश्च्युतम्।
शरविषं न शशाक स पातुम-
प्यहह शम्भुरमेयबलोऽपि सन्॥ ४०॥

द्विरदावलिमेघपरम्परां
समधिगम्य रराज मृधाङ्गणः।
सुकृपाणतटिल्लतिकायुतां
जलदकालसमान[६]रुगुज्ज्वलः॥ ४१॥

---

१. म१, मै२. ० चक्राङ्गार०
२. म१. ० प्राणान् चूर्ण०
३. मै१. मै२. ० माणयोऽपि०
४. मै३, म१. ० रतिवेलरसाः०
५. म१. ०हृत्दयान०
६. मै१, मै२. ० गुरुज्वल०

सेनान्या प्रथमं बभूव समरं घोरं कठोरैः शरैः
निर्भिन्नद्विपकुम्भमण्डलगलद्रक्तानुषिक्ताङ्गणम्।
छिन्नछत्रकदम्बडम्बरकृत[१]भ्रश्यत्पतङ्गभ्रमं
दुर्ज्ञेयोभयजेयजेतृकमथ प्रद्युम्नसैन्यस्य तत्॥ ४२॥

प्रद्युम्नायतबाहुदण्डविलसत्कोदण्डचण्डापतत्-
काण्डाखण्डपरम्पराहत[२]महासेनीयसेना तदा।
धावन्ती परितः समुद्रसलिले सेनारजः पङ्किले
युद्धालोकनसङ्गताम्बुपुरुषैस्साकं सुखेन स्थिताः॥ ४३॥

कुम्भाण्डः कूपकर्णौ विपुलरथगतौ तावुभौ [३]सीरपाणेः
नासीरे शस्त्रपातैर्विदलित[४]वपुषौ रोषरक्ताक्षिकोणौ।
सैन्यं [५]संप्राप्तदैन्यं सपदि कलयतो दिव्यशस्त्रास्त्रविद्या
वैशद्याद्रक्तनद्याकलनकृतभयात्तत्र [६]धानुष्कवत्या॥ ४४॥

वायव्यं [७]पार्वतेनानिलमयमखिलं वारुणेनासुरं तत्
माहेन्द्रेणान्धकारं दिनकरशरतस्साधु चिच्छेद धन्वी।
कालिन्दी भेदनोऽसौ तदनु मुसलयतस्तत्तुरङ्गांश्च सूतौ
सैन्यं चाक्षोहिणीतस्समधिकमतनोन्नाममात्रावशेषम्॥ ४५॥

ग॥

तदनु प्रद्युम्नदोःस्तम्भभद्रासननिर्निद्रजाग्रन्मण्डालाग्रधाराभीरुक सैनिकसमाश्रितवल्मीका-रोहरणसमयसमुचितस्वेदधारापतनसूचितासुर [८]पराजयं, काकोलधरनिवेदितचक्रिविजयमोदमान

---

१. मै१. ० भ्रस्यत्पतङ्गभ्रम०
२. म१. ०महासोनिय्य०
३. म१. ० शस्त्रपाणेः०
४. मै२. ० वपुक्षौ०
५. मै१, मै२. ० संप्राप्तदेन्य०
६. म१. ० धानुष्कधुक्या०
७, मै१, मै३, ० पार्वतोना०
८. म१. ० पराजय०

[१]चक्रीन्द्रवचनमलिनमुखसमुद्गच्छन्निः श्वासमारुतकलितवाताशनपारणं, [२]रणाङ्गणजृम्भमाणसारणकार्मुक निरातङ्कनिस्सरच्छरप्रहारभग्नकोणपक्षोणिप[३]चर्विततनिः शेषिततृणपुनस्सृष्ट्या-कुलचतुराननपरित्यक्तजग[४]दुत्पादनविलसितं, करचलितमुसलिमुसलवेगसमुदित्वरपवनबलनभ्रमितसैन्यकुलालचक्रसमुदितकलशायमाननिर्जरवारकान्तावक्षोजरथाङ्गद्विजवरवितीर्णाभङ्गुरालिङ्गनदानं, सकलभयङ्करं सङ्गरं प्रत्येकं द्वादशाक्षोहिणीसंख्ययोः [५]सेनयोः समभूत्॥

कुम्भाण्डे लूनकाण्डे निशितशरगणैः कूपकर्णे विकीर्णे
बाणे भ्रश्यत्कृपाणे स्तुतिरवदृषितश्रीकुमारे कुमारे।
सैन्यैः सम्प्राप्तदैन्यैर्मुरपुरहरयोर्द्वन्द्वयुद्धेऽनुनद्धे।
जिष्णोरक्ष्णां [६]सहस्रं सफलमिति [७]सुरैस्संस्मृताऽभूत्प्रशंसा॥ ४६॥

दन्तादन्तिविभिन्नदन्तमुसलैर्व्योमस्थले सङ्गते
व्यामिश्रः कलहो बभूव नितरामन्योन्यमेणीदृशाम्।
[८]वीरान्वेषणसानुरागमनसां मृत्वा [९]स्वदन्तीशस-
[१०]द्व(द्वृ)त्तालिम्बितदूरयग्रहपरान् दृष्ट्वा समोदत्वरम्॥ ४७॥

तदनु सात्यकिना सह सङ्गरं
कलयति स्म स बाणनिशाचरः।
विविधशस्त्रकलाकृतकौशलं
विबुधविस्मयकारि विमर्शनम्॥ ४८॥

---

१. मै२. ० चक्रिन्द्र०
२. म१. ० रणाङ्कण०
३. मै१. ० पदं०
४. म१. ० जगदुत्पातन०
५. म१. ० सेनयोरभूत्०
६. म१. ० सहस्त्रं ० इति पदं नास्ति।
७. मै१, मै२. ० सुरस्संस्कृता०
८. मै२, म१. ०लीलान्वेषण०
९. मै१, मै२. ० स्वदन्तिशस०
१०. म१. ०द्वत्तालम्बनवधूकर०, मै २. ० द्वत्तलिम्बितरूर०

यावच्चापशतेषु पञ्चसु शरौ द्वौ द्वौ यथैकं क्षणात्
सन्धायाशु मुमोच लाघववशाद्बाणो धनुष्मद्वरः।
तावत्स्वैकशरासनच्युतशरैश्छिच्छेद तन्मार्गणान्
कोदण्डागमपारदृश्वजनतामन्यस्तदा सात्यकिः॥ ४९॥

अक्षोहिणीत्रयममेयबलेन युक्तः
स क्षोणिपालतनयो निजघान शत्रोः।
संक्षोभितो निशिचरश्च [1]शरैस्तदीयैः
रोषेण [2]रुद्रवदनस्स तदा बभूव॥ ५०॥

ग॥

एवं प्रवृत्ते सति समरे घोरे [3]रोषकषायितनयनबाह्वा(हा)भ्यां फाललोचनज्वलदनलानुगताभ्यां मुखकमलं यज्ञवाहयन् बहुतपश्चर्यां समार्जितचरष्णिुभावं [4]कैलासमिव धवल[5]कमनीयं, दुर्वारबलाक्षीणमुक्षाणमारुह्य प्रलयसमयसमुज्जृम्भमाणमृत्युभीमः, क्षीररसागररिङ्खद्वीचीपरम्पराजरीजृम्भद् बडबानलानुकारिणा आश्रितविपुलभुजादण्डमूलेन शूलेन मुरहरसैन्यं दैन्यलतालवालयन्, [6]परवरूथिनी [7]प्रमथनपरप्रमथगणघनपटलनिर्मुक्तशरधारासारसङ्कीर्णसमरक्षोणीप्रावृट्समयेन यादवबलं राजहंसमण्डलयन्, किरीटलम्बमानकुण्डलीन्द्रफणाविसृत्वरविषज्वालाजालेन, दहन्निवाखिलभुवनानि महारथिकमुक्तशरजालं निःश्वासवातूलेन कलयन्, पाञ्चजन्यनिनदज्ञेयस्वसन्निवेशदेशं, कलितनिशाचरविनाशं भगवन्तं पुण्डरीकलोचनमभिदुद्राव॥

१. म१. ० सरस्तदिय्यैः० २. मै१, म१. ० रुन्द०
३. म१. ०कैलासनाधमिव० ४. म१. ०कमनिय्य०
५. मै१. ०उक्षाणामधिरुह्य०, मै१. ० उक्षाणामारुह्य०
६. मै१, म१. ०वरवरूथिनी० ७. म१. ०प्रमथनवर०

भेरीभाङ्कारभीमं भवजलभवधृत्सैन्ययोर्जृम्भमाणे
घोरे सङ्ग्रामपूरे तदनु च नभसस्तारकाभिर्निपेते।
भीतास्ते सिद्धविद्याधरमुखविबुधाः दिग्गजाः सैन्यघात-
क्षुण्णाङ्गा दीनदीनारवमुखरमुखाः [१]क्रन्दितान्यप्यतन्वन्॥ ५१॥

स वासुदेवस्स च वामदेवः
स पीतनेत्रः स च फालनेत्रः।
सदा रमाराजितदिव्यगात्रा-
वहीन[२]भूषारमणीयकर्णौ॥ ५२॥

पुराणगोरूप[३]धरस्ववाहौ
सचक्रशूलायुधरम्य[४]बाहू।
परस्परं लोकविचित्रवीर्यौ
वितेनतुस्तौ समरं तदानीम्॥ ५३॥

कोदण्डे कुटिले तयोः कुटिलतामापेव लोकत्रयी
फालस्याक्षरपङ्क्तिरप्यतितरां तादृङ्महावीर्ययोः।
प्रत्याख्यातपरस्पराहित[५]शरासारे तदा सङ्गरे
[६]घोरे शार्ङ्गिपिनाकिनोर्जलधयस्सप्ताऽभवन् सद्रवाः॥ ५४॥

पश्यतां दिविषदां परतत्वे
सन्दिहानमनसां श्रुतिमार्गैः।

---

१. म१. ०श्रव्यताम्० २. मै१. ०भूषारमणिय्य०
३. म१. ०धरस्वबाहौ० ४. म१. ०रम्यबाहौ०
५. म१. ०शरासारं० ६. मै२. ० पूरे०

ग॥

तदनु भगवान् सकल[1]मनुजाज्ञानतिमिरभास्करः, किमपि शस्त्रं जृम्भणनामकं स्वेतरसकलाविदितवैभवम् [2]ऊनस्वकिङ्करे शङ्करे प्रायुङ्क्त॥

सर्वज्ञोऽप्यहहायितामुपगतः शस्त्रेण तेनाहतः
भूमौ सम्प्रणिपत्य निर्गतबलः साक्षाद्भवानीपतिः।
मूर्च्छामप्ययमाप शैवजनतानेत्राश्रुभिर्वीर्यवान्
सिक्ताङ्गः कुलिशाहतो गिरिरिव प्रज्ञां न लेभे तदा॥ ५९॥

ग॥

तदनु सात्यकिना सह मृथं(युद्धं) कलयन् [3]स बलिकुमारः स्वपराजया-न्निरतिशयभक्त्या रौद्रभयानकविकल्पमाविष्कुर्वन्मनसि क्षणादेत्य सकलभीषण[4]वरूथिनीस्वामिना शौरिणा समं नियोद्धुमुपचक्रमे॥

भगवानपि ससैन्यमुपगतमोहं पर्वतराजकुमारीकमनं लब्धसंज्ञमाकलय्य जृम्भणास्त्रमप्युप[5]संहृत्य तेन निशिचरेण समं घोराश्चर्यनदी[6]शोषणः समरमकृत॥

तदनु हरिः स्वशार्ङ्गमपि कुण्डलयन्
भुजया विपुलजयाय [7]कीर्तिमखिलम्।
जघान निजतीव्रशिखैर्विशिखैः
समरमुखे [8]खेटभटसङ्कटसङ्कुलिते॥ ६० ॥

---

१. म१. ०मनुजतिमिराज्ञान०
२. म१. ०मीनस्व०
३. म१. ०स० इति नास्ति।
४. म१. ०वरूधिनीकः (शः)०
५. मै१, मै२, ० सहत्य०
६. म१. ०रोहिणीगिरिः०
७. म१. ०समूकमकृत०
८. मै१, मै३. ०खेटाभट०

निश्चयेऽभवदिव श्रुतिलग्नः
शार्ङ्गसङ्गतगुणः खलु हेतुः॥ ५५॥

ग॥

एवं परस्परायोधनकुशलयोः मुरपुरहरयोः विविधास्त्र[१]विद्यावैशद्यरत्न रत्नाकरयोः, करयोजितशार्ङ्गपिना[२]कलस्तकमस्तकभेदासहजीवा[३]कर्षणपुङ्खानुपुङ्खरिङ्खच्छर-पारम्परीक्षुभितगाजपाजाततौरङ्गशताङ्गमुखपरस्परबलयोः, लयोपनतकृपीटयोनि-प्रतीकाशरोषयोः, स्वोभयावतारसङ्ख्या[४]सङ्ख्येयैर्दिवसैःआयोधनशाणोत्तेजनेन तेजोमणिं विशदयतोः अनाघ्रातगन्धमश्रुतवचनमदृष्टचर्यम्अमानसगोचरमायोधनमखिलमपि भुवनं संक्षोभयामास॥

प्रत्यस्त्रैर्दलिते निजाशुगगणे धावत्सु सैन्यैस्समं
भेतालादिषु हस्ततालकलनव्यग्रे यदूनां बले।
रोषाविष्टमना निजास्त्रमनघं सन्धाय सोऽयं पुरा-
रातिस्तत्र बले मुमोंच सहसा कृष्णे जगद्वल्लभे॥ ५६॥

मुक्ते पाशुपते शरे त्रिभुवने सानिष्टसम्भावने
दिक्पालेष्वपि दूरधावन[५]कलाशीलेषु लोकेश्वरः।
नैजं शस्त्रमुपादधे प्रतिभट[६]स्सन्धाय कंसान्तकः
त्रैलोक्याभयकारणाय भगवान् श्रीयादवानां प्रभुः॥ ५७॥

सोऽयं शौरिकरात्तशार्ङ्गधनुषो लोकान् दहंस्तेजसा
जीर्णं पाशुपतास्त्रमप्यतितरां चिच्छेद बाणाधिपः।
पारम्यास्पददेवतापरिचयव्यग्रामराधीशहृत्-
सन्देहेन समं विषद्रुनिचयं तत्क्षणः कुठारो यथा॥ ५८॥

---

१. म१. ०वैद्याशैशद्य०
२. म१. ०मस्तक०
३. म१. ०ण०इति नास्ति।
४. म१. ०संख्येयैः०
५. मै१. ००कथाशीलेषु०
६. म१. ०सन्धतोसाय०

स्वामी यादववंश [1]मौक्तिकमणिस्तस्याशु रथ्यान् रथं
सैन्यं दुर्मदसारथिं च निशितैश्चिच्छेद बाणैर्हरिः।
[2]खड्गं हस्तमनीनयद्रिपुशिरश्छेदाय लोकत्रयी
मोदायानतभीतिसञ्चयसमुच्छेदाय सर्वोन्नतः॥ ६१ ॥

ग॥

तदनु नीलाम्बरपीताम्बरयोस्समावेशादिव चित्रतां नीते यादवराक्षससैनिकसमीके लोकसंक्षोभ [3]करणपूर्वरङ्गे रणरङ्गे पुरुषोत्तमनाराच[4]विहितत्वङ्गाधरे गङ्गाधरे [5]अज्ञातस्थानोदन्ते एकदन्ते, भयकृतस्पन्दे स्कन्दे, कुम्भाण्डादिषु महारथिकेषु स्वतनयानां [6]पितृमत्तां समापादयत्सु, बाणेऽपि निर्विण्णहृदये स्तब्धतामुपेयुषि, विराग इव [7]सैन्यपरागे विष्णुपदैकशरणे, यादवमहीपतिभुजारणिसमुपस्थिततेजःकृपीटयोनीन्धनतां नीतेऽसुरगणे, बाणजननी कोटरानामजरठा स्वतनयरक्षणाय विवसनतां प्रपन्ना यौवन[8]कारितस्वावस्थां राज्ञे मदनाय निवेदितुमिवाश्रिततद्भवनोपकण्ठाभ्यां पुनर्भवजनितखेदापनो[9]दनायेव किमपि विष्णुपदमाश्रित्य तपोविशेषसमुचिताधोमुखलम्बनाभ्यां, स्तनाभ्यामदर्शनीयविकृतिमाकृतिं गमिता, [10]चमरीमपहसताधवलकुन्तलसमुदयेन शिथिलाशिथिलदन्तपाल्या चेष्टितैरप्यतिगर्हितैः सकलजनलोचन [11] कवाटपिधानजाड्ककैर्भगवतः पुरत उपतस्थे॥

शार्ङ्गी तां समुदीक्ष्य लज्जितमना नम्राननो लोचने
यावत्संपिदधे करेण सहसा तावत्स बाणासुरः।

---

१. म१. ०मण्डनमणिः० २. मै१, मै२. ०स्वङ्गं०
३. म१. ० हरण० ४. म१ ० विहति०
५. मै१. ०अज्ञातस्वावस्थान०, म१. ०अज्ञातस्वस्थान०
६. म१. ०मत्तातद्वय० ७. म१. ०सैन्य० इति नास्ति।
८. म१. ०करिस्वावस्था० ९. म १. ०दायेव०
१०. म१. ०चमरीवाल० ११. मै२. ०कपाट०

जङ्घायां जवमादिशन्नतिभयोद्योगं स्वगेहान्तरं
दीनः प्राप समस्तसैन्यविकलस्तादृङ्महावीर्यवान्॥ ६२॥

इति श्रीमद्वाधूलकुलकलशपाथोनिधिराकासुधाकरसर्वतन्त्रस्वतन्त्रोभयवेदान्ताचार्यवरदाचार्य[1]गुरुवरकरुणाकटाक्षलब्धभाष्यार्णवतात्पर्यकणेन, तदनुग्रहग्राहित[2]-पाणिनीयोदयनीयजैमिनीयादिसम्प्रदायेन श्रीमत्कन्दालकुलतिलकचतुस्तन्त्रीपारीणदिवाप्रदीपबिरुदाङ्कश्रीनिवासार्यतनयेन सहजविनयेन, सुरसद्मगिरिनगरवास्तव्येन, नव्यदिव्यगव्यभव्यसाहिती[3]सम्प्रदायापारवारपारदृश्वना वेङ्कटाचार्येण कलिते बाणासुरविजयाह्वये चम्पूप्रबन्धे पञ्चमोल्लासः॥

॥ पञ्चमोल्लासः समाप्तः॥

❑❑❑

१. म१. ०गुरुवर० इति नास्ति। २. म१. ० पाणिनीयजैमिनीय०
३. म१. ० संप्रदायोकूपार०

षष्ठोल्लासः

चित्ताम्भोजे वसन्यः [1]श्रितजनदुरितच्छेदबद्धादरस्सन्
व्याख्या [2]मुद्राविलासोल्लसितनिजकरव्यञ्जिताशेषगुप्तिः।
साक्षाद्द्राक्षासदृक्षोक्तिदविभवयुतः स्वाश्रितानां बुधानां
वक्त्रे वाजी स देवो वितरतु मम वाक्पूरकर्पूरलक्ष्मीम्॥ १ ॥

ज्वरः शैवो [3]नानापरिचरसमेतः खलु तदा
पदे शीर्षे संख्यां दधदनलकल्पां दृशि तदा।
मुरारातेस्सेनामपि कनलयन् योजनशत-
प्रमाणस्यः साक्षाद्यम इव हरेराप सविधम्॥ २ ॥

ब्रह्माणं सहसा दहन्निव पयोराशीन् स्वतेजोभरैः
अत्युग्रैः परिशोषयन्निव महाघोराकृतिर्दानवः।
नानातोमर[4]यष्टिपट्टसमुखान् हस्तेषु विद्योतयन्
नेतुस्सर्वचराचरस्य पुरतः शौरेरभूद्दुर्मदः॥ ३ ॥

लोके शैवज्वरकृतमहातापसंप्राप्तशोके
नाकेशादिष्वपि [5]विवशतां प्राप्तवत्सूग्रभासा।
जज्ञे ज्योतिः किमपि विपुलं तत्र [6]नारायणीयं
लिप्यामात्राज्जलभवदृशस्तत्र विष्णोर्भविष्णोः॥ ४ ॥

---

१. मै२. ० श्रितजन०
२. मै१, मै२. ०मुदा विरोषोल्लसित०
३. म१. ० नानापरिकरसमेत०
४. मै१, मै२. ०यष्टिपद्दसमुखान्०
५. म१. ०ववशताम्०
६. म१. ०नारायनिय्य०

सङ्ग्रामोऽभूत्सुरगिरिसमौन्नत्यभाजोस्तदानीं
चिह्नैर्विष्णोरपि पशुपतेर्दीप्तदिव्याङ्गभाजोः।
[1]दृष्टो नैव क्वचन विबुधैर्मानवैर्दानवैर्वा
प्रायो वाचामविषयकथस्तत्र नासीरदेशे॥ ५॥

वीर्यं विष्णोर्नुकमिति महाभारती सा पुराणी
यस्य प्राह क्षितितलरजस्तुल्य[2]संख्यानुबद्धम्।
तस्य [3]प्रायो ज्वरवरबलात्पीडितः शाम्भवोऽगात्
क्लिष्टं कष्टं किमपि वचनास्पृष्टमाशु ज्वरोऽपि॥ ६॥

अलब्ध्वा शैवो यं सपदि विवशात्मा त्रिभुवने
स्वरक्षायां शक्तं परमपुरुषं प्राप शरणम्।
मुदे तस्योदग्रस्तुतिवचन[4]भङ्गीमकलयत्
[5]कृपासिन्धो पादाम्बुजविनतबन्धो हर इति॥ ७॥

यादवान्वयदुग्धाम्भोनिधिराकासुधाकर।
यशोदापूर्वपुण्यौघपङ्केरुहदिवाकर॥ ८॥

महायोगिमरालौघहृच्छरत्कमलाकर।
भक्तरक्षाचकोरस्त्रीरतिकृत्कुमुदाकर॥ ९॥

वसुदेवतपश्चर्यानवकल्पद्रुसत्फल।
देवकीगर्भमञ्जूषादिव्यालम्बशिखामणे॥ १०॥

---

१. मै१. ० दृष्टनैव०, मै१. ०दृष्टन्नैव० २. म१. ०संख्यानुबन्धम्०
३. मै३. ०प्रायोज्वरदरबलात्पीडितः०, म१. ०प्रायोज्वरदरबलापीडितः०
४. म१. ०भङ्गीमशतियत्० ५. म१. ० करीपासिन्धो०

राजवंशयशः कान्ता[१]रमणीयशिरोमणे।
पृथातनयसाम्राज्यकलनाकल्पभूरुह ॥ ११ ॥

कल्याणगुणरत्नालिशेवधे पार्थसारथे।
कंसभूधरदम्भोलिकल्पबाहाबलोन्नत!॥ १२ ॥

धार्त्तराष्ट्रकुलक्षेम[२]प्रावृट्सन्निभविक्रम!।
निशाचरपिशाचौघदशाहरणदक्षिण!॥ १३ ॥

श्रीवत्सवनमालादिदिव्यालङ्कारभूषण!।
[३]कालीयमदहस्तीन्द्रकण्ठीरवकिशोरक!॥ १४ ॥

यमलार्जुनशापाग्निशान्तिनूतनवारिद!।
वैकुण्ठाधिप! वेदान्तवेद्य! [४]वेदण्डरक्षकः (क) ॥ १५ ॥

योऽन्तस्सर्वचराचरो बहिरपि व्याप्य स्थित(:) कर्मणा
दूरः स्वावयवीकृताखिलजगत्सर्वै [५]रुपास्यो हरिः।
प्राप्यो भक्तिमतां स एव भगवान् श्रीकृष्ण! ते किङ्कराः
सर्वे तत्कृपया प्रसीदतु भवान्दीने मयि श्रीपते!॥ १६ ॥

पूर्णं दिव्यगुणैर्विहीन[६]मखिलैर्हेयैस्समस्तात्मताम्
आपन्नं स्वशरीरभूतचिदचिद्वर्गं श्रियः कामुकम्।
ध्यायं प्राप्यमशेषनैगमवचोवेद्यं विभूतिद्वयी-
नेतारं कमितारमानतततेस्त्वां भावयामो वयम्॥ १७॥

---

१. मै२, म१. ०स्मरणिय्य० २. म१. .... ०प्रावृत्०
३. मै३, म१. ०कालिय्यमद० ४. मै१, मै२, म१.०वेतण्ड०
५. मै१, मै२. ०रूपास्य तेबुधैः ०, म१. ०रूपास्यो हरिः०
६. म१. ०ममलैः०

वेदो भागद्वयात्मा निरतिशयसुखप्राप्तये कर्मजातं
[1]ब्रह्मेपास्तिं विधत्ते प्रथममपि परं देवताद्रव्ययोगः।
तद्ब्रह्मा[2]शेषदैवं [3]त्वमसि हविरपि त्वं तथा सप्ततन्तुः
यज्ञो वै विष्णुरित्यादिभिरपि च तदेवाग्निरित्यागमाच्च ॥ १८ ॥

सत्यं ज्ञानमनन्तमाद्यमखिलात्मानं खवातानल-
क्षीरक्षोणी निदानमुन्नतयतुः कोशान्तरावस्थितम्।
आनन्दात्मक[4]मप्रमेयमनघं त्वां योगिनो हृत्पयो
जाते भक्तिलतामरन्दकलितं ध्यायन्ति भो केशव!॥ १९ ॥

नारायण शरणागत-
भरणप्रवणप्ररूढकरुणाब्धे।
भावत्कज्वरपीडित-
मेनं परिपाहि न हि [5]जहीहि विभो॥ २० ॥

इति [6]दीनदीनस्वरेण कृतप्राणरक्षात्वरे अञ्जलीकृतकरे, विस्मृतपुरहरे, तस्मिन् [7]ज्वरे प्रणिपत्य प्रणामान् कलयति। भगवानपि शरणागतवत्सलः करुणा[8]परिणाहृदक्षेण [9]कटाक्षेण तं त्रिशिरसमालोक्य निजज्वरोपद्रवशमनाय महोदग्रसेनं विष्वक्सेनं [10]भ्रुकुट्या नियुज्य स्वभक्तावसथ[11]वाटीवीथी शोधकदासदासेष्वपि, [12]तवोपद्रवो माभूदिति आज्ञाकवचमाकलय्य [13]अभयमारचय्य सुरवरकरतलविगलितसुरतरुकुसुमविसरविगलितमधुमिलदलि-कुलकलकलनिशमनशमितविततकदनजनितश्रमः सुखेन क्षणमासाञ्चक्रे ॥

---

१. मै१. ० ब्रह्मापास्ति०
२. मै१, मै२, मै३. ०शेषवैवं०
३. म१. ० त्वमिति हरिरपि०
४. मै१, मै२, मै३. ०मप्रमेयमनद्यम्०
५. मै३. ० जहहि विभो०
६. म१. ०दीनदीनस्वरे कृतप्राणरक्षणत्वरे०
७. म१. ०ज्वरे धरायाप्रणिपत्य०
८. म१. ०परिणाहकलनदक्षेण०
९. म१. ०कटाक्षेण त त्रिशिरसमालोक्य०
१०. मै१, मै२, मै३. ०भ्रदृष्ट्या०
११. मै१, मै२.०वाटवीथी०, मै३. ०वापिवधि.०
१२. म१. ०तपोपद्रवो०
१३. मै१, मै२, मै३. ०माकलय्य भय०

पुनरपि स बलितनयो विविधशस्त्रास्त्रनिकरेण सममद्भुतं रथमधिरूढः कोपकुटिलया भ्रुकुट्या चराचरवर्गमुत्क्षिपन्निव, दुर्भेद्यकवचघटितदेहः समधिगम्य रणाङ्गणंम् उत्साहद्विगुणितबलैर्बाहुभिस्तूणीरशरासनयो [1]रथोद्धरणयोजनक्रिययोरैक्य[2]मुपदिशन्, [3]अप्रतिहतशरधाराभिर्वारिदो नीलगिरिमिव यादवस्वामिनमभिषेकयाञ्चकार ॥

खण्डयामास दोर्दण्डमण्डलं चण्डविक्रमः।
पुण्डरीकेक्षणस्तस्य कुण्डलीन्द्रोपमं रिपोः॥ २१ ॥

[4]मुराराति: स्वामी निखिलजगतां तस्य तु भुजा
सहस्रं चिच्छेद प्रबलसुरभीत्या सह हरिः।
द्विषद्वान्तोदन्ताहिमकरसमुद्दण्डमहसा
भुजास्तम्भालम्बस्फुटघटितचक्रेण स रिपोः॥ २२ ॥

ग ॥

तदानीं [5]बृन्दारकसुरसुन्दराकरकिसलयनि:[6]शेषापहृतनन्दनकुसुमवर्षापरितुष्टमहेन्द्र-नियुक्तपुष्पवद्वनमात्रभञ्जनप्रवादभीति [7]मिहिरामिहिरख्याततत्पद[8]वत्यन्ततासमुचित-परिहसनपरसकलगीर्वाणम्, अखिलकोणपक्षयवार्त्ताकातरितदिक्कोणपशुष्काधरदल-द्रवीकरणचञ्चुशिशिरसमीरडिम्भपरिरम्भविमुक्तमूर्च्छबाणसैनिकनिवेदितस्ववेश्म-व्यापारखिन्नतत्सुन्दरीनयनकटाहनिर्बाधनिर्यदुष्णबाष्पसलिलकृत [9]समदज्वरपीडित-युद्धरङ्ग [10]धारण्यारोग्यस्नानशङ्का [11]करसुधाशनगणनयनारविन्दस्यन्दि [12]मारन्दायिता नन्दबाष्पपरीवाहशमितरजस्तमोभरकलितशान्तिकं,

---

१. मै१, मै२, मै३.० रथोद्धरणक्रिययो०
२. मै३. ० मपदिशन्०
३. म१. ० अप्रतिहतशरपरम्पराभिः वारिदो:० मै१, मै२. ० अप्रतिहतरारैर्वारिदो०
४. मै१, मै२ ०पुराराति:०
५. मै१, मै२, मै३. ०बृन्दारसन्दरी०
६. म१. ० शेषावहृत०
७. म१. ०मिहिरव्याख्या०
८. म१. ०वत्यन्ता०
९. मै१, म१ . ०समरज्जर०
१०. म१. ०धरण्या०
११. मै१. ०परसुधा०
१२. म१. ०मरन्दायिता०, मै१. ०धारायिता०

[१]छिन्नबाणभुजासहस्रमूलनिर्गच्छच्छोणितपरीवाहप्रतिफलितसुरवरवर्णिनीमुखसरसिजभ्रमावतीर्ण [२]मरालीमहिलापूर्वशकुन्तदर्शन[३]भीतगृध्रश्येनादिकलकलमेदुरं, रणरङ्गत्वङ्गन्नन्दिवृषभ [४]नासारज्जुकर्षणदत्तावधानगङ्गाधरातनुतनुकम्पप्रचलितगङ्गापयःपयोजनीपरिरम्भसमुत्सुकितकुमुदिनीबान्धवं, किमप्यद्भुतमासीत्॥

मुद्राजद्वदनं [५]स्थितं बहुबले [६]रुद्रासुकीर्तिप्रिये
पद्राजत्सुरवाहिनीस्मृतिकथाविद्रावितायव्रजम्।
सद्राजन्यकुलावतंसमखिलक्षुद्रापहं स्वामिनं
भ्रदावासमसामियेष गदितुं रुद्रोऽपि नानास्तवैः॥ २३॥

नानापन्नगमानुषामरपतिप्रोद्यत्किरीटप्रभा
शारोपान्तपदाम्बुजात! परमव्योमेश! पद्मासन!।
स्फायत् स्थावरजङ्गमस्थितिजनिक्षेपैकहेतो! जगत्
सेतो! दिव्यकटाक्षमत्र कलय स्वामिन्! यदूनं(नां) पते!॥ २४॥

सुरा वा धाता वा पशुपतिरहं वा तव महा-
गुणग्रामक्षीराम्बुधिकणपरागांशकलने।
न शक्ताः सा नित्या श्रुतिरपि किमन्ये नरमुखाः
तदस्माकं वाचा कलयति हि मौनं स्तुतिपथे॥ २५॥

उरस्यास्ते [७]लक्ष्मीः सकलजग[८]दुज्जीवनतया
स्मरस्य त्वं तातस्त्रिभुवनजयोपात्तयशसः।

---

१. म१. ०खिन्नबाण०
२. मै१, म१. ०मराल०
३. म१. ०दर्शनक्षुभित०
४. मै२. ० नासीरजकर्षण०
५. म१. ०सितं०
६. मै१, मै२, मै३. ०मद्रासुकीर्तिप्रिये०
७. मै१. ०लक्षिः०
८. मै१. मै२, मै३. ०उज्जीवनदयारं०

सनाभिर्नाभिस्ते जनयति मनोज्ञाम्बुजनुषा
चतुर्वक्त्रान् (क्त्रः) को वा गणयति तवात्यर्थविभवम्॥ २६ ॥

तपो वा दानं [१]वा यदि भुवि मखं वा कलयतां
स्मृतिर्नो चेत्पुंसां तव चरणपङ्केरुहयुगे।
फलं व्योमाम्भोजं कलनमपि तेषां खलु वृथा
[२]पृथापुत्रैश्वर्यप्रदपदसरोजातविभव!॥ २७ ॥

द्विषां वा [३]मित्राणामुत परमसायुज्यकलना
पताका ते [४]तादृङ्मृदुलमधुरा दिव्यकरुणा।
तवैवैषा स्वामिन्! खलु समुचिता सत्यवनते
यतो घण्टाकर्णः [५]परमपदवीमप्युपगतः॥ २८ ॥

यदेतल्लोकानामधिपतय एते वयमिति
प्रभो! निर्मातारः कतिपयविशेषेष्विति च यत्।
भवद्वीक्षाश्रीरम्बुधिपृथुलवीचीप्रविलसत्-
तुषारांशग्रासादिति वदति [६]गौरौपनिषदि॥ २९ ॥

पुनर्जन्मध्वान्तक्षपणदिनरत्नं दुरितभू-
धरच्छेदस्फायन्निशिततरदम्भोलिलसितम्।
भवत्पादाम्भोजस्मरणमिति नारायण नमो
नमस्तुभ्यं [७]स्फायत्सकलजगदाधारविहते॥ ३० ॥

---

१. मै१. ०वा भुव खलु मख०, म१. ० वा भुवि मखं०
२. म१. ०वृथापुत्रैः ०
३. मै२. ० मित्राणामृत०
४. मै१, मै२, मै३. ०तादृङ् महिममधुरा०
५. म१. ०पदवीधीमुपगतः०
६. मै१, मै२, मै३. ०गोरोपनिषदि०
७. मै३. ०स्तांरनसकर०, म१. ०स्फत्र:सकल०

भवान् [१]कर्त्ता नृणां दुरितगणहर्त्ता निशिचर-
प्रहर्त्ता संहर्त्ता प्रलयसमये सर्वजगताम्।
मखानामाहर्त्ता फणिगिरिविहर्त्ता स्वपदयुक्
समुद्धर्त्ता भर्त्ता कृपणजनताया विहरते॥ ३१॥

तद्विष्णोः परमं पदं तव पदं तेऽमी वयं शूरयः
पश्यामः सततं प्रबोधजलधे! सर्वान्तरात्मन्! हरे!।
मायामानुषमूर्तिना हि भवता सर्वे सबाधा वयं
तत्कारुण्यनिधे! प्रसीद भगवन्! भो पुण्डरीकेक्षण!॥ ३२॥

सुत्रामधातृमुखसत्राशनप्रबलवित्रासभेदनपटो!।
मित्राब्जवैरिमयनेत्रामलस्फुरितगात्रातिवेलकरुणा।
सत्राणशौण्डसतनुत्राणनिर्मलचरित्रातिरम्यविहृते
कुत्रास्ति ते सदृगमुत्रेहमावरकलत्रानुरञ्जितविभो!॥ ३३॥

इति बहुविधैराम्नायैर्भगवतः कृपाकूपारमुद्वेलोल्लोलकल्लोलमाकलय्य भावविदां ककुदो दाक्षायणीपतिरेष भक्तमूर्धन्यो बाणो रक्ष्योऽनुग्राह्यश्च भवता शरणागतत्राणबद्धदीक्षेण, भक्तसम्बन्धिनोऽपि भक्ततमा इति तव प्रतिज्ञेति बाणरक्षणं याचयामास॥

(कृष्णः शिवं वदति)
एवं बाणावनार्थं कृतविनयसमुत्कण्ठमीशं पशूनाम्
ऊचे स्वामी यदूनामुचितमिदमहो यत्त्वया भाषितं मे।
प्रह्लादस्यान्वये यः प्रभवति स पुनर्नैव वध्यो ममेति
प्रायो दृप्तस्य दर्पाहरणमिह पुनः कल्पते नः फलाय॥ ३४॥

प्ररोहन्त्वस्यामी मयि कृतभरस्यासुरविभोः
भुजाश्चत्वारोऽहीट् तनुसदृशभावाः सुरुचिराः।
रथाङ्गाद्यैश्चिह्नैर्मम च कलिता यातु च भवान्
गिरिं कैलासाख्यं सुखमिति हरिः प्राह गिरिशम्॥ ३५॥

---

१. मै१. मै२. ०हर्ता रीणां०, मै२. ०कर्ताशृणां०

अनुज्ञातश्शम्भुर्मुरहरगिरा शैलमगमत्
[१]निजैस्सैन्यैः शिष्टैस्सह गिरजया [२]सार्धमनघः।
हरेः स्मारं स्मारं भुजबलमदृष्टश्रुतमसौ
पुनर्नावं नावं गुणगणमणींस्तस्य विमलान्॥ ३६॥

बाणं प्राह मुरान्तकस्सरभसं पौत्रं दिदृक्ष(क्षु)स्तदा
तां सानन्दमुषां च याहि नगरीं [३]तावनयेति प्रभुः।
नत्वा तत्पदयोः स चासुरविभुस्तीव्रं पुरी शोणिता-
भिख्यामाप निजात्मजां सकुतुकं द्रष्टुं समुत्कण्ठितः॥ ३७॥

उषे! त्वं नो भाग्यं किमपि यदभूत्सर्वजगतां
विभोः पौत्रो भर्त्ता निरतिशयसौन्दर्यमदनः।
कलानां सर्वासां निधिरुदधिरुद्वेलयशसां
खनिः शौर्यस्फायन्मणिसमुदयस्याद्भुतमहाः॥ ३८॥

इति निगद्य सगद्गदानन्दबाष्पमुषामाश्वास्य तं जामातरं कामावतारं [४]मनसि तारं निश्चित्य कारागारान्निर्गलविमोचनपूर्वकं बहिरनुगमय्य, भेरीपटहढक्कानिस्साणवेणुमर्द्दलतालमुखमङ्गल [५]वाद्यहृद्यं तं [६]दिव्यामृतै[७]रभिषिच्य निगमघोष[८] द्विगुणितोत्साहं वसुधाभरेभ्योऽपरिमितमर्थजातं वितीर्य विविधरत्नभूषणैस्तौ दम्पती अलङ्कृत्य दिव्यवस्त्रजातं वितत्य, अयुतं रत्नरथान्, नियुतं कनकमञ्जूषिकान्तिरितदिव्यरत्नाभरणः (णानि), भगवतो वासुदेवस्य सन्निधिमासीत्॥

---

१. म१. ० निजं सैन्यः ० २. म१. ०साकमनघः०
३. मै१, मै२, म१. ०तापानयेति० ४. म१. ०मनसितारं० इति नास्ति।
५. मै१, मै२, मै३. ०वाद्य हृद्य तं० ६. मै३. ०द्विव्यामृतैरभ्यषिच्च०
७. म१. ०रभ्यषि० ८. मै१, मै२, म१. ०द्विगुणोत्साह०

मुखकमलमरन्दास्वाद[1]समुपगतेन्दिन्दिरपाल्या, मदनकरकलिताशुष्कमाल भारिकृपाण्या, अधरपुटप्रतिहतिमन्दमन्दनिः श्वासमारुतग्रसनसमुपगतरत्नकुण्डलतरणिदर्शनसमुपगतोरगराजमूर्त्या, [2]यमुनया, लौकिकसकलनीरवस्तु[3]प्रकृत्या, युवजनमनश्चोरबन्धनरज्ज्वा शरच्चन्द्रसन्निहितनीलाम्बुदपाज्या वेण्या, सकलजननयनकज्जरमाकलयन्तीम्, क्षीरसागररिङ्खद्वीचीदायादेन मुखसरसीसमुद्भूतकमलयुगलेन [4]युवजनपदनिगलेन मदनधीवरकरकलित स्वसीमन्तबडिशान्तविलसत्सिन्दूरामिषग्रसनसमुपगत[5]मीनयुगलेन सौन्दर्यस्व(सर्वस्व)कन्देन किञ्चित्कलितस्पन्देन, विकिरतेव, तमालकाननं, [6]सन्तन्वतेव कुन्दकुसुमवर्षम्, अनङ्गसौभाग्यसर्वस्वनिदानेन, युवजनहृदय भेदनतिग्मेन, लोचनयुग्मेन, सकलदिशाभागमवदातमेचकितमाविष्कुर्वन्तीम्, [7]श्रुतिस्मृतीतिहास[8]पुराणपद्धत्येव सान्द्रतया अभेदं स्वरूपतो भेदमाकलय्य चरितार्थाभ्याम्, अतिकठिनस्वभावतयेव पुनर्भवखेदप्रवाह-मपरित्यजद्भ्यां चिरसमाश्लेषविरहिततया आम्रेडितकैलासमनुकुर्वद्भ्यां, पयोधरतां व्यक्तीकर्त्तुमिव चेलाञ्चलचपलानुगताभ्यां गुरुतयेव शून्यवादिनं कमपि तिरस्कृत्य मुक्तानुरञ्जनमावहद्भ्यां, कामुकमनोदन्दशूक[9]गारुडमणिसदृशचूचुक-समुज्ज्वलिताभ्यां, अपरावताराभ्यामिव, मन्द[10]स्पन्दबलवत्तरलदीप्त्याकृष्टजनलोचनाभ्यां स्तनाभ्यामसदृश विक्रम[11]मनङ्गमुपदर्शयन्तीम्, [12]सन्देशेनेव सूचिकायाः, विवर्त्तेनेव नभसः, तादात्म्येनेव परमाणोः, वैदिकवाग्वैखरीजीर्णेन सौत्रान्तिकमतेनेव केनापि चिदम्बररहस्यनिदर्शनेन, गगनकुसुमशशविषाण[13]मैत्रीलग्नकेन, वलग्नकेन, [14]कामुकजनमोहतमसो नाभीगुहाप्रदे(वे)शं सुकरयन्तीम्, [15]किङ्किणीघण्टिकासमुदञ्चितकाज्या-नाभीवल्मीकविनिर्गतवलयितस्वाङ्गनिर्यदण्डसमुदयभुजङ्ग्येव अतिधवला-मुक्ताफलप्रत्युप्ततया मुरपुरहरयोः पदे शिरसि [16]नित्यसन्निधानजिहासतया [17]आश्रितमध्यया सुरतरङ्गिण्येव कलिताम्, नासावंशाधरदलत्

---

१. मै३. ०समुपगतेन्दिन्दिन्दीरपाल्या०

२. म१. ०युमना०

३. मै१, मै२, मै३. ०प्रवृत्या०

४. मै१, मै२, मै३. ०युवजननिगलेन०

५. म१. ०मीनयुगेन०

६. म१. ०सन्तन्वतेव कुसुमवषे०

७. मै३. ०स्मृततीहास०

८. म१. ०पुराणवसान्द्रतया०

९. मै३. ०गारुणमणि०

१०. म१. ०स्पन्दनलत्तरल०

११. म१. ०मनङ्गसङ्गरमुपदर्शयन्तीम्०

१२. मै३. ०सन्वेशेनेव०

१३. म१. ०मैत्रिलग्नेन०

१४. मै२. ०कामुकंजन०

१५. म१. ० किङ्किणीघटिका०

१६. मै१. ०नेत्यसन्निधान०

१७. म१. ०आश्रितयासुर०

[1]पुण्ड्रेक्षुद्वया-मुष्यायणतां प्रपन्नेन केनापि शुक्तिडिम्भेन अनुकूलं विकिरन्तीमिव, सुधारसं, [2]बिम्बच्छदसाच्छायभ्रूलतया पुरहरद्विषः छुरिकयेव, समलङ्कृताम्, परिणाममिव रतेः, परिपाकमिव शय्या(या):, पुनरुद्भवमिव[3]लक्ष्म्याः, पुनरुक्तिमिव द्रुपदराज[4]सुतायाः, [5]वीप्सामिव विश्वविजयवत्याः शम्बरान्तकशक्तेः अनिरुद्धेन सह दिव्यरथमुपस्थायोपागतामुषाम्, मौलिभागेन पादतलं नीराजयन्तीम्, करुणाकटाक्षेण स्वपौत्रानुरूपां [6]मन्वानः, स्वामी वासुदेवः, शरणागतत्राणबद्धदीक्षः, स्वपदनतसन्निधिं बाणमपि वस्त्राभरणादिभिराश्वास्य गगनतलावतीर्णसुरमण्डलीकिरीटचुम्बिपदपङ्कजः, तानपि त्रिविष्टपप्रदेशाय नियुज्य, विविधबलपयोनिधिवीचीपरम्परानुकलितः, द्वारकानगर-वास्तव्यजननयनचकोरानन्दमुपजनयन्, कटाक्षधारया, स्वदर्शनद्विगुणितरोमाञ्च[7]पौरपुनः पुनः प्रमाणकलितापरिमितानन्दः, स्वसमनयैस्तनयैः पौत्रेणेनानिरुद्धेन उषया च निरन्तरसंसेवितपादारविन्दः,[8]रुक्मिणीसत्यमाभ्यामनुकलितानन्दः, सकलमपि भुवनमण्डलं धर्मेण पालयन् सुखमेध(या)मास॥

कृतिं दुरितनिष्कृतिं शुभपरिष्कृतिं सादरा
बुधा मम [9]मुदायुतास्सदसि ये पुरस्कुर्वते।
पदञ्चलमुदञ्चये स्वहृदि सन्ततं तादृशं
दिशाङ्गणविशालसद्वरयशोवशश्रीमताम्॥ ३९॥

मधुधारस्थेमा बहुरसिकसामाजिकमनः
समानीतप्रेमा[10]स्तव वचनसामार्थगरिमा।
क्षमायामायामानुगकृतिसमाजोत्पलवनी
सुधाधामा बाणासुरविजयनामा विजयताम्॥ ४०॥

---

१. म१. ० पुण्ड्रेक्षुद्वयामुष्यायणता०
२. म१. ०निम्बच्छेदसच्छद्य०
३. मै३. ० लक्ष्याः ०
४. मै३. ०नुतायाः०
५. मै१, मै२. ०वीक्षामिव०, मै२. ० दीप्यमिव
६. म१. ०मननीय०
७. मै१, मै२, ० पौरमलः ०
८. म१. ०पदारविन्दः सकलामपि०
९. म१. ० मुदायुताः ०
१०. म१. ० स्पव वचन०

शय्या त्वन्यैव पाको मृदुलमधुरताऽनन्यवृत्तिः प्रवृत्तिः
वृत्तिर्गम्भीर[१]वृत्तिः किसलयमृदुलानस्युरीतिश्च रीतिः।
भो भो विद्वद्वरेण्याः मयि कुरत कृपां चन्द्रिकाशीतवृत्तिं
[२]भूयोऽप्यस्मत्प्रबन्धप्रवचनमुखतः साधु[३]शिष्येष्वपीमाम्॥ ४१॥

रक्ष्या विद्वद्वरेण्यैः कुटिलमतिमुधानल्पजल्पादपायात्
एषाऽऽस्माकीनवाचा हयमुखकरुणावीक्षणोत्तेजितश्रीः।
पक्षीट्पक्षानिलं तं [४]मृदुमपि भुजगाधीश्वरः किं स्फटाभिः
जिघ्रत्युग्राभिरौर्वानलसमगरलोद्वेलकीलानुगाभिः॥ ४२॥

न शक्तिर्नैपुण्यं न च सकललोकादिकलनं
न वा काव्यज्ञ[५]स्याद्भुतविततशिक्षागतिरपि।
तथापि श्रीविद्वद्वरचरणरेणोर्महिमतः
कृता [६]जीयाच्छ्री[७]वेङ्कटबुधकवेः सूक्तिसरणिः॥ ४३॥

चोरैरेषा [८]ह्रीयतां नाम वाणी
का नो हानिर्ग्रन्थसन्दर्भभाजाम्।
यक्षाधीशान्तः पुरात्केचिदार्त्ताः
किञ्चिद्वित्तं गृह्णते किं ततः स्यात्?॥ ४४॥

---

१. मै१, मै२. ०वृत्तिः सलयमृदुल०
२. मै३. ०भूयोप्यस्मप्रबन्ध०
३. मै१, मै२, मै३. ० शिष्योष्वपीमाम्०
४. मै३. ० मृदुलमपि०
५. म१, स्याद्भुतललित०
६. म१, ०जियाच्छ्री०
७. मै१, मै२, ०वेङ्कटविमणेः, मै३ ०वेङ्कटकवेः०
८. मै३ ० हय्यतां०

[1]जीयाच्छेषधराधरेन्द्रमकुटीरत्नं श्रियः कामुकः
[2]जीयाद्भाष्यकृदुज्ज्वलः शुभगुणैः रामानुजस्संयमीट्।
जीयाद्वेदवतंसदेशिकगुरुस्सिद्धान्तचूडामणिः
जीयादाहिमरश्मितारकमिदं रामानुजीयं[3] मतम्[4] ॥ ४५ ॥

हारीतान्वयशुक्तिमौक्तिकमणिर्विद्यानिधिस्सन्निधिः
वेदान्तार्यगुरुः सगर्वकथकेभाधीशकण्ठीरवः।
अस्मन्मानसपङ्कजातरसिक[5]स्ताद्वावदूकाग्रणीः
अस्तोकाय शुभाय सूरिजनतामान्योण्णयार्यात्मजः॥ ४६ ॥

इति श्रीमद्वाधूलकुलकलशपाथोनिधिराकासुधाकरसर्वतन्त्रस्वतन्त्रोभयवेदान्ताचार्यवरदगुरुवरकरुणाकटाक्षलब्धश्रीभाष्यार्णवतात्पर्यकणेन, तदनुग्रहग्राहित[6]-पाणिनीयोदयनीयजैमिनीयसम्प्रदायेन श्रीमत्कन्दालकुलतिलकचतुस्तन्त्रदिवाप्रदीपबिरुदाङ्क-श्रीश्रीनिवासार्यतनयेन सहजविनयेन सुरसद्मगिरिनगरवास्तव्येन नव्यदिव्यगव्यभव्य साहितीसम्प्रदायपारावारपारदृश्वना वेङ्कटाचार्येण कलिते बाणासुरविजयाह्वये चम्पूप्रबन्धे षष्ठोल्लासः॥

श्रीः श्रीः श्रीः

॥ षष्ठोल्लासः समाप्तः ॥

❑❑❑

---

१. म१. ०जिय्याच्छेष०
२. म१. ० जिय्या०
३. म१. ० रामानुजिय्यं०
४. म१. ०बाणासुरविजयचम्पूसमाप्तः इति भवति।
५. मै१, मै२, मै३ ० स्ताद्वा०
६. म१. ० पाणिनिय्योदयनिय्यजैमिनिय्यादि०

अकारादिक्रमेण गद्यसूची

क्रं सं.	श्लोकारम्भः	उल्लासः-श्लोकसंख्या
1.	अथ कदाचन	III–1
2.	अनन्तरानन्त	I–8
3.	अम्बुधिरिव	IV–4
4.	अलङ्कारवता	II–1
5.	अस्ति खलु	I–1
6.	इति तन्त्रीचरण	IV–9
7.	इति दीनदीन	VI–1
8.	इति निगद्य तं	II–5
9.	इति निगद्य सगद्गदं	VI–5
10.	इति बहुविधैः	VI–4
11.	इति भगवदनुग्रह	IV–8
12.	इति श्रीमद्वाधूल	I–10, V–13, VI–7,
13.	इत्यपरिमितकृपया	V–2
14.	एवं परस्पर	V–8
15.	एवं प्रवृत्ते सति	V–7
16.	एवमद्भुत	IV–2
17.	एवं समरसन्नाहं	V–4
18.	क्वचन तपस्विजन	III–9
19.	क्वचित्पृथुतरी	I–5
20.	क्वचिदभङ्गुर	I–2
21.	चित्ररेखापि	IV–1
22.	ततः क्रमेण	III–8
23.	ततः क्षणादेव	IV–5
24.	ततः पतनभयात्	II–4
25.	ततः संवर्त्त इव	I–7
26.	ततस्ते सर्वेऽपि	IV–3

❑❑❑

अकारादिक्रमेण श्लोकसूची

❑❑❑

प्रयुक्तछन्दसां सूची

1. अनुष्टुप्

IV–22, VI–8, 9, 10, 11, 12, 13, 14, 15, 21

2. आर्या

लक्ष्यैतत्सप्तगणाः गोपेता भवति नेह विषमे जः।
षष्ठोऽयं न लघू वा प्रथमेऽर्थे नियतमार्यायाः॥
षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयतिपदनियमः।
चरमेऽर्थे पञ्चमके तस्मादिह भवति षष्ठो लः॥ (वृ. र. 2–1, 2)
यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि।
अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या॥ (श्रुतिबोधः)

I–4, V–11, 30

3. इन्द्रवज्रा

स्यादिन्द्रवज्रा यदि तौ जगौ गः। (वृ र 3–28)

I–20, 30, 44, 50, II–6, III–27, 30, 35, 38, IV–34

4. उपजातिः

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः। (वृ. र. 3–30)

II–15, III–1, IV–6, 16, 18, V–1, 12, 35, 36

5. उपेन्द्रवज्रा

उपेन्द्रवज्रा जतजास्ततो गौ। (वृ. र. 3–29)

I–49, 51, 52, 55, 56, II–7
V–34, 53, 54.

6. उपगीतिः

आर्या द्वितीयकेऽर्धे यद्गदितं लक्षणं तत् स्यात्।
यद्युभयोरपि दलयोरुपगीतिं तां मुर्निब्रूते॥ (वृ. र. 2–9)

V–21

7. उपचित्रम्

उपचित्रा नवमे परयुक्ते। (वृ. र. 2–36)

V–42

8. गीतिः

आर्या प्रथमलोक्तं यदि कथमपि लक्षणं भवेदुभयोः।
दलयोः कृतयतिशोभां तां गीतिं गीतवान् भुजङ्गेशः॥ (वृ. र. 2-8)

I–14, 15, III–11, IV–2, 23, V–20, VI–20.

9. दण्डकम्

यदिह नयुगलं ततः सप्तरेफास्तदा
चण्डवृष्टिप्रपातो भवेद्दण्डकः॥ (वृ. र. 3-112)

I–9, III–18, 19, IV–30, 36, VI–33

10. द्रुतविलम्बितम्

द्रुतविलम्बितमाह नभौ भरौ॥ (वृ. र. 3-49)

II–29, III–6, IV–31, V–40, 41, 49,

11. नर्कुटकम्

हयदशभिर्नजौ भजजला गुरुर्नकुटकम्। (वृ. र. 3-98)

IV–29, 32, 33, 34, 35, 45,
V–17, 18,

12. प्रमाणिका

प्रमाणिका जरौ लगौ। (वृ. र. 3-17)

V–54

13. पथ्यार्या

त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः।
पथ्येति नाम तस्याः प्रकीर्तितं नागराजेन॥ (वृ. र. 2-3)

V–19

14. पञ्चचामरम्

जभौ जरौ वदन्ति पञ्चचामरम्। (वृ. र. 3-67)

I–58, III–10, V–10

15. पृथ्वी

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः। (वृ. र. 3-94)

II–14, 18, 19, III–4, 20, 21, 22, VI–39.

16. प्रहर्षिणी

म्नौ ज्रौ गः त्रिदशयतिः प्रहर्षिणीयम्। (वृ. र. 3-70)

IV–8

17. भुजङ्गप्रयातम्

भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः। (वृ. र. 3-55)

III–24

18. मदलेखा

म्सौ गः मदलेखा (वृ. र. 3-11)

V–23

19. मन्दाक्रान्ता

मन्दाक्रान्ता जलधिषडगैम्भौं नतौ ताद् गुरू चेत्। (वृ. र. 3-97)

I–21, 22, 23, 24, II–9, III–29, V–29 VI–4, 5, 6,

20. मालिनी

ननमयययुतेयं मालिनी भोगिलोकैः। (वृ. र. 3-87)

I–41, 43, II–16, III–33, IV–13, 37, V–13

21. माणवकम्

माणवकं भात्तलगाः। (वृ. र. 3-14)

V–25

22. रुक्मवती

भ्मौ सगयुक्तौ रुक्मवतीयम्। (वृ. र. 3-24)

V–22, 27, 28,

23. रथोद्धता

रान्नराविह रथोद्धता लगौ। (वृ. र. 3-28)

II–25 V–37

24. ललिता

धीरैरभाणि ललिता तभौ जरौ। (वृ. र. 3-59)

III–8, IV–25

25. वसन्ततिलका

उक्ता वसन्ततिलका तभजा जगौ गः। (वृ. र. 3-79)

II–31, III–32, IV–7, 25, V–51

26. वंशस्थम्

जतौ तु वंशस्थमुदीरितं जरौ। (वृ. र. 3-46)

I–45, II–30

27. विद्युन्माला

मो मो गो गो विद्युन्माला। (वृ. र. 3-13)

V–24, 26,

28. वैश्वदेवी

पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ। (वृ. र. 3-62)

V–38, 39

29. शार्दूलविक्रीडितम्

सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्। (वृ. र. 3-101)

I – 2, 6, 7, 11, 12, 13, 16, 17, 18, 26, 27, 28, 31, 32
33, 34, 40, 46, 48, 53

II–3, 4, 5, 12, 13, 20, 21, 22, 23, 24, 26, 28

III–5, 9, 13, 14, 31, 34, 36, 37

IV–1, 3, 9, 10, 11, 12, 14, 17, 20, 21, 26, 27, 28,
38, 39, 40, 41, 42, 43, 44, 46, 47

V– 2, 3, 4, 5, 14, 15, 16, 43, 44, 48, 50, 54, 55, 56, 57, 58, 59, 60, 61, 62

VI–3, 16, 17, 19, 23, 24, 32, 37, 45, 46

30. शालिनी

शालिन्युक्ता म्तौ तगौ गोब्धिलोकैः। (वृ. र. 3. 34)

V–31, 32, 33, VI–44

31. शिखरिणी

रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी। (वृ. र. 3.93)

I–5, 8, 25, 35, 36, 37, 38, 39, 42, 54, II–27,
III–2, 15, 17, 25, 29, IV–4, 5,V–1, 7, 8, 9
VI–2, 7, 22, 25, 26, 27, 28, 29, 30, 31, 35, 36, 38, 40, 43

32. स्रग्धरा

म्रभ्नैर्यानां क्रमेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्। (वृ. र. 3-104)

I–1, 10, 19, 47, 59, II–10, 11, 17, III–3, 7, 12, 16, 26, 28
IV–15, V–6, 45, 46, 47, 52, VI–1, 18, 34, 41, 42

33. स्वागता

स्वागतेति रनभाद्गुरुयुग्मम्। (वृ. र. 3-39)

IV–38, 56

34. हरिणी

रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा। (वृ. र. 3-96)

I–3, 58, II–1, 8

❑❑❑



डॉ. कम्भम्पाटि साम्बशिवमूर्तिः

विभागाध्यक्षः
अध्यक्षः शिक्षासङ्कायः
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः
जयपुरम्-302026 (राजस्थानम्)

पितरौ	:	वेङ्कटलक्ष्मीः लक्ष्मीनारायणावधानी
जन्मस्थानम्	:	आगिरिपल्लि, कृष्णा-आन्ध्रप्रदेशः
प्रकाशितग्रन्थाः	:	1. संस्कृतशिक्षणम् 2. जनसंख्याशिक्षा 3. सांख्यिकी 4. प्रायोगिकं मनोविज्ञानम् 5. उच्चस्वरनिर्णयः (वैदिकव्याकरणग्रन्थः) 6. सांख्याकारिका-एकः प्रयोगः 7. घनदर्पणः 8. श्री रामस्तुतिरत्नमाला 9. श्रीमद्रामगीता 10. श्रीमत्पाण्डवगीता 11. गोदावरीपुष्करमाहात्म्यम् 12. शान्तिशोधः 13. Organising of the Residential Schools
विशेषक्षेत्रम्	:	कृष्णयजुर्वेदयस्य तैत्तरीयशाखायाः अध्ययनम् स्मार्त्तप्रक्रियाः
सम्पर्कसूत्रम्	:	09928525565
अभिरुचिः	:	संस्कृतभाषाप्रचारः, शोधपत्रलेखनम् प्राचीनसाहित्ये निहितानां शैक्षिकतत्त्वानाम् अध्ययनम् संस्कृतसान्द्रध्वनिमुद्रिकानाम् निर्माणम्